लम्बेन निघ्नं कुमुखैक्यखण्डमित्यादिना जातं क्षेत्रफलम् ५०, २. ९. ८. एतदेवापरविषमचतुर्भुजस्यातो द्विघ्नमेतत् १००, ४. ३. पूर्वानीतायतचतुर्भुजफलेन युतं जातं क्षेत्रफलम् ५७६, ४. ३.

**Colophon:**

गणेशः श्रीधरसुतो नन्दिग्रामनिवासकः ।
सुबोधार्थं क्षेत्रविदामकरोद्गणितं स्फुटम् ॥

## No. 13404. क्षेत्रतत्त्वप्रदीपिका.

## KṢĒTRATATTVAPRADĪPIKĀ.

Substance, paper. Size, 8 × 6¼ inches. Pages, 108. Lines, 32 on a page. Character, Telugu. Condition, good. Appearance, new.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Begins on fol. 1*a*. The other work herein is Bījagaṇita 1*a*, written from the right side of the book.

Complete in five Prakāśas.

This work purports to be a Sanskrit rendering by Yōgadhyānamiśra of Huttons' Euclidian geometry. The rendering is said to have been made at the instance of a German named Triyar who was the officer in charge of a library at Calcutta.

**Beginning:**

श्रीक्षेत्रतत्त्वप्रदीपिकानामकः रेखाग्रन्थप्रारम्भः ।
कलिगतम् ४९७९ भावनामसंवत्सरकार्त्तिकशुक्लेतरनवमीबुधवासरे कृतः ॥

यत्कान्त्या कान्तिमन्तः सुरसरणिचरा भूर्भुवस्स्वःप्रकाशा
यद्भ्रान्त्या सम्भ्रमन्ति प्रवहपदसमालम्बिनो मूर्तिभाजः ।
यद्भ्रूभङ्गक्षणेन स्थितिजननलयाः संविभूतेर्गुणानां
तद्रूपं मे हृदब्जे विकसतु सततं सच्चिदानन्दमाद्यम् ॥
इङ्गुण्डीयकुलावतंसविबुधग्रामाभिरामाग्रणीः
श्रीहट्टंससमाह्वयो व्यरचयद्ग्रन्थं स्वनामाभिधम् ।
रेखाख्ये गणिते स्वदेशवचसा तं देववाण्याधुना
वक्ष्ये विज्ञमुदे सहायमवलम्ब्योवेष्टनं साहवम् ॥

तत्रादौ परिभाषा—
यः पदार्थो लक्षयितुं शक्यः परिमाणस्थूलत्वदैर्घ्यविस्तारराहितः स बिन्दुः ।
यः पदार्थो दीर्घो विस्तारस्थूलत्वाभ्यां रहितः स रेखाशब्दवाच्यः ।
यः पदार्थो विस्तारदैर्घ्ययुक्तः स्थूलत्वरहितः स धरातलशब्दवाच्यः ।
यः पदार्थो विस्तारदैर्घ्यस्थौल्ययुक्तस्स एव स्थूलपदार्थः ।
अथ रेखा त्रिविधा—सरला, वक्रा, मिश्रा च ॥

* * * *

अथ प्रमेयोपपाद्यम् । तत्र प्रथमं त्रिभुजद्वये एकस्य त्रिभुजस्य भुजद्वयं तदन्तर्गतकोणः अन्यत्रिभुजस्य भुजद्वयेन तदन्तर्गतकोणेन यदि समानः, तदा ते द्वे त्रिभुजे समाने भवतः ॥

* * * *

**Colophon:**

इति श्रीक्षेत्रतत्त्वदीपिकायां प्रमेयोपपाद्ये प्रकाशः द्वितीय(प्रथमः) ॥
एकोनचत्वारिंशत्तमम् ।

**End:**

तत्र कल्पित(क-ख-ग-घ)समकोणायतचतुर्भुजसमानं वर्गक्षेत्रं कर्तव्यमस्ति ।

For Private and Personal Use Only

तद्यथा—तच्चतुर्भुजस्य(क-ख)भुजः तथा वर्धनीयः यथा(ख-ङ)वर्धित-भागः(ख-ग)भुजतुल्यः स्यात् । (क-ङ)रेखां व्यासं कृत्वा वर्धित(ख-ग)रेखायाः (च)चिह्नगतं वृत्तं कार्यम् । तदा(ख-च)रेखाकल्पित(ख-घ)समकोणायतचतुर्भुजेन तुल्यस्य ईप्सित(ख-च-छ-झ)समकोणसमचतुर्भुजस्य भुजो भविष्यति ॥

(८७) . )(७७) इदमेवेष्टम् ॥

३२




ख्यातो जर्मनिजातिजीवनजनिप्रोल्लासने भास्करः
श्रीमान् ट्रीयरसाहेबोऽत्र कलिकातायां गिरागारपः ।
श्रीहट्टंसकृतौ स्थितं सुगणितं रेखाभिधं यत्परं
तद्गीर्वाणवचोनिरूपणविधावाज्ञप्तवान् मां पुरा ॥
श्रीयोगध्यानमिश्रो व्यरचयदमलां क्षेत्रतत्त्वप्रबोधे
सत्पात्रे स्नेहपूर्णां सुगणितरचनावर्तिकां चित्ररूपाम् ।
रेखाविज्ञानवेश्मद्युतिनिचयकरीं तद्भवाज्ञानजाल-
ध्वान्तघ्नीं तन्मदान्धप्रमदशलभहां दीपिकां विज्ञतुष्ट्यै ॥

**Colophon:**

इति श्रीक्षेत्रतत्त्वदीपिकायां वस्तूपपाद्यं नाम पञ्चमः प्रकाशस्समाप्तः ॥
समाप्तं चेदं प्रकरणम् ॥

The scribe adds—

भावनामसंवत्सरमाघशुक्लपञ्चमीबुधवासररेवतीनक्षत्रदिवसमध्याह्ने एतत्कोश-लिखितं सम्पूर्णं हारीतकृष्णरायेण ॥

---

## No. 13405. खेटतन्त्रम्, आन्ध्रटीकासहितम्.

## KHĒṬATANTRAM WITH TELUGU MEANING.

Substance, palm-leaf (Śrītāla). Size, 10½ × 2¼ inches. Pages, 42. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance new.

668A

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Contains the following Adhikāras :—

२. ग्रहमध्याधिकारः (colophon only).

३. स्फुटाधिकारः.

५. वैधृत्यादिनिरूपणम्.

६. चन्द्रग्रहणाधिकारः.

७. सूर्यग्रहणाधिकारः.

A work in astronomy by Nandisūri with Telugu meaning.

**Colophon :**

इति नन्दिसूरिविरचिते खेटतन्त्रे ग्रहमध्यगत्याधिकारो नाम द्वितीयोऽध्यायः ॥

अथ स्फुटाधिकारं वक्ष्ये ॥ . . . . . . . . .

हयमद्रिभुवः कला रवेः ॥ . . . . . . . . .

क्षितिसूनोः श्रुतयो दिशो यमौ ॥ . . . . . . .

तुरगा दशतारका विदः ॥ . . . . . . . . .

पवना भूमियमानखा गुरोः ॥ . . . . . . . .

भृगुजस्य यमौ नवेन्दवः ॥ . . . . . . . .

मुनयोङ्ग्यमान . . . . . . ॥ . . . . . . .

मृदुतुङ्गा भवनादय(ः) स्मृताः ॥ . . . . . . .

**End :**

अर्धादूने स धूम्रं स्यात्कृष्णमर्धाधिकं भवेत् ।
विमुञ्चतः कृष्णताम्रं कपिलं सकलं ग्रहे ॥

**Colophon :**

इति नन्दिसूरिविरचिते खेटतन्त्रे सूर्यग्रहणं नाम अष्टमोऽध्यायः ॥

रविमन्दपदकानि लिख्यन्ते—

१. २. २०. २. २०. २. १८.
२. ४. ४०. २. १९. २. १७.
३. ६. ५९. २. २०. २. १७.
४. ९. १९. २. १८. २. १७.

*　　*　　*

२३. ४५८. अ. १. ग. ०. ०.
२४. ४६९. अ. ०. ग. ०. ०.

शनिमान्दं समाप्तम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रवेर्लक्षपदकम्—

लक्ष, तस्मै मान्यो न काली ॥
अयुतम्, तुङ्गो यज्ञस्तुत्यो भानुः ॥
सहस्र, अयं तुङ्गो शूरो हि ॥
शत, सङ्गगङ्गा हि नीला ॥
दश, रुद्रपशूधनज्ञः ॥
एकपदम्, जनेधर्मः ॥
गतध्रुवम्, दीरोधारोखरपुण्यम् ॥

* * * *

राहो(:)—

लक्ष, पुरा भर्गो हि स्कन्दः ॥
अयुतम्, चन्द्र . . . . . . ॥
सहस्र, धनी धर्मोक्रूरोऽयम् ॥
शत, शशी सेव्यो मे ॥
दश, सेवा कलौ ॥
एक, पुण्याङ्गः ॥
गतध्रु, तुङ्गागोमेगिराहिनो ॥

---

No. **13406**. खेटतन्त्रम्, आन्ध्रटीकासहितम्.

KHĒṬATANTRAM WITH TELUGU MEANING.

Substance, palm-leaf. Size, 18½ × 1⅝ inches. Pages, 20. Lines, 7 on a page. Character, Grantha and Telugu. Condition, good. Appearance, new.

Begins on fol. 3*a*. The other works herein are Saṁvatsaradaśāphala 1*a*, Mantrapraśna 13*a*.

Wants the beginning and the end.

Similar to the above. There is no authority for the name given to this work excepting that it is so stated in the top of the MS.

Date : 1747 to 1807 A.D.

**Beginning :**

षष्टिरेक + (षष्टिरेकविंशतिगुणितं व्यपगतसंवत्सरेण सं) मिश्रम् ।
नवगगनाब्धिसमेतं शक(नृपकालं विजानीयात् ॥)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शकाब्दं नवशैलेन्दुगुणयुक्कलिवत्सराः ।
शाको वेदाद्रिविश्वानो मासघ्नो मासयुक् त्रिधा ॥
नताहियुक्तस्तुत्याधिलब्धहीनोऽष्टसंयुतः ।
द्विघ्नो मातापसंयुक्तः दिनीकृत्यो दिनान्वितः ॥
* * * *
तदावाप्तफलं योज्यं ज्याखण्डे गतसंज्ञिकाः ।
ग्रहशोध्यम् ॥ शुभाङ्गे । नागोऽसौ । मान्यं पुण्यम् ।
* * * *
कुलेन रम्यो . . . . . . . . पुण्यो मे गोलके प्राज्ञ । धीरसङ्गो भद्रसेनः ॥

रविमन्दपदकम् ॥

१. ९. अ. ८. ग. ७. लिप्ति. ६.
२. १७. अ. ९. ग. ७. ९.
३. २६. अ. ८. ग. २. ६.
४. ३४. अ. ९. ग. २. २१.
* * * *
२३. ४१८. अ. १. ग. ०. ०.
२४. ४६९. अ. ०. ग. ०.

इति शनिमान्दपदकस्समाप्तः ॥

रवेर्लक्षपदम् ॥

. . . . . तस्मिन्मान्योनकाली ।
अयुत, तुङ्गो यज्ञस्तुत्यो भानुः ।
स, अयं तुङ्गो शूरो हि ।
श, सङ्गगङ्गाहिनता (नीला) ।

**End:**

राहोर्लक्षपदम् ॥

पूर्वो भर्गो हि स्कन्दः ।
* * * *
प, पुण्याङ्गम् ।
गतध्रुवम्, तुङ्गाङ्गो मे गिरा हीनः ।
* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13407. गणितप्रकाशिका, आन्ध्रटीकासहिता.
## GAṆITAPRAKĀŚIKĀ WITH TELUGU MEANING.

Substance, paper. Size, 9 × 6 inches. Pages, 10. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Līlāvatī 6*a*.

Complete.

An alphabetical list of mathematical words with meaning in Telugu.

**Beginning:**

अङ्कम्, अङ्कपाशम्, अङ्गुलम्, अन्तम्, अंशम्, अंशसवर्णनम्, अन्त्यम्, अन्तरम्, अघनम्, अजः, अजिनः, अणुधान्यम्, अतिधृतिः, अनणुधान्यम्, अन्वितम्, अनुबन्धम् ।

**End:**

क्षुण्णम्, क्षेत्रम्, क्षेपम्, क्षिप्तम् ॥

---

## No. 13408. गणितसारसङ्ग्रहः, सटीकः.
## GAṆITASĀRASAṄGRAHAḤ WITH COMMENTARY.

Pages, 105. Lines, 27 on a page.

Begins on fol. 1*a* of the MS. described under No. 5174.

Contains the Vyavahāras one to four complete and the first stanza of the fifth Vyavahāra.

A work in arithmetic and mensuration, by a Jaina named Mahāvīrācārya. A critical edition of the work with its English translation has been brought out as a publication of this Library.

**Beginning:**

प्रणिपत्य वर्धमानं विद्यानन्दं विश्वगुणनिलयम् ।
सूरिं च महावीरं कुर्वे तद्गणितशास्त्रसद्वृत्तिम् ॥
अलङ्घ्यं त्रिजगत्सारं यस्यानन्तचतुष्टयम् ।
नमस्तस्मै जिनेन्द्राय महावीराय तायिने ॥

यस्य त्रिजगत्सारं निरावरणत्वादनन्यसाधारणत्वाच्च लोकत्रयसारं त्रिजगद्भव्याराध्यमित्यर्थः । अनन्तचतुष्टयम् अनन्तदर्शनज्ञानसुखवीर्याणि च । अलङ्घ्यम् आप्ताभासागम्यमतल्लभ्यमस्ति । तायिने धर्मोपदेशत्वेन भव्यत्राणाय तस्मै महावीराय वर्धमानस्वामिने जिनेन्द्राय एकदेशेन कर्मारातीन् जयन्तीति जिना असंयतसम्यग्दृष्ट्याद्यस्तेषामिन्द्रः स्वामी तस्मै नमः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सङ्ख्याज्ञानप्रदीपेन जैनेन्द्रेण महात्विषा ।
प्रकाशितं जगत्सर्वं येन तं प्रणमाम्यहम् ॥

जैनेन्द्रेण जिनप्रणीतेन महात्विषा बहुप्रकाशेन येन सङ्ख्याज्ञानप्रदीपेन 'गणितशास्त्रज्योतिषा सर्वं षड्द्रव्यसमुदायरूपं जगत्प्रकाशितं तमहं प्रणमामि ।

प्रीणितः प्राणिसस्यौघैः नीरीतिर्निरवग्रहः ।
श्रीमतामोघवर्षेण येन स्वेष्टहितैषिणा ॥

* * * *

पापरूपाः परा यस्य चित्तवृत्तिहविर्भुजि ।
भस्मसाद्भावमीयुस्तेऽवन्ध्यकोपो भवेत्ततः ॥

* * * *

वशीकुर्वन् जगत्सर्वं स्वयं नानुवशः परैः ।
नाभिभूतः प्रभुस्तस्मात् अपूर्वमकरध्वजः ॥

* * * *

यो विक्रमक्रमक्रान्तचक्री चक्रकृतक्रियः ।
चक्रिकाभञ्जनो नाम्ना चक्रिकाभञ्जनोऽञ्जसा ॥

* * * *

यो विद्यानद्यधिष्ठानो मर्यादावज्रवेदिकः ।
रत्नगर्भो यथाख्यातचारित्रजलधिर्महान् ॥

* * * *

विध्वस्तैकान्तपक्षस्य स्याद्वादन्यायवेदिनः ।
देवस्य नृपतुङ्गस्य वर्धतां तस्य शासनम् ॥

* * * *

लौकिके वैदिके वापि तथा सामयिकेऽपि यः ।
व्यापारस्तत्र सर्वत्र सङ्ख्यानमुपयुज्यते ॥

* * * *

कामतन्त्रेऽर्थशास्त्रे च गान्धर्वे नाटकेऽपि वा ।
सूपशास्त्रे तथा वैद्ये वास्तुविद्यादिवस्तुषु ॥

* * * *

छन्दोऽलङ्कारकाव्येषु तर्कव्याकरणादिषु ।
कलागुणेषु सर्वेषु प्रस्तुतं गणितं परम् ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूर्यादिग्रहचारेषु ग्रहणे ग्रहसंयुतौ ।
त्रिप्रश्ने चन्द्रवृत्तौ च सर्वत्राङ्गीकृतं हि तत् ॥

* * * *

द्वीपसागरशैलानां सङ्ख्याव्यासपरिक्षिपः ।
भवनव्यन्तरज्योतिर्लोककल्पाधिवासनाम् ॥

* * * *

नारकाणां च सर्वेषां श्रेणिबन्धेन्द्रकोत्कराः ।
प्रकीर्णकप्रमाणाद्या बुध्यन्ते गणितेन ते ॥

* * * *

प्राणिनां तत्र संस्थानमायुरष्टगुणादयः ।
यात्राद्याः संहिताद्याश्च सर्वे ते गणिताश्रयाः ॥

* * * *

बहुभिर्विप्रलापैः किं त्रैलोक्ये सचराचरे ।
यत्किञ्चिद्वस्तु तत्सर्वे गणितेन विना न हि ॥
तीर्थकृद्भ्यः कृतार्थेभ्यः पूज्येभ्यो जगदीश्वरैः ।
तेषां शिष्यप्रशिष्येभ्यः प्रसिद्धाद्गुरुपर्वतः ॥
जलधेरिव रत्नानि पाषाणादिव काञ्चनम् ।
शुक्तेर्मुक्ताफलानीव सङ्ख्यानीव(ज्ञान)महोदधेः ॥
किञ्चिदुद्धृत्य तत्सारं वक्ष्येऽहं मतिशक्तितः ।
अल्पं ग्रन्थमनल्पार्थं गणितं सारसङ्ग्रहम् ॥
संज्ञाम्भोभिरथो पूर्णे परिकर्मोरुवेदिके ।
कलासवर्णसंरूढलुठत्पाठीनसङ्कुले ॥

* * * *

प्रकीर्णकमहाग्राहे त्रैराशिकतरङ्गिणि ।
मिश्रकव्यवहाराद्यत्सूक्तिरत्नांशुपिञ्जरे ॥

* * * *

क्षेत्रविस्तीर्णपाताले खाताद्यसिकताकुले ।
करणस्कन्धसम्बन्धच्छायावेलाविराजिते ॥
गणकैर्गुणसम्पूर्णैस्तदर्थमणयोऽमलाः ।
गृह्यन्ते करणोपायैः सारसङ्ग्रहवारिधौ ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न शक्यतेऽर्थो बोद्धुं यत् सर्वस्मिन् संज्ञया विना ।
अदावतोऽस्य शास्त्रस्य परिभाषाभिधास्यते ॥
* * * *

**Colophon :**

इति सारसङ्ग्रहे गणितशास्त्रे महावीराचार्यस्य कृतौ प्रथमो व्यवहारः समाप्तः ॥

इति कृतौ सकलासवर्णो नाम द्वितीयव्यवहारः समाप्तः ।

इति कृतौ प्रकीर्णको नाम तृतीयव्यवहारः ॥

**End :**

पञ्चाष्टत्रिहस्तव्यासायामोदयायामेकस्यां वाप्यां षड्वाहप्रमाणं जलं दृष्टम्, सप्तषष्टिपञ्चहस्तव्यासायामोदयासु नवसु वापीषु जलं कियद्भवति । अत्र स्थित-षडङ्कलाभमन्यस्थानं नीत्वा लघुराशिना महाराशौ भक्ते 7/5, 60/8, 5/3, 9/16, लब्धजलवाहः 945 एवं त्रिपञ्चसप्तनवराशिकाः ॥

**Colophon :**

इति सारसङ्ग्रहे गणितशास्त्रे महावीराचार्यस्य कृतौ त्रैराशिकं नाम चतुर्थ-व्यवहारः ॥

पूर्वछन्ती सव्याख्यानं समाप्तम् ॥
प्राप्तानन्तचतुष्टयान् भगवतस्तीर्थस्य कर्तॄन् जिनान्
सिद्धान् शुद्धगुणान् त्रिलोकमहितानाचार्यवर्यानपि ।
सिद्धान्तार्णवपारगान् भवभृतो नेतॄनुपाध्यायकान्
साधून् सर्वगुणाकरान् हितकरान् वन्दामहे श्रेयसे ॥

## No. 13409. गणितसारसङ्ग्रहः.
## GAṆITASĀRASAṄGRAHAḤ.

Pages, 34. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 5170.

Breaks off in the second Vyavahāra.

Same work as the above.

## No. 13410. गणितसारसङ्ग्रहः कर्णाटकटीकासहितः.
## GAṆITASĀRASAṄGRAHAḤ WITH KANARESE MEANING.

Substance, (Śrītāla). Size, 17¾ × 1¾ inches. Pages, 50. Lines, 7 on a page. Character, Kanarese. Condition, good. Appearance, old.

Contains the Vyavahāras 1 to 4.

Same work as the above and with meaning in Kanarese.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13411. गणितसारसङ्ग्रहः, कर्णाटकटीकासहितः.
## GAṆITASĀRASAṄGRAHAḤ WITH KANARESE MEANING.

Substance, palm-leaf. Size, $13\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 56. Lines, 6 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Contains up to Bhāgahāra in the Parikarmavyavahāra. Pages, 29 to 59 are found written throughout in Kanarese.

Same work as the above

## No. 13412. गणितसारसङ्ग्रहः, सव्याख्यः.
## GAṆITASĀRASAṄGRAHAḤ WITH COMMENTARY.

Substance, paper. Size, $13\frac{1}{2} \times 8\frac{1}{2}$ inches. Pages, 234. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Contains the Vyavahāras 1 to 4 only.

Same work as the above.

## No. 13413. गणितसारसङ्ग्रहः, कर्णाटकटीकासहितः.
## GAṆITASĀRASAṄGRAHAḤ WITH KANARESE MEANING.

Substance, paper. Size, $13\frac{1}{2} \times 8\frac{1}{2}$ inches. Pages, 364. Lines, 20 on a page. Character, Dēvanāgarī and Kanarese. Condition, good. Appearance, new.

Contains the fifth Vyavahāra only.

This is the 2nd volume of the work described above. The Kanarese commentary is designated as Bālabōdhinī, and its author is Daivajña-vallabha.

## No. 13414. गणितसारसङ्ग्रहः, कर्णाटकटीकासहितः.
## GAṆITASĀRASAṄGRAHAḤ WITH KANARESE MEANING.

Substance, palm-leaf. Size, $9\frac{3}{4} \times 1\frac{5}{8}$ inches. Pages, 260. Lines, 6 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Incomplete.

Same work as the above. It is accompanied with Ṭīkā (meaning) in Kanarese which is called Bālabōdha. The name of the author of the work is Daivajñavallabha.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

सिद्धेभ्यो निष्ठितार्थेभ्यो वरिष्ठेभ्यः कृतादरः ।
अभिप्रेतार्थसिद्ध्यर्थं नमस्कुर्वे पुनः पुनः ॥
इतः परं क्षेत्रव्यवहारषष्ठगणितमुदाहरिष्यामः ॥

तद्यथा—

क्षेत्रं जिनप्रणीतं फलाश्रयाद्व्यावहारिकं सूक्ष्ममिति ।
भेदाद्द्विधा विचिन्त्य व्यवहारं स्पष्टमेतदभिधास्ये ॥

* * * *

त्रिभुजचतुर्भुजवृत्तक्षेत्राणि स्पष्टभेदभिन्नानि ।
गणितार्णवपारगतैराचार्यैः सम्यगुक्तानि ॥

* * * *

त्रिभुजं त्रिधा . . . नं चतुर्भुजं पञ्चधाष्टधा वृत्तम् ।
अवशेषक्षेत्राणि ह्येतेषां भेदभिन्नानि ॥

* * * *

**Colophon:**

इति करणानुयोगशास्त्रदैवज्ञवल्लभाख्येन विरचिते क्षेत्रगणिते सूक्ष्मफलाध्यायस्य वर्णो एकादशीयभाषामयटीकायां बालबोधाख्या सम्पूर्णः(र्णा) ॥

**End:**

पञ्चकृतेर्वर्गो दशगुणितः करणिर्भवेदिदं सूक्ष्मम् ।
स्थूलमपि पञ्चसप्ततिरेतत्को वृत्तविष्कम्भः ॥

---

## No. 13415. गणितसारसङ्ग्रहः, कर्णाटकटीकासहितः.

## GAṆITASĀRASAṄGRAHAḤ WITH KANARESE MEANING.

Substance, paper. Size, 8¾ × 6½ inches. Pages, 311. Lines, 19 on a page. Character, Kanarese. Condition, good. Appearance, new.

Text complete; but the Vyavahāras five to eight only are accompanied with meaning in Kanarese.

Same work as the above.

---

## No. 13416. ग्रहभाष्यम्.

## GRAHABHĀṢYAM.

Substance, palm-leaf. Size, 8½ × 1¼ inches. Pages, 6. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Contains the first Adhyāya complete.

This treatise purports to give the duration of time of the influence of each of the 28 constellations including the constellation called Abhijit, of each of the nine planets and of each of the 7 days of a week.

**Beginning:**

विनायक नमस्तुभ्यं सततं मोदकप्रिय ।
अविघ्नं कुरु ते(मे)देव सर्वकार्येषु सर्वदा ॥
ग्रहभाष्यमिदं शास्त्रं विचित्रं लोकपूजितम् ।
अष्ट(ा)विंशतिऋक्षाणां नवानां तु ग्रहं तथा ॥

* * * *

सर्वेषां घटिका नित्यं नव भागानि निर्णयेत् ॥
आदित्यचन्द्रभौमश्च सौम्यश्च गुरुशुक्रयोः ।
मन्दान्तं सप्त वाराणि एतेषु दिननिर्णयम् ॥

**End:**

भृगोः ॥

हेमवस्त्रा . . . . . . गन्धानुलेपनम् ।
मृष्टान्नभोजनं प्राप्तं शुक्रनाड्य(ाः) फलं भवेत् ॥
वारवर्गफलं दृष्ट्वा राजराजन्यस्य पूजितम् ।
फलाफलमिदं पृच्छन् सर्वकर्म प्रशस्यते ॥

**Colophon:**

इति ग्रहभाष्ये प्रथमोऽध्यायः ॥

---

No. **13417**. ग्रहलाघवम्, सव्याख्यानम्.

GRAHALĀGHAVAM WITH COMMENTARY.

Pages, 171. Lines, 30 on a page

Begins on fol. 1*a* of the MS. described under No. 13397.

Complete.

Same text as that described under R. No. 913 of the Triennial Catalogue of MSS., Vol. II, Part I-A. By Gaṇēśa of Nandigrāma and son of Kēśava of Kauśikagōtra. The commentary is by Mallāri, son of Divākara of Gōlagrāma on the banks of the Gōdāvari.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

श्रीगणेशदैवज्ञकृतो ग्रहलाघवाख्यतन्त्रः श्रीमल्लारिकृतोपपत्तिव्याख्यानयुता लिख्यते ।

यथा —

नाके नाकेशमुख्यास्सुरवरनिवहास्सन्ति येऽनन्तसङ्ख्याः
नाख्याऽया(मा)ख्या(त्य)मीषां[ख्या] कथमपि च मनःपूर्वकं वाक्मदीया ।
पङ्कं(एकं)हित्वैकदन्तं सकलसुराशेरस्सङ्घसङ्घर्षिताङ्घ्रि
शीघ्रं भक्तेष्टसिद्धिप्रदमिह हि सुरं सादरं तं नमामि ॥

मल्लारिं कुलनायकं रविमुखान्खेटांश्च नत्वा गुरोः
स्मृत्वा पादयुगं ह्यवाप्य च ततः किञ्चित्सुबोधात्मकम् ।
मल्लारिर्ग्रहलाघवस्य कुरुते टीकां लसद्वासनां
यस्मादल्पमतिश्च कुण्ठितमतिस्स्यात्पूर्ववैचित्र्यतः ॥
मध्यस्फुटास्तोदयवक्रपूर्वं कर्माखिलं यद्गणिते खगोत्थम् ।
जीवाधनुर्ना(स्सं)श्रयकं विना ते न स्यादयं निश्चयमेव गोले ॥
कथमत्र कृतं विना धनुर्ज्ये खरकर्माखिलमल्पकर्मणा ।
उपपत्तिविचारणाविधौ गणका मन्दधियो विमोहिताः ॥
तस्माद्वच्म्युपपत्तिमस्य विमलां तन्मोहनाशाय तां
ज्ञात्वा मे मतिकौशलं सुविगलं पश्यन्तु तुष्यन्तु ते ।
हे वर्या गणका विलोक्य यदिहाशुद्धं च संशोध्यतां
किं वा प्रार्थनया परोपकृतिषु स्वाभाविकस्तद्गुणः ॥

* * * *

अथ श्रीमज्जलधिनिकटस्थितनानोपवनविराजितनन्दिग्रामाभिधाननगरनिवासी सकलभूपतिसेवितचरणयुगलकमलः गणिताटवीविघटनपटुतराखिलदैवविन्मातङ्गकुम्भपाटनोत्कण्ठकण्ठीरवः श्रीमदुमारमणचरणद्वयपङ्कजाप्तमहामतिवैभववेदवित्केशवदैवज्ञात्मजः गणेशदैवज्ञवर्यः ग्रहलाघवाख्यं ग्रहकरणं चिकीर्षुः तत्रादौ निर्विघ्नेन ग्रन्थसमाप्तिप्रचयगमनाभ्यां

* * * *

वस्तुनिर्देशरूपमङ्गलसहितं ग्रन्थारम्भं वसन्ततिलकवृत्तेनाह—

(मू) ज्योतिःप्रबोधजननी परिशोध्य चित्तं तत्सूक्तकर्मचरणैर्गहनार्थपूर्णा ।
स्वल्पाक्षरापि च तदंशकृतैरुपायैर्व्यक्तीकृता जयति केशववाक्छ्रुतिश्च ॥

(व्या) श्रुतिः वेदः सर्वोत्कर्षेण वर्तते । तां विशेषणद्वारा स्तौति । किंविशिष्टा । केशवस्य विष्णोर्वाक् । यस्य निश्वसितं वेदा इत्युक्तत्वात् । .

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



. . . गहना अर्थपूर्णा स्वल्पाक्षरा च । तदंशाः तच्छिष्याः । तैः कृता ये उपायाः टीकाद्याः । तैः प्रकटीकृता ॥

अथ यथार्थभक्तैः रामस्मरणं कर्तव्यम्, गणकैः करणस्मरणं कर्तव्यमित्यादि विषमवृत्तेनाह—

(मू) परिभग्नसमौर्विकेशचापं दृढगुणहारलसत्सुवृत्तबाहुम् ।
सुफलप्रदमात्तसप्रभं तत् स्मर रामं करणं च विष्णुरूपम् ॥

(व्या) . . . . . . . . . . . . . . . . .

(मू) यद्यप्यकार्षुरुरवः करणानि धीरा-
स्तेषु ज्यकाधनुरपास्य न सिद्धिरस्मात् ।
ज्याचापकर्मरहितं सुलघुप्रकारं
कर्तुं ग्रहप्रकरणं स्फुटमुद्यतोऽस्मि ॥

(व्या) . . . . . . . . . . . . . .

(मू) द्व्यब्धीन्द्रो १४४२ नितशक ईश ११ हृत्फलं स्या-
च्चक्राख्यं रवि १२ हतशेषकं च युक्तम् ।
चैत्राद्यैः पृथगमुतस्सदृग्घ्र २ चक्रा-
द्दि १० ग्युक्तादमर ३३ फलाधिमासयुक्तम् ॥
खात्रि ३० घ्नं गततिथियुङ्निरग्रचक्रा-
ङ्गांशाढ्यं ६ पृथगमुतोऽब्धिषट्क ६४ लब्धैः ।
ऊनाहैर्वियुतमहर्गणो भवेद्वै
वारस्स्याच्छर ५ हतचक्रयुग्गणोऽब्जात् ॥

End :

(अव) अथ ग्रन्थालङ्कारमाह—

(मू) पूर्वे प्रौढतराः क्वचित्किमपि यच्चक्रुर्धनुर्ज्ये विना
ते तेनैव महातिगर्वकुभृदुच्छृङ्गेऽधिरोहन्ति हि ।
सिद्धान्तोक्तमिहाखिलं लघु कृतं हित्वा धनुर्ज्ये मया
तद्गर्वो मयि मास्तु किं न तदहं तच्छास्त्रतो वृद्धधीः ॥

(अव) स्वस्थितिनामादीनि कथयति—

(मू) नन्दिग्राम इहापरान्तविषये शिष्यादिगीतस्तुति-
र्योऽभूत्कौशिकगोत्रजः सकलसच्छास्त्रार्थवित्केशवः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूनुस्तस्य तदङ्घ्रिपद्मभजनाल्लब्धावबोधांशकः
स्पष्टं वृत्तविचित्रमल्पकरणं चैतद्गणेशोऽकरोत् ॥

**Colophon:**

(व्या) . . . . . . . . . . . . . . . .

देशे सार्थसमाह्वयेऽतिरुचिरे तीरे च गोदोत्तरे
गोलग्रामपुरे पुरारिचरणार्चासक्तविद्वद्वृते ।
आसीत्तत्र दिवाकरोऽतिचतुरो दैवज्ञसङ्घाग्रणी-
र्विश्वेशः सततं यदीयहृदये यस्तस्य पुत्रोऽकरोत् ॥
मल्लारिर्गणकाग्रणीर्गुरुपदद्वन्द्वस्य भक्तेरतो
लब्ध्वा बोधलवस्ततो हि विवृतिं सार्थोपपत्तिं स्फुटम् ।
कर्णस्य ग्रहलाघवस्य गणकश्रीमद्गणेशाभिध-
प्रोक्तस्याथ विलोकयन्तु सुधियः पश्यन्तु तुष्यन्तु माम् ॥

The scribe adds—

बाणोनाभिकतः कुरामविहृतान्मूलं हि मासास्त्रयु-
ग्बाणैर्भाश्च दशोनितं दिनमिति तस्यादलस्यावधिः ।
पक्षस्यात्तिथिसम्मितोऽखिलयुतिः सप्ताब्धितिथ्यन्विता
हेनाख्ये गणकालिलेख च तदा टीकां पराधस्त्विमाम् ॥
अङ्गभाद्रिशशाङ्क १७८६ शाकरुधिरोद्गार्यब्दके सौम्यगे
गोले पूषणि ज्येष्ठकृष्णचवतीशुक्रोत्तराषाढभे ।
हारीतान्वयजो लिलेख गणकानन्दाख्यकोशं स्वकं
श्रीमद्वेङ्कटकृष्णरायगणको दैवज्ञवृन्दै स्फुटम् ॥

---

## No. 13418. ग्रहलाघवसारिणी.

## GRAHALĀGHAVASĀRIṆĪ.

Substance, paper. Size, 13½ × 6⅞ inches. Pages, 37. Lines, 14 on a page. Character, Dēvanāgarī. Condition, fair. Appearance, old.

Incomplete.

This is a short work based on the Grahalāghava of Gaṇēśa, son of Kēśava; by Prēmamiśra. It was composed in Śaka 1578, i.e., 1656 A.D. at Madhupura. It consists of two portions: Kriyā and Krama. The former contains nine stanzas and the latter consists of astronomical

For Private and Personal Use Only

tables. At the beginning five stanzas (introductory) and the Saṃskārāṇi (three verses) are extracted from the Grahalāghava. According to one of the stanzas the date of the Grahalāghava is given as Śaka 1442, corresponding to 1520 A.D.

**Beginning:**

ज्योतिःप्रबोधजननी परिशोध्य चित्तं तत्सूक्तकर्मचरणैर्गहनार्थपूर्णा ।
स्वल्पाक्षरापि च तदंशकृतैरुपायैर्व्यक्तीकृता जयति केशववाक् श्रुतिश्च ॥

* * * *

इति संस्काराणि ॥

अथ प्रेममिश्रकृतग्रहलाघवसारिणीमाह । उक्तं च—

नत्वा गणेशस्य पदारविन्दं हरिं च सूर्यप्रमुखान् ग्रहांश्च ।
प्रेमो प्र(ग्र)हार्थं ग्रहलाघवस्य लघुक्रियां सारणिकां प्रकुर्वे ॥
अहर्गणं श्रीग्रहलाघवोक्तं कृत्वा बुधैः खाग्नि ३० मितैर्विभाज्यम् ।
लब्धं पुनर्द्वादश १२ भिर्विभज्य शेषास्त्रयोऽङ्का ध्रुवसंज्ञकास्स्युः ॥

* * * *

गजाद्रीषुचन्द्रै १५७८ मिते शाककाले द्वितीया २ रवौ मासपौषे च शुक्ले ।
नगर्यामघोः श्रीगणेशप्रसादात् सुधीः प्रेमनामाकरोत्सारिणीं हा ॥

**Colophon:**

इति श्रीप्रेममिश्रकृतौ ग्रहलाघवस्य सारिणीक्रियाविवरणं समाप्तम् ॥

अथ सारिणीक्रमो लिख्यते—

चक्राहर्गणाः ४०१९ त्रिंशत्शेषाङ्काः

| 0 | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 | 10 | 11 | 12 | 13 | 14 | 15 | 16 | 17 | 18 | 19 | 20 | 21 | 22 | 23 | 24 | 25 |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | [illegible] |
| 0 | 0 | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 | 10 | 11 | 12 | 13 | 14 | 15 | 16 | 17 | 18 | 19 | 20 | 21 | 22 | 23 | 24 |
| [illegible] | 59 | 58 | 57 | 56 | 55 | 54 | 53 | 52 | 51 | 50 | 49 | 48 | 47 | 46 | 4[illegible] | [illegible]4 | 43 | 42 | 41 | 40 | 39 | 38 | | | |
| 8 | 8 | 16 | 24 | 32 | 40 | 49 | 57 | 5 | 13 | 21 | 29 | 38 | 46 | 2 | 10 | 18 | 27 | 35 | 43 | 51 | 59 | 7 | 26 | 24 | 32 |
| 10 | 10 | 20 | 31 | 41 | 51 | 1 | 12 | 22 | 3[illegible] | 43 | 53 | 3 | 13 | 23 | 34 | 44 | 54 | 5 | 15 | 25 | 36 | 46 | 56 | 7 | 17 |

**End:**

| 61 | 62 | 63 | 64 | 65 | 66 | 67 | 68 | 69 | 70 | 71 | 72 | 73 | 74 | 75 | 76 | 77 | 78 | 79 | 80 | 81 | 82 | 83 |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| 20 | 21 | 21 | 21 | 21 | 21 | 21 | 22 | 22 | 22 | 22 | 22 | 22 | 23 | 23 | 23 | 23 | 23 | 23 | 23 | 23 | 23 | 23 |
| 49 | 2 | 14 | 26 | 37 | 48 | | 18 | 18 | 27 | 3[illegible] | 4[illegible] | 52 | 0 | 7 | 14 | 20 | 29 | 31 | 37 | 41 | 44 | 48 |
| 56 | 22 | 48 | 5 | 24 | 42 | 45 | 49 | 52 | 13 | [illegible] | 44 | 54 | 24 | 55 | 10 | 23 | 39 | 27 | 17 | 7 | 37 | 5 |



Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13419. ग्रहस्फुटम्, आन्ध्रटीकासहितम्.
## GRAHASPHUṬAM WITH TELUGU MEANING.

**Pages**, 3. **Lines**, 24 on a page.

Begins on fol. 84*a* of the MS. described under No. 13397.

Incomplete.

This work lays down the method of finding out the exact position of each of the nine planets on a specified day.

**Beginning:**

खरसा (६०) ऋषिनेत्रघ्न(।): (२७) गतवत्सरसंयुता: ।
नन्दाभ्रभूमि (१०९) भिर्युक्ता भवेयु: शकवत्सरा: ॥
धूसीकालयुतं शाकं कल्यब्दमिति कथ्यते ।
चरभयरहितं शकस्य वर्षं शककुलशङ्कुशताण्डसंभ्रवृद्धम् ।
सह यदि गणयेत्तदादि शुक्रात नतु मृगवानभयेन राजचापै: ॥
कल्याद्यहर्गणैर्योज्यं मासवाक्यं तत: क्रमात् ।
इच्छादिनेन संयुक्त: शुक्रताराद्यहर्गण. ॥

**End:**

रविस्फुटम्—

गतमासं गतदिनं स्थाप्य संक्रान्तिशेषकम् ।
निशासंक्रमणे युञ्ज्याद्दिवासंक्रमणे त्यजेत् ॥
तत्तु योग्यादिवाक्योनं सूर्यस्फुटमितीरितम् ।
चन्द्रं स्थाप्य रविं त्यक्त्वा योजयित्वा च षष्टिघाम् ॥
शशाङ्कस्य गतौ सूर्यगतिं त्यक्त्वा प्रयुज्य च ।
एताभ्यां विहतौ पूर्वौ तिथियोगौ भविष्यत: ॥

---

## No. 13420. चरणाध्याय:.
## CARAṆĀDHYĀYAḤ.

**Substance**, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{3}{8}$ inches. **Pages**, 4. **Lines**, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 23*a*. The other works herein are Dāmōdarīya 1*a*, Ravyādicakra 19*a*, Daśāntardaśāphala 25*a*.

Incomplete.

Gives the month and the year of the solar and the lunar eclipses occurring during a certain Hindu cycle of 60 years and states whether these eclipses are full or partial, etc.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

अवाग्भवे भाद्रपद्यां ग्रहः पूर्णोऽधिको मधुः ।
माघेऽर्धग्रहणं भानोः फाल्गुन्यां पादमात्रकम् ॥
प्लवङ्गनामके वर्षे ग्रहशङ्कापि नास्ति हि ।
. . . . . . मासि भाद्रपदाधिके ॥
सौम्यवर्षेऽपि चाषाढ्यां पौष्यां चूडामणिर्ग्रहः ॥

**End:**

आषाढमास्यधिकताश्विनि पूर्णिमायामर्धग्रहस्सुरगुरोर्दिवसे सुधांशौ ।
तस्मिंश्च मासि दिवसेऽपि च तस्य भानोरर्धग्रहो निगदितः समभूद-
[मायाम् ।
पूर्णो निमीलनयुतास्तमयश्च चित्रभान्वो रवेरहनि चैत्रकपौर्णमास्याम् ॥

---

No. **13421.** ज्यौतिषसंहितार्णवः.

JYAUTIṢASAṀHITĀRṆAVAḤ.

**Substance, palm-leaf.** Size, $13\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 522. **Lines, 6 on a** page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1. The other work herein is Bṛhajjātaka 262*a*.
The first leaf is broken.
Complete in the following 17 Taraṅgas:—

| | |
|---|---|
| १. संज्ञावतारनिरूपणम्. | १०. प्रथमार्तवनिरूपणम्. |
| २. नवग्रहचारनिरूपणम्. | ११. षोडशकर्मनिरूपणम्. |
| ३. संवत्सरादिनिरूपणम्. | १२. वास्तुनिरूपणम्. |
| ४. तिथ्यादिपञ्चाङ्गनिरूपणम्. | १३. यात्रानिरूपणम्. |
| ५. मुहूर्तलक्षणम्. | १४. प्रवेशनिरूपणम्. |
| ६. सङ्क्रान्तिनिरूपणम्. | १५. देवताप्रतिष्ठापनम्. |
| ७. उपग्रहनिरूपणम्. | १६. सिंहासनच्छत्रराजाभिषेकनिरूपणम्. |
| ८. सर्वलग्ननिरूपणम्. | १७. उत्पातदर्शनम्. |
| ९. गोचारबलनिरूपणम्. | |

A comprehensive treatise on astrology and astronomy. The subjects treated herein can be seen from the headings of the different Taraṅgas given above. The author is Sūnṛtavādikadambēśvara, son of Viśvēśvara and a Paṇdit at the court of King Pratāparudradēva Gajapati.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

. . . . . . . . . . . . . . .
र्णवानां जलचरसहितं पुष्कराग्रेण पीत्वा ।
उत्क्षि . . . द्विलम . . . . . . -
स्तारा भूत्वा भचक्रे भ्रमणविभ्रिमिषाद्योम्नि ते सञ्चरन्ति ॥
चलकाणां वीणां कनक . . . . . . .
. . . . टीं वीणांशुकललितवाणीं सुनयनाम् ।
सदालम्बामम्बामधरजितबिम्बामनुदिनं
. . . . . . . . . . . नुमहे ॥
कस्तूरिकामसृणमेचककर्दमाब्धिपुत्री[पृथ्वी]पृथून्नतपयोधर . . ।
. . . . . केलिलोलं नीलं महः कमपि निर्मलमाविरास्ताम् ॥
* * * *
तस्या गर्भसुधाम्बुधौ समुदितस्सा चन्द्रचूडामणिः
चान्तं प्रात . . . . . . . . . ।
. . . . पुरुषोत्तमाङ्घ्रिकमलालङ्कारमौलिस्फुर-
च्छास्त्रस्तोममयी त्रिलोचनधरो . . . . ।
. . . . . . . . रोपगाम्भश्शशिरम्यमूर्तिः ।
विश्वेश्वरो नाम महाप्रसादी स्वामिप्रियः श्लाघ्यवृषाधि . . ॥
. . . . . . . . . . . . . ।
पुत्रीव सिन्धोः पुरुषोत्तमस्य हेलाम्बिका शैलसुतेव शम्भोः ॥
. . . . . . . . . . . . . . . . ।
अजायतास्थानमहाप्रसादी राज्ञः कदम्बेश्वर . . . ॥
* * * *
शकाब्दे युग . . . . . . . . . . .
ज्येष्ठे कृष्णदशम्युपेतधरणीसून्वह्नि याम्ये रवौ ।
युग्मेऽर्के ज्ञसिताऽर्कराहुसहिते मेष सिताज्ञे मृगे
. . . . . केतुसहिते जातः कदम्बेश्वरः ॥
विश्वनाथमहामायाचरणौ शरणं गतः ।
यो नानाविधविद्यासु प्रवीणः प्रथमप्रियः ॥
यस्य श्री . . . स्तके गजपतिश्रीवीररुद्रक्षमा-
नाथाङ्घ्रिद्वितयं परां कलयते मौलिश्रियं शाश्वतीम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आनम्रप्रतिपक्षभूमिरमण . . . किरीटोज्वल-
न्माणिक्यद्युतिपुञ्जरञ्जितनखं पङ्करुहप्रोज्ज्वलम् ॥
वक्ष्ये ज्यौतिषसंहितार्णवमिमं सोऽहं कदम्बेश्वरः
स्वायन्मीनकुलीरनक्रमिथुनप्रोच्छन्दराश्यन्वितम् ।
नानावृत्तविचित्ररत्नविलयं ज्योतिस्स्फुरत्पुष्पव-
न्म . . . प्रमुखप्रभावसुभगं श्रीमत्सुधास्यन्दिनीम् ॥

* * * *

गर्गाद्यैः पूर्वमुक्तं तदलमिति . . मा कृथा विस्तृतत्वा-
दुर्बोधस्तत्प्रणीत . . सकलग्रन्थसापेक्षभावम् ।
तस्मात् सारं गृहीत्वा(?) कलमुनिकृतत्वाच्छास्त्रतस्सर्ववेद्यं
संक्षिप्तं सत्कलापं मृदुपदरचितं ज्यौतिषं वच्मि यस्मात् ॥
तदेतच्छास्त्रं सिद्धान्तजातकसंहितारूपेण त्रिविधम् ।
स्कन्धत्रयात्मकं शास्त्रमाद्यं सिद्धान्तसंज्ञकम् ॥
द्वितीयं जातकं . . . . तृतीयं संहिताह्वयम् ॥

तत्र सर्वदा सर्वेषामुपयुज्यमानत्वेन नित्यापेक्षितत्वादाद्यं स्कन्धद्वयं . . -स्कन्ध एव निरूप्यते ।

* * * *

. . . . लक्ष्मवास्तुश्रियाथसमस्तयात्रा ।
प्रवेशनं च त्रिविधप्रतिष्ठा देवराज्ञोऽभिषेककरः ॥
ततः परं . . . लक्ष्म चोत्पातचिह्नानि च पैतृकाख्यम् ।
मिश्राख्यमेतानि यथामतीह वक्ष्ये यथाशास्त्रमतिप्रधानात् ॥

तत्रादौ संज्ञावतारमुच्यते—

क्रमेण राशिग्रहतारकादेः संज्ञां वयं तावदिहापि ध(कु)र्मः ।
शास्त्रावबोधः खलु तस्य यस्य संज्ञामविज्ञाय जनस्य न स्यात् ॥

**Colophon:**

इति ज्यौतिषार्णवे संज्ञावतारनिरूपणं नाम प्रथमस्तरङ्गः ॥

* * * *

इति महाराजाधिराजप्रतापरुद्रदेवगजपतिपादारविन्दषट्पदायमानमानसेन सकलविद्वज्जनचरणपरिचरणसंपादितप्रज्ञाविभवेन चतुरचारखिश्वेतनागामाया-भण्डारधूर्तकव्यादिविधबिरुदविदितेन विश्वेश्वरमहाप्रसादिसुतेन कदम्बेश्वराह्वया-स्थानप्रसादिना सूनृतवादिना विरचिते ज्यौतिषसंहितार्णवे संवत्सरादिनिरूपणं नाम तृतीयस्तरङ्गः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

अकस्माद्विपिने यत्र चरन्ति ग्रामपक्षिणः ।
ग्रामे वा यदि वा वन्या भय . . . न्ति हि ॥
रात्रौ भवन्तो काकाद्या दिवसे कौशिकादयः ।
सृगालो विशति ग्रामं शशो वा ह्यथवा निशि ॥

* * * *

. . . वने कौशले चैव मागधे रा . . . वः क्रमात् ।
यादृशीगतमुत्पातं तत्तद्देशफलं भवेत् ॥
एवमादिविकारास्ते यत्र यत्र . . . ।
कुलोक्तविधिना सम्यक् शान्तिं कुर्याद्विचक्षणः ॥

**Colophon:**

इति ज्यौतिषसंहितार्णवे उत्पातनिरूपणं नाम सप्तदशस्तरङ्गः ॥

The scribe adds—

रुधिरोद्गारिनामसंवत्सरश्रावणमासोपक्रमः रक्ताक्षिनामसंवत्सर ज्येष्ठ ब तृतीया शुक्रवारे ज्यौतिषसंहितासागरं किडाम्बि वेङ्कटदासेन विलिखेच्च नूतनम् ॥

---

## No. 13422. ज्यौतिषग्रन्थः.

## JYAUTIṢAGRANTHAḤ.

**Pages, 16.** Lines, 6 on a page.

Begins on fol. 70*a* of the MS. described under No. 13425.

On certain details connected with the preparation of annual Hindu calendars.

**Beginning:**

दिवार्द्रा सस्यनाशाय रात्रौ सस्याभिवृद्धये ।
अथ(था)स्तमान(ने)र्धरात्रौ महार्घं च सुवृष्टिकृत् ॥

* * * *

आदायव्ययनिर्णयः—

तर्क ६. पक्ष २. वसु ८. अद्रिरेक १७. गोरेक १९. एकनयनं २१. अम्बरं भुवि २०.

राशीशोस्याख्यनृपतिश्चचैक्यं त्रिगुह्यगुण्यं शरसंयुतं च(?) ।
पक्षे विभाजि शरसंयुतं च लब्धं त्रिगुह्यं शरसंयुतं च ॥
चैत्रादितिथिवारेषु करणं योगतारकम् ।
जन्मनक्षत्रसंयुक्तं स्थापितं त्रिविधं ध्रुवम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



* * * *

अङ्गग्रहप्रश्नः—

शिरो भानुर्मुखे चन्द्रः हृदि भौमं गले बुधः ।
करौ गुरुस्सितः पृष्ठे शनैः पादौ स्पृशन् क्रमात् ॥

**End**:

नराकारं समालिख्य सप्त सप्त क्रमेण तु ।
शिरः पादोदरः पृष्ठस्वामितारादि गण्यते ॥
शिरः स्वामि सतो मृत्युः पादौ कष्टप्रवासकः ।
उदारमैश्वर्यमाप्नोति पृष्ठे निष्ठुरभाषणम् ॥

* * * *

मध्यात्फलाधिकं लाभे लाभा(त्) क्षीणफलं व्यये ।
व्ययात्फलाधिकं लग्ने अर्थवान् भोगवान् भवेत् ॥

---

## No. 13423. ज्यौतिषरत्नमाला.
## JYAUTIṢARATNAMĀLĀ.

Substance, paper. Size, 12½ × 5 inches. Pages, 73. Lines, 9 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete in 20 Prakaraṇas. The subjects dealt with up to the 15th Prakaraṇa are given under the next number. According to the stanza giving the names of the Prakaraṇas (extracted below) Rājābhiṣēka forms a separate Prakaraṇa (14th) immediately before the Yātrāprakaraṇa. The subjects treated of in the Prakaraṇas 17 to 20 are वास्तुप्रकरण, गृहप्रवेशप्रकरण, नववस्त्रप्रकरण and देवप्रतिष्ठाप्रकरण.

Same work as that described under No. 2895 of the India Office Library Catalogue, Part V. By Śrīpati. The author says that he has consulted the treatises of Garga, Varāha, Lalla, and others.

**Beginning**:

प्रभवविरतिमध्यज्ञानवन्ध्या नितान्तं विदितपरमतत्त्वा यत्र ते योगिनोऽपि ।
तमहमिह निमित्तं विश्वजन्मात्ययानामनुमाति(मित)मभिवन्दे भग्रहैः कालमीशम् ॥

विलोक्य गर्गादिमुनिप्रणीतं वराहलल्लादिकृतं च शास्त्रम् ।
दैवज्ञकण्ठाभरणार्थमेषा विरच्यते ज्यौतिषरत्नमाला ॥

शकेन्द्रकालः पृथगाकृतिघ्नः शशाङ्कनन्दाश्वियुगैस्समेत(:) ।
शराद्रिवस्विन्दु १८७५ हृतस्समेतः षष्ट्यासशेषे प्रभवादयोऽब्दाः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रभवविभवाख्यशुक्ला: प्रमोदनामा प्रजापतिरथाब्द: ।
परतो ऽङ्गिरास्ततश्च श्रीमुखभावो युवाख्योऽन्य: ॥

* * * *

इयं हि षष्टि: परिवत्सराणां बृहस्पतेर्मध्यमराशिभोगात् ।
उदाहृता पूर्वमुनिप्रवर्यैर्नियोजनीया गणनाक्रमेण ॥

* * * *

युगं भवेद्वत्सरपञ्चकेन युगानि तद्वादशवर्षषष्ट्या ।
भवन्ति तेषामधिदेवताश्च क्रमेण वक्ष्यामि मुनिप्रणी(ता:) ॥

**End:**

संवत्सरादितिथिवारगुणास्ततश्च योगाभिधं प्रकरणं करणप्रशंस्यात् ।
भानां फलानि तदनु क्षणजा गुणाश्च पश्चादुपग्रहफलं रविसङ्क्रमोऽथ ॥
स्याद्दोबल: शशिबलं च विलग्नचिन्ता संस्कारजाश्च विधयोऽथ नृपाभिषेक ।
यात्रा विवाहविधिरालयसन्निवेशो (वेश्म)प्रवेशनववस्त्रसुरप्रतिष्ठा: ॥
इति ललितसुवृत्तां निर्मलां रत्नमालामुदहरदधिकार्थां सद्गुणां रत्नकोशात् ।
निजगुरुपदभक्त: श्रीपति: शास्त्रदर्शी चतुरगणककण्ठे राम(ज)तामुज्ज्वलश्री: ॥
सुवृत्तया श्रीपतिबद्धयानया कण्ठस्थया निर्मलरत्नमालया ।
अलक्षणोऽप्यर्थपरिच्युतोऽप्यलं सभासु भूम्रा(म्यां) गणको विराजते ॥
भ्रातरद्यतनविप्रनिर्मितं शास्त्रमेतदिति मा वृथा त्यज ।
आगमोक्तमृषिभाषितार्थतो नापरं किमथ कीर्तितं मया ॥

**Colophon:**

इति श्रीश्रीपतिभट्टविरचितायां ज्यौतिषरत्नमालायां विंश[ति]प्रकरणं समाप्तम् ॥

---

No. **13424**. ज्यौतिषरत्नमाला—सव्याख्या.

JYAUTIṢARATNAMĀLĀ: WITH COMMENTARY.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 324. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new

Breaks off in the 15th Prakaraṇa.

Same work as the above, and with the commentary called Śrīdharā.

The following is a list of the contents of the work.

१. वत्सरप्रकरणम्.


| | | Fol. | | Fol. |
|---|---|---|---|---|
| प्रभवादि: | ... | १ | ऋतुनामानि सौरचान्द्रम् | १० |
| द्वादशयुगम् | ... | ४ | ऋत्ववसानमासानां नामानि मासाधिपा: | ११. |
| गुरूदयफलम् | ... | ८ | | |
| अयनद्वयलक्षणम् | ... | ९ | | |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## २. तिथिप्रकरणम्.


| | Fol. |
|---|---|
| पक्षदेवता-तिथिदेवता ... | १२ |
| पुराणोक्ततिथिदेवतानि ... | १२ |
| नन्दादिसंज्ञा | १३ |
| नन्दादिफलम् ... | १४ |
| दर्शतिथिकर्माणि | १४ |
| पक्षच्छिद्रदग्धतिथिः ... | १५ |
| दन्तधावनस्नाननिषिद्धतिथिः | १५ |
| आमलकस्नाननिषिद्धतिथिः | १६ |
| तैलमांसक्षौरवर्ज्यतिथिः | १७ |
| सिनीवाल्यादिचतुर्विधपर्वलक्षणम् ... ... | १७ |
| चतुर्विधयुगादयः ... | १८ |
| गजच्छाया ... | १८ |
| अवमत्रिद्युस्पृक्–अवमदोषः. | १९ |
| श्राद्धकर्मयोग्यतिथिः ... | २० |
| ध्रुवक्षिप्रतिथि ... | २१ |


## ३. वारप्रकरणम्.


| | |
|---|---|
| भौमवारकर्माणि ... | २१ |
| शनिवारकर्म .. | २२ |
| तैलाभ्यङ्गवारम् वारफलम्. | २३ |
| तैलाभ्यङ्गनिषिद्धकालः ... | २४ |
| वारोक्तकार्यम् ... | २४ |
| ग्रहवर्णेषु कर्तव्या ... | २४ |
| वस्त्रधारणक्षौरकर्मवारफलम्. | २५ |
| विद्यारम्भवारफलम् ... | २५ |
| गुलिकार्धप्रहारदोषः ... | २६ |
| कालहोरा ... | २६ |
| होराकर्माणि ... | २७ |
| ग्रहाणां देवता ... | २८ |


## ४. योगप्रकरणम् ३१.

एकार्गलदोषः ३०.

## ५. करणप्रकरणम्.


| | |
|---|---|
| करणदेवता ... | ३१ |
| करणकर्माणि ... | ३२ |
| विष्ट्याङ्गघटिका ... | ३२ |
| विष्टिस्वरूपम् ... | ३२ |
| विष्टेर्दिक् .. | ३३ |
| विष्ट्युत्पत्तिः ... | ३३ |


## ६. नक्षत्रप्रकरणम् ३४.


| | |
|---|---|
| नक्षत्रयोनिः ... | ३५ |
| अधोमुखनक्षत्राणि ... | ३५ |
| तिर्यङ्मुखम् ... | ३५ |
| ऊर्ध्वमुखम् ... | ३६ |
| स्थिरनक्षत्राणि ... | ३७ |
| मृदुनक्षत्राणि ... | ३६ |
| लघुनक्षत्राणि ... | ३६ |
| तीक्ष्णचरनक्षत्राणि .. | ३६ |
| उग्रमिश्रनक्षत्राणि ... | ३७ |
| परिभाषानक्षत्रम् ... | ३७ |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| | Fol. | | Fol. |
|---|---|---|---|
| देवमनुष्यराक्षसगणम् ... | ३७ | अग्न्याधानकूपारम्भः ... | ४५ |
| पूर्वापरमध्ययोगिनक्षत्रम् .. | ३८ | आरामस्थापनम् ... | ४६ |
| जघन्यसमबृहन्नक्षत्रम् ... | ३८ | अश्वसङ्ग्रहगजसङ्ग्रहनक्षत्राणि | ४७ |
| अन्धादिनक्षत्राणां फलम् | ३९ | गवांक्रयं-गोयात्रा ... | ४८ |
| कूलाकूलनक्षत्रफलम् ... | ३९ | कृष्यारम्भः ... | ४८ |
| स्त्रीपुरुषनपुंसकनक्षत्रम् ... | ४० | बीजोप्तिचक्रम् ... | ४८ |
| त्रिपुष्करम् ... ... | ४० | सर्पदष्टनिषिद्धनक्षत्रम् ... | ५० |
| याम्यदिग्यात्रावर्ज्यम् ... | ४० | भैषज्यारम्भम् ... | ५० |
| ऋणग्रहणमोचनम् ... | ४१ | रोगारम्भे असाध्यनक्षत्राणि | ५१ |
| युद्धारम्भनक्षत्रम् ... | ४१ | रोगमुक्तस्नाननिषिद्धनक्षत्राणि | ५२ |
| नववस्त्रभूषणम् ... | ४२ | नाट्यारम्भः ... | ५२ |
| पुंसवनसीमन्तम् ... | ४२ | राजाभिषेकदर्शनम् ... | ५३ |
| कर्णवेधान्नप्राशनचौलनक्षत्राणि ... ... | ४३ | गण्डान्तनक्षत्रम् ... | ५३ |
| क्षौरविधिनिषिद्धकालः ... | ४४ | लग्नगण्डम् ... | ५३ |
| उपनयननक्षत्राणि ... | ४४ | मूलाश्लेषगण्डः ... | ५४ |
| विद्यारम्भविवाहनक्षत्रम् ... | ४५ | आश्विन्यादिकृत्यकर्माणि ... | ५७ |


## ७. मुहूर्तप्रकरणम् ५५.


| | | | |
|---|---|---|---|
| दिवामुहूर्ताः ... ... | ५७ | शुभकर्मनक्षत्रम् अभिजित् | ६१ |
| रात्रिमुहूर्ताः ... ... | ६० | कर्मविधाननक्षत्राणि ... | ६२ |
| मुहूर्तमानम् ... ... | ६० | सूर्यवारादिमुहूर्तत्याज्यानि | ६३ |
| क्रूरसौम्यमुहूर्ताः | ६० | पुराणोक्तमुहूर्ताः ... | ६३ |


## ८. उपग्रहप्रकरणम्.


| | | | |
|---|---|---|---|
| भूकम्पदोषशुभकर्मनिन्दिताः | ६४ | सिद्धयोगः ... ... | ६६ |
| मोघादिदोषः ... ... | ६५ | क्रकचयोगः ... ... | ६७ |
| चण्डीशदोषः ... ... | ६५ | सिद्धतिथियोगः ... | ६७ |
| आनन्दाद्यष्टाविंशतियोगाः | ६६ | संवर्तयोगः ... ... | ६८ |
| योगोत्पत्तिक्रमः ... | ६६ | योगानां त्याज्यदेशः ... | ६८ |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ९. संक्रांतिप्रकरणम् ६८.


| | Fol. |
|---|---|
| संक्रान्तिदेवता ... | ६८ |
| संक्रान्तिपुण्यकालः ... | ७० |
| संक्रान्तिनामानि ... | ७१ |
| विष्णुपदादिपुण्यकालः ... | ७१ |
| रविगतिः .. | ७२ |
| गणितविधिः ... | ७२ |
| अधिकमासविधिः ... | ७३ |


## १०. गोचारप्रकरणम् ७४.


| | |
|---|---|
| चन्द्रवेधः ... | ७६ |
| कुजशनिवेधः ... | ७८ |
| कुजाष्टमफलम् ... | ८० |
| बुधवेधः ... | ८० |
| गुरुवेधः ... | ८२ |
| मत्तमयूरवृत्तम् ... | ८३ |
| मणिगणनिकरवृत्तम् ... | ८३ |
| शुक्रवेधः ... | ८४ |
| शनिवेधः ... | ८६ |
| वेधप्रधान्यम् ... | ८८ |
| सप्तग्रहाणां गोचारफलम् | ८९ |
| राहुगोचारः ... | ९० |
| अङ्गग्रहगोचारः ... | ९१ |
| अष्टकवर्गम् ... | ९२ |
| दशानवविधम् ... | ९४ |
| गुणशोधनम् ... | ९५ |
| हरणबलम् ... | ९५ |
| रविशान्तिः ... | ९६ |
| चन्द्रभौमशान्ती ... | ९६ |
| बुधगुरुशान्तिः ... | ९७ |
| शुक्रशनिशान्तिः .. | ९७ |
| नवग्रहसमिल्लक्षणम् ... | ९८ |
| समित्प्रमाणम् ... | ९८ |
| प्रादेशलक्षणम् ... | ९८ |
| गोचारस्य विशेषः ... | ९९ |


## ११. चन्द्रताराबलप्रकरणम्.


| | |
|---|---|
| ताराबलम् ... | १०० |
| चन्द्रबलम् ... | १०१ |


## १२. लग्नप्रकरणम् १०१.


| | |
|---|---|
| मेषादिकृत्यकर्म ... | १०२ |
| षड्वर्गलक्षणम् ... | १०३ |
| वास्तुलग्नम् ... | १०५ |
| वाणिज्यम् .. | २०५ |
| चौर्यलग्नम् ... | १०५ |
| सेवालग्नम् ... | १०५ |
| पशुवृद्धिलग्नम् ... | १०६ |
| गर्भाधानलग्नम् ... | १०६ |
| पुत्रयोगलग्नम् ... | १०६ |
| नवगृहप्रवेशलग्नम् ... | १०६ |
| ग्राम्यराशिः आरण्यराशिः पौरराशिः. | १०६ |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| | Fol. | | Fol. |
|---|---|---|---|
| धर्मारम्भलग्नम् ... | १०६ | वेतालसिद्धिः अभिचारः | १०९ |
| आयुष्यकर्मराजाभिषेकयोर्लग्नम् | १०७ | कृष्यारम्भः गोचरश्च | ११० |
| वापीकूपारम्भः ... | १०७ | लग्नगुणान्तरम् ... | १११ |
| दीक्षालग्नम् धर्मशास्त्रारम्भः | १०७ | चन्द्रबलप्राधान्यम् ... | १११ |
| शिल्पविद्यारम्भः ... | १०७ | लग्ननवांशलक्षणम् ... | ११२ |
| ज्ञानोपदेशलग्नम् ... | १०७ | नैसर्गिकबलम् ... | ११२ |
| काव्यारम्भः ... | १०८ | अल्पदोषः ... | ११२ |
| पुण्यकर्मारम्भः ... | १०८ | दोषप्राधान्यम् ... | ११३ |
| औषधसेवनकालः ... | १०९ | लग्ना अभिजित् ... | ११३ |
| सन्धिसन्धानलग्नम् ... | १०९ | वर्गोत्तमांशः ... | ११३ |


## १३. संस्कारप्रकरणम्.


| | | | |
|---|---|---|---|
| गर्भाधानम् सीमन्तम् ... | ११४ | उपनयनम् ... | १२० |
| पुरुषस्त्रीनपुंसकनक्षत्रम्... | ११५ | ग्रहाणामंशफलम् ... | १२१ |
| लग्नगोचरम् ... | ११५ | अग्न्याधानम् ... | १२२ |
| जातकर्मनामकरणम् ... | ११६ | अंशफलम् ... | १२३ |
| अन्नप्राशनम् ... | ११६ | मूढे आधानवर्जः ... | १२४ |
| स्त्रीणामन्नप्राशनम् ... | ११७ | नृपाभिषेकः ... | १२४ |
| चौलविधिः ... | ११८ | | |


## १४. यात्राप्रकरणम् १२७.


| | | | |
|---|---|---|---|
| षट्कालेषु शुभनक्षत्राणि | १३२ | त्रयोविंशतियोगाः ... | १४७ |
| वारशूलाः ... | १३३ | शुभाशुभसङ्ख्याविवरणम् | १५० |
| अष्टदिग्वारशूलाः ... | १३३ | नक्षत्रभक्षणानि ... | १५१ |
| दिक्कण्टकवारशूलाः ... | १३३ | दिग्भक्षणानि ... | १५१ |
| प्रतिशुक्रनिषेधः .. | १३४ | वारभक्षणम् ... | १५१ |
| प्रतिशुक्रयात्राफलम् ... | १३४ | कुम्भकलक्षणम् ... | १५३ |
| दिगीशाः प्रतिशुक्रनिषेधः | १३५ | परस्थानवस्तुलक्षणम् ... | १५४ |
| पन्थावक्रम ... | १३९ | प्रस्थानदूरप्रमाणम् ... | १५४ |
| do. ... | १४५ | प्रस्थानदिनप्रमाणम् ... | १५४ |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| | Fol | | Fol. |
|---|---|---|---|
| उत्पातः ... | १५५ | गोः क्षुतम् ... | १६० |
| यात्राशकुनम् ... | १५७ | दुर्निमित्तशान्तिः ... | -१६० |
| क्षुतशकुनम् ... | १५९ | | |

१५. विवाहप्रकरणम् १६१.

विवाहमासाः १६२.


**Beginning :**

. . . . . . शिशूनां बोधकारिणी ।

व्याख्या विरच्यते रत्नमालायाः श्रीधराख्यया ।

प्रथमं प्रबन्धारम्भलक्षणं नमस्कारमाह—

प्रभवविरतिमध्यज्ञानवन्ध्या नितान्तं विदितपरमतत्त्वा यत्र ते योगिनोऽपि ।
तमहमिह निमित्तं विश्वजन्मात्ययानामनुमितमभिवन्दे भग्रहैः कालमीशम् ॥ इति ।

अत्र पूर्वार्धेन कालस्य महत्तां प्रतिपादयन्ति । योगिनोऽतिसूक्ष्मविदः विदितपरमतत्त्वा विदितपरमार्थज्ञानाः तेऽपि यत्र यस्मिन्कालविषये प्रभवविरतिमध्यज्ञानवन्ध्याः आद्यवसानमध्यज्ञानाशक्ता भवन्ति । तस्मादीश्वरव्यतिरिक्तैः ज्ञातुम(तुं न)शक्यते । तथोक्तम् ।

अप्यर्णवस्य पुरुषः प्रतरन्कदाचिदासादयेदनिलवेगवशेन पारम् ।
न त्वस्य कालपुरुषाख्यमहार्णवस्य गच्छन्कदाचिदनृषिः मनसापि पारम् ॥ इति ।

अत्रानृषिशब्देन ईश्वरव्यतिरिक्त उच्यते ।

तथोक्तं श्रुतौ—

विश्वाधिको रुद्रो महर्षिरिति । विश्वजन्मात्ययानां निमित्तमिति ।

विश्वस्य सृष्टिसंहरणकार्ये कालस्यैवेति । तथोक्तं वायव्यसंहितायाम्—

कालः सृजति भूतानि कालः संहरति प्रजाः ।
सर्वे कालस्य वशगा न कालः कस्यचिद्वशे ॥

विष्णुपुराणे च तथोक्तम्—

विष्णोः सुरूपात्परतो हि ते द्वे रूपे प्रधानं पुरुषश्च विप्र ।
तस्यैव तेऽन्ये विधृते वियुक्ते रूपान्तरं तद्द्विज कालसंज्ञम् ॥ इति ।

भग्रहैरनुमितमिति भगणैः नक्षत्रगणैः ग्रहैः नवग्रहैश्च शशिभिः कालोऽनुमीयते । तथोक्तम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



. . . . . . . . . रनुमीयते क्षेत्र इति । तमीशं स्वतन्त्रं कालरूपमभिवन्दे श्रीपतिसंज्ञोऽहं नमस्करोमि ॥

अथ शास्त्रसम्प्रदायं प्रयोजनं संज्ञां चाह—

विलोक्य गर्गादिमुनिप्रणीतं वराहलल्लादिकृतं च शास्त्रम् ।
दैवज्ञकण्ठाभरणार्थमेषा विरच्यते ज्यौतिषरत्नमाला ॥

End:

लल्लः—

परविषयपुराप्तौ साधु देवद्विजस्त्वं कुलजनवनिताश्च क्ष्माभिपो नोपरुध्यात् ।
जनपदहितयुक्तः पूजयेत्पौरमुख्यान् शुभतिथिदिवसर्क्षे हृष्टसैन्यो विशेच्च ॥

इति मनुजपतिर्यथोपदेशं भगणाविदां प्रकरोति यो वचांसि ।
स सकलनृपमण्डलाधिपत्यं व्रजति दिवीव पुरन्दरोऽचिरेण ॥

Colophon:

इति श्रीधराख्ये रत्नमालाव्याख्याने यात्राविधिश्चतुर्दशप्रकरणम् ॥
अथ चतुस्त्रिंशच्छ्लोकैः विवाहप्रकरणमारभ्यते ।

* * * *

तथोक्तम्—

सिंहस्थिते सुरगुरौ अधिमासके च ज्येष्ठे च मास्यथ दिने त्ववमे दिने च ।
कुर्वीत नार्कगतनीचगयो जन्मांशयोश्च निखिलान्यः . . . . (?) ॥

---

No. **13425.** ज्यौतिषविषयः, द्राविडभाषासहितः.

## JYAUTIṢAVIṢAYAḤ WITH TELUGU LANGUAGE.

Substance, palm-leaf. Size, 12⅝ × 1⅝ inches. Pages, 55. Lines, 6 on a page Character, Grantha and Tamil. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Jyautiṣa (Kāla) 29(*a*) Kālaprakāśikā 35*a*, Jyautiṣa (with Tamil meaning) 45*a*, Phalagrantha 50*a*, Navagrahacūḍāmaṇi 42*b*, Grahadvāranirṇayādi 66*b*, Jyautiṣagrantha 70*a*, Aṣṭakavarga 78*a*, Kālacakra with Tamil meaning 106*a*, Kālacakra 116*a*.

Incomplete.

Gives certain details relating to astrological matters.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

अमृतयोगम्—

तपनमूलशशिश्रवणं दिने गुरुपुनर्वसुभार्गवफल्गुनी ।
धरणिजोत्तरस्वातिशनैश्चरानमृतयोगमिदं बुधकृत्तिका ॥

सिद्धयोगम्—

आदित्यहस्तं गुरुपुष्ययोग . . . . शनिरोहिणी च ।
सोमेच सौम्यं भृगुरेवतीनां भौमाश्विनीनामिव सिद्धयोगः ॥

**End:**

क्रूरास्सौम्यः पुरुषवनिते ते चरा . . . . .
प्रागादीशास्त्रियवृषनृयुक् कर्कटास्सत्रिकोणाः ।
मार्ताण्डेन्द्वोरयुजि समभे चन्द्रभान्वो . . . हरिः
द्रेक्काणास्स्युः स्वभवनसुतात्रित्रिकोणाधिपानाम् ॥

---

No. 13426. तन्त्रसङ्ग्रहः.

TANTRASAṄGRAHAḤ.

Substance, paper. Size, $11\frac{1}{8} \times 9$ inches. Pages, 46. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 105*a*. The other works herein are Siddhāntaśēkhara 1*a*, Mahābhāskarīya 65*a*, Laghubhāskarīya 93*a*.

Complete in eight Adhyāyas.

An astronomical treatise dealing with the dimensions relating to the various spherical heavenly bodies and with the calculation of time as well as the method of observing their position, movements, etc.

**Beginning:**

हे विष्णो निहितं कृत्स्नं जगत्त्वय्येव कारणे ।
ज्योतिषां ज्योतिषे तस्मै नमो नारायणाय ते ॥
रवेः प्रत्यग्भ्रमं प्राहुः सावनाख्यं दिनं नृणाम् ।
आर्क्षमृक्षभ्रमं तद्वज्ज्योतिषां प्रेरको मरुत् ॥
भ्रमणं पूर्यते तस्य नाडीषष्ट्या मुहुर्मुहुः ।
विनाडिकापि षष्ट्यांशा नाड्या गुर्वक्षरं ततः ॥
प्राणैर्गुर्वक्षराणां स्याद्दशकं चक्रपर्यये ।
खखषड्घनतुल्यास्ते वायुः समजवो यतः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूर्वपक्षः शशाङ्कस्य विप्रकर्षो रवेः स्मृतः ।
संनिकर्षोऽपरः पक्षः सितवृद्धिक्षयौ तयोः ॥

* * * *

**Colophon:**

इति तन्त्रसङ्ग्रहे प्रथमोऽध्यायः ॥

**End:**

चक्रांशाद्यङ्किते वृत्ते तन्मध्यासक्तचक्षुषा ।
ज्ञेयं ग्रहान्तरं बिम्ब दृग्ज्याचापादिकं स्फुटम् ॥
गोलः कालः क्रिया चापि द्योत्यतेऽत्र मया स्फुटम् ।
लक्ष्मीशनिहितध्यानैरिष्टं सर्वं हि लभ्यते ॥

**Colophon:**

इति तन्त्रसङ्ग्रहेऽष्टमोऽध्यायः ॥
तन्त्रसङ्ग्रहः समाप्तः ॥

---

No. **13427.** तारापथकप्रकाशिका.

TĀRĀPATHAKAPRAKĀŚIKĀ.

Substance, paper. Size, $7\frac{3}{8} \times 3\frac{5}{8}$ inches. Pages, 32. Lines, 32 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the Gucchas one and two only.

A treatise for determining the positions of the heavenly bodies and other particulars required for the preparation of an astronomical calendar. The author whose name is not given salutes God Varadarāja of Conjeeveram and Veṅkaṭādrīśvara of Tirupati, and pays homage to his Guru Maṇīndhanācārya and to the two great mathematicians Gaṇeśadaivajña and Śirōmaṇīśvara. From the rules given for the calculation of the Kali, Śaka, Christian, etc., years it is clear that he wrote this work in the year Kālayukti 1858 A.D.

**Beginning:**

श्रीवाणीकमलागजाधिपमुखान देवान् हरित्पालका-
नादित्येन्दुमहीजविद्गुरुकविब्रध्नात्मजौ गन्ध्वजान् ।
श्रीकाञ्चीवरदप्रभुं कुलगुरुं श्रीवेङ्कटाद्रीश्वरं
वन्दे भूमिसुरानहं मुनिगणानिष्टार्थसंसिद्धये ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुणिव्रजानां गणनेऽग्रगण्यौ गणेशदैवज्ञशिरोमणीश्वरौ ।
मणीन्धनाचार्यमहं प्रणम्य करोमि तारापथकप्रकाशिकाम्

गजाभ्रगोवेद ४९०८ . मितध्रुवेऽधुना संयोजिताश्चेत्प्रभवादिवत्सर।. ।
कलेः प्रमाणं भवति क्षयेऽन्तगे षष्ठ्यन्वितोऽयं ध्रुवकस्तदा स्यात् ॥

**End:**

सूर्यस्थितर्क्षघटिकाः शरभूमिभि १५ श्च
त्रिंशद्भि ३० रक्षनिगमै ४५ श्च ततोऽग्रशालैः ।
तुर्यं गता यदि तदा क्रमतो द्वितीयः
तार्तीयिकश्चतुरथैकपदो भवेद् द्वे ॥
गतैष्यराज्यस्ताष्षष्टिहतास्सूर्यगतेर्हृताः ।
दिनार्धे संस्कृतास्सूर्यप्रवेशः स्यात्पदक्रमात् ॥

**Colophon:**

इति तारापथकप्रकाशिकायां द्वितीयगुच्छः ॥

नक्षत्रात्मकरविस्फुटपदकानि—

| संख्या. | पदकम्. | | | गतिः. | | रविजन विमथ धनम्. | चन्द्र भुजविम. धनम्. | रविदिनार्धम्. | |
|---|---|---|---|---|---|---|---|---|---|
| | नक्ष. | घटि. | वि. | घटि. | वि. | | | | |
| 1 | 0 | 4 | 24 | 4 | 52 | 1 | 22 | 15 | 20 |
| 2 | 0 | 8 | 48 | 4 | 25 | 1 | 22 | 15 | 20 |
| 3 | 0 | 13 | 13 | 4 | 25 | 1 | 22 | 15 | 22 |

**End**

नक्षत्रात्मकचन्द्रस्फुटपदकानि—

| सं. | पाथकम्. | | | गति. | | धनर्णम्. |
|---|---|---|---|---|---|---|
| 45 | 26 | 22 | 6 | 54 | 12 | 23 |
| 46 | 0 | 16 | 12 | 54 | 5 | 24 |
| 47 | 1 | 10 | 24 | 54 | 14 | 23 |
| 248 | 2 | 4 | 46 | 54 | 38 | 21 |

**Colophon.**

इति चन्द्रपदकाः समाप्ताः ॥

670

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13428. त्रिविधचक्रनिर्णयः, आन्ध्रटीकासहितः.
## TRIVIDHACAKRANIRṆAYAḤ WITH TELUGU MEANING.

Pages, 22. Lines, 6 on a page.

Begins on fol. 124*b* of the MS. described under No. 6470.

Incomplete.

Describes the exact position of the planets under various conditions in their apparent three-fold movements and the influences they exert on the fortunes of human beings.

**Beginning :**

त्रिविधचक्रं प्रवक्ष्यामि दुर्लभं सचराचरम् ।
वर्तमाने द्वन्द्वयुद्धे कलियुगे च विशेषतः ॥ १ ॥
* * * *
अथातस्सम्प्रवक्ष्यामि चक्रोद्धारणविस्तरम् ।
एकैकस्य फलं सर्वं राशिनक्षत्रजांशकम् ॥ २ ॥
* * * *
द्वादशारं लिखेच्चक्रं मेषादिद्वादशान्वितम् ।
अज . . . धनुश्चैव विन्यसेद्राशिमण्डले ॥

**End :**

यस्य वर्गाक्षरे चन्द्रे तस्य वर्गाधिपो ग्रह(:)
ग्रहवर्णेन वर्णश्च शशाङ्कस्य प्रजायते ॥

---

## No. 13429.. दृग्गणितम्.
## DṚGGAṆITAM.

Substance, paper. Size, 8¼ × 6¼ inches. Pages, 810. Lines, 35 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete. Foll. 1—320 are written in Telugu language.

This treatise gives details of information for the preparation of Hindu calendars by means of direct observation of the heavenly bodies. The work was written in the year Bahudhānya, Śaka 1801. The author was Taḍakamalli Kṛṣṇarāyar, adopted son of Raṅgarāya and Kanakāmbā and the natural son of Kuṭṭimāmbā and Raṅgarāyā's brother Veṅkaṇṇapaṇḍita who was the minister of Bommarāja, the Zamindar of Kārvētnagar. This work is said to have been undertaken by the author at the request of his friends Vēṅkaṭakṛpa, Pūrṇaya, Subrahmaṇya and after consulting several astronomical works in Sanskrit, Tamil, Malayālam, Telugu, English etc.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

श्रीशं प्रणम्याव्ययमादिदेवं चाचार्यवर्यान् बदरीवनस्थान् ।
करोति लोकव्यवहारसिद्ध्यै दृक्साम्यसूत्रं स्फुटखेचराणाम् ॥

अवतारिका—यथा—

श्रीतट्टुकमल्लहारीतं व्यावहारिकुलोद्भवम् ।
ऋषितुल्यस्य वेङ्कण्णपण्डितस्य द्विजन्मनः ॥
स्वात्यभ्रजलविन्दूपमानवीर्यपरिग्रहात् परामृशात् ।
कुट्टिमाम्बागर्भशुक्तौ जातं मुक्ताफलोपमम् ॥
यं भ्रात्रेयं दृष्टमात्राद्रङ्गरायो ययाच तम् ।
स्वं भ्रातरं पुत्रदाने वंशकर्तारमात्मनः ॥
तेनापि दत्तं स्वभ्रात्रे सौभ्रात्रकचिकीर्षया ।
गृहीत्वा कनकाम्बायै स्वजायायै प्रदत्तवान् ॥
रङ्गरायोऽप्येष पुत्रो द्यावां संवर्ध्यतामिति ।
सापि यं(तं) स्वौरसात् पुत्रादधिकं मन्य चादरात् ॥
पालिता वर्धिता चापि सत्कृता लालिता मुदा ।
सोऽपि स्वराज्यवस्वर्थं दत्वा स्वं मकुटं तदा ॥
वल्लमुठाख्यराज्यस्य प्रभुत्वमपि दत्तवान् ।
यं दृष्टमात्रादाबिम्बानव्या(?) भूपारितोषिकम् ॥
नरयानादिकं दत्वा निकटे स्वे न्यवेशयेत् ।
कार्वेटिनगराधीशबोम्मराजोऽपि यं बुधम् ॥
आकार्य वज्रकटकं दत्वा सत्कारमाचरत् ।
तं नेत्रं रङ्गराजस्य तथा वेङ्कनमन्त्रिणः ॥
अधीतकृष्णयजुषमापस्तम्बबहुश्रुतम् ।
अष्टादशस्थानविद्याकोविदं सूत्रपारगम् ॥
सौरब्राह्ममरीच्यादिशौनक्याष्टादशान्तिमान् ।
पूर्वसिद्धान्तभेदानां भेत्तारं सर्वतोमुखम् ॥
जैष्णुजीय्या(मिनीया)यैवाराहशिरोमणिकलापवान् ।
तन्त्रानन्यांश्च वेत्तारं केरलादिकपद्धतीन् ॥
गैर्वाणहौणान्प्रयोगगणितान् द्राविडांस्तथा ।
वेत्तारं सङ्गृहीतारं षड्विधान् प्राकृतांस्तथा ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कामन्दकजलोपायं सस्यानन्दकदोहदान् ।
विवेक्तारश्चान्ध्रकाव्ये व्यक्ताव्यक्तादिसंज्ञकान् ॥
प्रणेतृं(तॄन्)मुद्रयी(यि)तारं तथा रेट्टमतस्य च ।
लीलावतीं प्रगीतारमान्ध्रकाव्ये समर्मकम् ॥
श्रीमद्वेङ्कटकृपाख्याः निशम्य विबुधोत्तमाः ।
पूर्णय्यसुब्रह्मण्यादिवयस्याः प्रीतिपूर्वकम् ॥
ज्ञातुं दृग्गणितैक्यत्वक्रियातत्त्वं यथातथम् ।
रव्यादिनां खेचराणामेवं पप्रच्छुरादरात् ॥
रायवर्य त्वयालोकि सिद्धांतान् विविधान् बहून् ।
तत्तत्तन्त्रविधानेषु नैपुण्येनासकृत् स्फुटम् ॥
कस्मात्तन्त्रागमा नीता ग्रहा दृक्तुल्यतां गताः ।
तिथिनक्षत्रोपरागसङ्क्रान्त्ययनयुक्तिषु ॥
पातनक्षत्रसंयोगग्रहयुद्धादिकेषु च ।
नक्षत्रस्थानलग्नादिसाधनेष्वितरेषु च ॥
निर्णीतं तत्त्वया वाच्यमस्मत्प्रियचिकीर्षया ।
त्वत्तुल्यमस्मद्विषये न पश्यामोऽन्यमीदृशम् ॥
एवं पृष्टः प्रत्युवाच सोऽत्यन्तविनयान्वितः ।
भवद्भिर्ज्ञातसर्वस्वैर्नार्होऽस्म्येवमुदीरितुम् ।
अनुगृहीतोऽस्मि भवतां सर्वदा नात्र संशयः ।
तथापि स्वश्रीकलापश्रवणे यद्वदादरः ॥
श्रोतुं मत्तो यदिष्टं स्याद्वाक्ये शृण्वन्तु मे मतम् ।
इत्युक्त्वान्यानुभूतं यत् वक्तुं प्रारभतादरात् ॥

* * * *

मनुना तर्कवेदान्तकाव्यालङ्कारनाटकाः ।
अन्यानि सर्वशास्त्राणि मनीषाकल्पितानि यत् ॥
तत्रोपलब्धिर्यत्रैव न तद्दृग्गोचरं गतः ।
तस्मात्तस्मिन् विवादानामास्पदं बुद्धिभेदतः ॥
न तथा ज्यौतिषं शास्त्रं यस्मात्प्रत्यक्षगोचरम् ।
तस्मादस्मिन्नाग्रहस्य सुसूक्ष्ममपि कारणम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्माद्विहायाभिमानमुपलब्धं प्रगृह्यताम् ॥

**Colophon:**

इति तटकमलवेङ्कटकृष्णरायकृतौ शास्त्रावतारिका ॥

अथातः श्रीकैरविणीनिकटस्थरमापतेः ।
मन्दिरं मध्यमं स्थानं विधाय गणितागमे ॥
निशार्धकालिकान् खेटान् सायनान् साध्यतेऽधुना ।
अश्विन्यादीनि ऋक्षाणि क्रान्तिवृत्ताश्रितानि वा ॥
अयनाकर्षितं क्रान्तिवलयं वैषुवात् ध्रुवात् ।
पृथक् भ्रमति प्रत्यग्रं गतिवैषम्यतो यतः ॥

* * * *

अथादानांशारम्भस्य कालभेदाः प्रकीर्त्यन्ते—

मञ्जुलार्यब्रह्मगुप्तभास्कराचार्यवर्यकाः ।
कल्पादिसमनेतारः तेषां मतमिहोच्यते ॥
कलौ गजाक्षितर्काग्नि ३६२८ वत्सरेषु गतेषु च ।
निरभ्रके बभूवेति दृश्यते गणितागमे ॥
भूमाधर्मो ५९-५४ तत्परादिर्वर्षस्य गतिरिष्यते ।
अदृष्टत्वाज्जिष्णुजेन शेखरेणैतदीरितम् ॥

* * * *

अधुना बहुधान्यब्दमेषारम्भस्य वत्सराः ।
खखाष्टैका १८०० गता शाके कलौ नन्दाद्रितालकाः ४९७९ ॥
अब्दादौ सायनं चक्रे उत्तरप्रोष्ठपत्पदे ।
द्वितीयेऽस्तीति विज्ञेयं गणितागमकोविदैः ॥
नारी जयायज्ञहेलाविनो ३३८—१-१८-२० मेषादिको भवेत् ।

**End:**

| | द्वि. | त्रि. | च. | पं. |
|---|---|---|---|---|
| पूर्णश्चार्काः पुराणाश्च रामास्सायनमान्दकाः । | ० | १२ | १८ | ३ |
| रत्नं पूर्णं चैकत्रिंशं पञ्च तस्याल्पमध्यमम् । | ९ | ० | ३१ | ५ |
| गुणा आकृतयश्चाष्टत्रिंशन्नेत्रा विलोमकाः । | ३ | २२ | ३८ | २ |

गुरोराकर्षणादस्य दृक्सूत्रस्फुटसाधने ।
चतुर्भिश्चोपकरणैर्विना दृश्यते स्वस्तले ॥
तत्राद्ये सार्धनन्दाग्निकला स्वद्य ऋणात्मकाः ।
द्वितीये शतसङ्ख्यायां षडशीतिरुदाहृताः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तृतीये सप्ततिश्चैव सप्ताशीतिश्चतुर्थके ।
अस्मादन्यतमे वर्षे कोष्ठकोत्थास्तु योजयेत् ॥

प्रथम ऋणात्मकाः कलाः ३९ ५
द्वि. ८६ तृ. ७० च. ८७.

---

## No. 13430. दृग्गणितम्.
## DṚGGAṆITAM.

**Substance, paper.** Size, 10¼ × 6⅜ inches. Pages, 148. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete. Foll. 25 to 213 are written in Telugu language.

Same work as the above.

---

## No. 13431. दृग्गणितम्.
## DṚGGAṆITAM.

**Substance, paper.** Size, 8 × 6⅝ inches. Pages, 3. Lines, 30 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 6*a*. The other works herein are Ravyādisphuṭa 1*a*, Ravyādigatibhēda 9*a*, Āndhradṛggaṇita 20*a*.

Incomplete.

On the preparation of the Hindu calendar by means of direct observation of the heavenly bodies; by Raghunātha of Nungambakam who is stated to have been induced by Kṛṣṇarāya, son of Kanakāmbā, to undertake the task of drawing up the calendar. The author is the originator of what is now called the Nungambakam calendar.

**Beginning :**

श्रीशं प्रणम्याव्ययमादिदेवं रवीन्दुतत्पुत्रसितामरेड्यान् ।
सभौमसौरीन् स्वगुरून् प्रणम्य दृक्सूत्रतन्त्रं विदधाति कृष्णः ॥
श्रीन् विविच्य पुरयन्त्रसाधितान् . . . . स्वनलिकागृहे स्फुटान् ।
नुङ्गपट्टणनलिकागृहान् संविधाय रघुनाथसूरिणा ॥
चोदितेन कनकाम्बसूनुना कृष्णरायगणकेन तद्भुवान् ।
संविशोध्य . . . . . . . . . . . . . . . . . ॥
कल्यादिपूर्णाम्बरशून्यबाण ५००० मेषप्रवेशादिमनो . . . ।
राज्यर्धकालस्य विधाय खेटान् चकार तन्त्रं रघुनाथवर्यः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सषट्सरविमन्दोच्चं तन्मध्यं भागकारिकम् ।
अयनांशं च . . . . . रविस्फुटादिनादिकम् ॥
चन्द्रमध्यं सषड्चेन्दुकेन्द्रं राहोर्ध्रुवं तथा ।
बुधशुक्रकुजेज्यार्किमन्दमध्यमपातकान् ।
तेषां संवत्सरगती दिनानां घटिकाश्रिताः
दृक्सूत्रेण विलोक्यैव चकार कृपया प्रभुः ॥

* * * *

राहोरानयनं यथा--

ज्ञानरामोदीननाथरत्नं २७०-८-५२-०-० पातं विलोमगम् ।
अस्याति . . पार्थाः १६ . . . . . . . ७ ४५-१०-०

**End:**

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| 51 | 846 | 36 | 847 | 27 | 848 | 18 | 849 | 9 | 850 | 0 |
| 52 | 863 | 12 | 864 | 4 | 864 | 56 | 865 | 48 | 866 | 40 |
| 53 | 879 | 48 | 880 | 41 | 881 | 34 | 882 | 27 | 883 | 20 |
| 54 | 896 | 24 | 897 | 18 | 898 | 12 | 899 | 6 | 900 | 0 |
| 55 | 913 | 0 | 913 | 55 | 914 | 50 | 915 | 45 | 916 | 40 |
| 56 | 929 | 36 | 930 | 32 | 931 | 28 | 932 | 24 | 933 | 20 |
| 57 | 946 | 12 | 947 | 9 | 948 | 6 | 949 | 3 | 950 | 0 |
| 58 | 962 | 48 | 963 | 45 | 964 | 44 | 965 | 42 | 966 | 40 |
| 59 | 979 | 24 | 980 | 23 | 981 | 22 | 982 | 21 | 983 | 20 |
| 60 | 996 | 0 | 997 | 0 | 998 | 0 | 999 | 0 | 1000 | 0 |

## No. 13432. दैवज्ञभूषणम्.

### DAIVAJÑABHŪṢAṆAM.

Substance, paper. Size, 11⅜ × 8½ inches. Pages, 664. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Bound in two volumes. Contains 1 to 15 Prakaraṇas.

The following are the subject-headings found at the end of some of the chapters:—

१. संज्ञाप्रकरणम्.
२. पुण्यपुरुषगताब्दाद्यानयनम्.
३. तिथ्यादिप्रयुक्तव्रतनिरूपणम्.
६. व्रततिथिनिर्णयः.
उपाकर्मप्रकरणम्.
८. अधिमासक्षयमासकर्तव्यविवेकप्रकरणम्.
१५. पट्टाभिषेकनिर्णयः.

A treatise dealing with the preparation of a calendar and with the determination of proper time for fasts, feasts and rites ordained in the Smṛtis, etc. By Yanamandra Nṛsiṁhācārya son, of Ahōbalācārya of Kauśikagōtra.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



In giving a rule for finding out the Śaka year the author lays down the formula 60 × 25 + 49 + number of years from the beginning of the cycle. The work must therefore have been written between Śaka 1549 and 1609, i.e., 1626 A.D. to 1686 A.D.

The original from which this MS. was copied bears the following date—23rd September 1858, Thursday, 15th of Bhādrapada full-moon of Kālayukti. The name of the copyist is given to be Nuddum Prasannajōsyulu.

**Beginning:**

श्रीलक्ष्मीशं नमस्कृत्य भास्करं भारतीं गुरुम्
अहोबलार्यपितरं गणेशश्च मुहुर्मुहुः ॥
गोत्रेऽस्मिन् कौशिके जातो येन मन्त्राब्धिचन्द्रमाः ।
नृसिंहसूरिः कुरुते दैवज्ञानां सुभूषणम् ॥
कश्यपादिप्रणीतानि मन्वादिस्मृतिबृन्दकम् ।
ब्रह्माण्डादिपुराणानि वाराहादिनिबन्धनान् ॥
सिद्धान्तानागमान् कल्पानेतान् ग्रन्थान्मनोहरान् ।
आलोक्य विदुषां प्रीत्यै सङ्ग्रहः क्रियतेऽधुना ॥

इह खलु तावद्वेदाङ्गेषु षट्स्वपि ज्यौतिषस्य कालज्ञानहेतुत्वेन श्रेष्ठतमत्वात् कालज्ञानाभावे कस्यापि कर्मणः कर्तुमशक्यत्वात् श्रौतस्मार्तादिसकलकर्माचरणयोग्यताहेतुभूतत्वेन सर्वेपामत्यन्तापेक्षणीयं ज्यौतिषम्,

(पञ्च)संवत्सरमयं युगाध्यक्षं प्रजापतिम् ।
दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा स्थितः ॥

इत्यादिश्लोकरूपं परमकारुणिकः परमेश्वरः प्रणिनाय । तावन्मात्रेण मन्दबुद्धीनां व्यवहर्तुमशक्यत्वादपि सूर्यः पितामहो व्यासादयोऽष्टादशर्षयो ज्योतिश्शास्त्रप्रवर्तकाः सुखावबोधार्थं त्रिस्कन्धरूपेण प्रपञ्चीकृत्य निबन्धनानि चक्रुः । तेष्वप्यावश्यकवचनगवेषणालसानामेकत्र सारं संगृह्य क्रियते । तत्रादौ संवत्सरस्वरूपमाह—

संवत्सरस्वरूपम् ॥

कश्यपः—

संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः ।
इदावत्सरस्तृतीयं च चतुर्थश्चानुवत्सरः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इद्वत्सरः पञ्चमस्तु तत्सङ्घो युगसंज्ञकः ।
युगं स्यात् पञ्चभिर्वर्षैर्युगानि द्वादशैव तु ।
पञ्चघ्नयुगसंख्याकाः प्रभवादय ईरिताः ॥

* * * *

**Colophon :**

इति शयनमन्द्रनरसिंहसूरिविरचितदैवज्ञभूषणे संज्ञाप्रकरणं नाम प्रथमः प्रकाशः ॥

**End :**

बहूनि शास्त्राण्यालोक्य कृतं दैवज्ञभूषणम् ।
विदुषां कण्ठलग्नं यं(चा)चन्द्राकें तत् प्रकाशताम् ॥
निखिलेष्वपि कार्येषु नृसिंहचरणं स्मरन् ।
विपुलां श्रियमाप्नोति दीर्घमायुश्च विन्दति ॥

**Colophon :**

इति श्रीशयनमन्द्राहोबलदैवज्ञात्मजश्रीनृसिंहसूरिविरचिते दैवज्ञभूषणे पट्टाभिषेकनिर्णयो नाम पञ्चदशं प्रकरणम् ॥

---

## No. 13433. दैवज्ञभूषणम्.
## DAIVAJÑABHŪṢAṆAM.

Pages, 17. Lines, 28 on a page.

Begins on fol. *2a* of the MS. described under No. 9993.

Incomplete.

Contains some disconnected stanzas of this work.

**Beginning :**

मृगाद्यं राशिषट्कं यदुत्तरायणसंज्ञकम् ।
याम्यायनं कर्किषट्कं ज्ञातव्यं भानुभुक्तितः ॥
क्रमाच्चैत्रादिमासेषु युग्मेषु ऋतवस्त्वमी ।
वसन्तग्रीष्मवर्षाश्च शरद्धेमन्तशैशिराः ॥

**End :**

मतान्तरे—

यदा भिनत्ति मन्दोऽयं रोहिण्याश्शकटं तदा ।
वर्षाणि द्वादशात्यन्तं वारिवाहो न वर्षति ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13434. दैवज्ञविलासः.
## DAIVAJÑAVILĀSAḤ.

**Pages, 29. Lines, 36 on a page.**

Begins on fol. 24*a* of the MS. described under No. 9993.

Breaks off in the seventh Ullāsa in the Utpātakhaṇḍa.

A comprehensive astrological treatise dealing in 108 Ullāsas with the three subjects of Gaṇita, Hōrā and Saṁhitā. The 108 Ullāsas are classed under 4 Khaṇḍas, viz., Utpātakhaṇḍa, Ullāsas 1 to 63, Kālakhaṇḍa 64 to 77, Karmakhaṇḍa 78 to 105 and Rājanītikhaṇḍa 106 to 108. The author is Lolla Lakṣmīdhara of Śrīvatsagōtra. Kañcam Yallayārya also is said to have written some portions of this work, such as Ullāsas 64 to 67 and 78 to 80. The subject headings of the 108 Ullāsas are given below. Other copies of this work have been described under R. Nos. 421, 1169 and 1641 of the Triennial Catalogue of MSS.

**Beginning :**

अस्मान् पातु गजाननः स भगवान् रत्नाकराणां जले
तुण्डाग्रेण निपीय येन नियतप्रोद्भूयमाने तदा ।
तद्भूमाम्बुचराश्च राशिनिचयास्तारा ग्रहा मैक्तिका
भूत्वा गोलचराश्च चक्रमिषतः कुर्वन्त्यहोरात्रकम् ॥
कलक्काणां वीणां कनकमयकोणां धृतवतीं
लसद्वर्णां वार्णीं मृदुमधुरवाणीं सुनयनाम् ।
सदालम्बामम्बामधरजितबिम्बामनुदिनं
विधेर्जायां ध्येयां निगमगणमेयां मनुमहे ॥
पायादपायाद्भगवान् विवस्वान् कालात्मको नः खचराधिनाथः ।
त्रिलोकदीपस्त्रिगुणस्त्रिमूर्तिः कर्ता क्रियाणां कलिनाशकारी ॥
श्रीशं सर्वचराचरात्मकमजं विष्णुं जगत्कारणं
कालात्मानममेयमादिपुरुषं श्रीवत्सवक्षस्स्थलम् ।
योगिध्येयमनुत्तमं सुविमलं श्रीरामचन्द्रं सदा
सेवे मत्प्रतिपादितार्थविलसद्ग्रन्थस्य सम्पूर्तये ॥
श्रीवत्सगोत्राम्बुधिपूर्णचन्द्रो नत्वा ग्रहान् लोल्लसुलक्ष्मणोऽहम् ।
समस्तशास्त्राद्भुतसारयुक्तं विचित्रवृत्तार्थमृजुं गुणान्वितम् ॥
उल्लाससंज्ञेन सहाष्टकेन शतेन विस्तारितमुल्लसन्तम् ।
वक्ष्यामि दैवज्ञविलासमाढ्यं ज्योतिर्विदां प्रीतिविवर्धनाय ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गर्गाद्यैः पूर्वमुक्तं तदलमिति मतिं मा कृथा विस्तृतत्वात्
दुर्बोधं तत्प्रणीतं न च सकलमितग्रन्थके लक्षभावम् ।
तस्मात्सारं गृहीत्वा सकलमुनिकृताच्छास्त्रतः सर्ववेद्यं
सङ्क्षिप्तं सत्कलापं मृदुपदरचितं ज्यौतिषं वच्मि यत्नात् ॥
एतच्छास्त्रं गणितं होरा-संहितारूपेण त्रिविधम् ।

तथा चोक्तं काश्यपेन—

स्कन्धत्रयात्मकं शास्त्रमाद्यं सिद्धान्तसंज्ञिकम् ।
द्वितीयं जातकस्कन्धं तृतीयं संहिताह्वयम् ॥
ग्रहाणां मध्यमा भुक्तिः स्फुटभुक्तिरनन्तरम् ।
दिक्साधनं ततश्छाया लग्नकालविनिर्णयः ॥
चन्द्रार्कग्रहणं सम्यक्तयोश्च परिलेखनम् ।
समागमो युद्धभेदो भ[ा]ग्रहाणां युतिस्तथा ॥
उदयास्तमयज्ञानं चन्द्रशृङ्गोन्नतानती ।
पातवैधृतयोर्ज्ञानं भूगोलो यन्त्रलक्षणम् ॥
मानक्रिया मानभेदाश्चाद्यस्कन्धे प्रकीर्तिताः ।
राशिभेदः खेटयोनिर्वियोनिर्जन्मलक्षणम् ।
निषेको जननं पुंसामरिष्टं भङ्गलक्षणम् ॥
आयुर्दायो दशाभेदा भेदाश्चान्तर्दशासु च ।
अष्टवर्गः कर्मजीवो राजयोगाश्च नाभसाः ॥
चन्द्रयोगा द्विग्रहाद्या प्रव्रज्यायोगसम्भवाः ।
राशिशीलं दृष्टफलं फलं भावफलं तथा ॥
आश्रयाख्याश्च ये योगा योगाः सङ्कीर्णसम्भवाः ।
स्त्रीजातकं नष्टयोगो निर्माणं नष्टजातकम् ॥
द्रेक्काणाश्च क्रियायोगा द्वितीयस्कन्धसम्भवाः ॥
आदौ शास्त्रोपनयनं खेटचारोऽब्दलक्षणम् ।
तिथिवासरनक्षत्रयोगतिथ्यर्थलक्षणम् ॥
मुहूर्तोऽवग्रहः सूर्यसङ्क्रान्तिर्गोचरक्रमः ।
चन्द्रताराबलं चैव क्रियाः षोडशकर्मणाम् ॥
छुरिकाबन्धनं यात्राप्रवेशः सद्मलक्षणम् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अग्न्याधानं मेघगर्भो निखिलोत्पातलक्षणम् ॥
तच्छान्तिर्मिश्रकाध्यायस्तृतीयस्कन्धसम्भवाः ॥
ज्योतिश्शास्त्रप्रणेतारश्चैते सूर्यः पितामहः ।
व्यासो वसिष्ठो . . . . . . त्रिपराशराः ॥
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः ।
रोमशः पुलहश्चैव च्यवनो यवनो भृगुः ॥
शौनकोऽष्टादशैवेते ज्योतिश्शास्त्रप्रवर्तकाः ।
सर्वेषु शास्त्रेष्वपि विद्यमानेष्विदं तदर्थं प्रतिपादयन्ति ।
एते महान्तो निगमाङ्गताया विज्ञानधर्मादिफलप्रदत्वात् ॥
एवमुक्तं हि मुनिभिः प्रत्येकं स्कन्धकत्रयम् ।
मयोच्यते च तत्सारं सङ्गृह्यात्र यथामात ॥
शास्त्रनिरूपणमाद्यं कालनिरूपणं च दैवविल्लक्ष्म ।
राशिस्वरूपकं च ग्रहयोनिविभेदोऽङ्ककाद्युदयः ॥
भूगोलं रविचारशशिकुजबुधजीवशुक्रशनिचाराः ।
राहोश्चारः खेचरयुद्धं तेषां समागमश्च कूटं च ॥
* * * *
पैतृकविधिरथ नृपतेरभिषेकः शास्त्रकर्मोपचारः ।
इत्यष्टोत्तरशतकोल्लासात्मकमेतदुज्ज्वलं शास्त्रम् ॥
अत्रादितो भूमिपतेश्च दण्डयात्रान्तमुत्पातकखण्डमाद्यम् ।
अब्दादिनाति(यनादि)प्रथमार्तवान्तं खण्डं द्वितीयं खलु कालवेद्यम् ॥
आधानतः श्राद्धविधानकान्तं तृतीयकं कर्मसमाख्यखण्डम् ।
नृपाभिषेकादिकमप्यशेषं चतुर्थकं राजचरित्रखण्डम् ॥
उत्पातखण्डे प्रथमे प्रमाणं श्लोकायुतं चैकशताधिकं स्यात् । १०१००
श्लोकाः शतोनत्रिसहस्रसङ्ख्याः २९०० खण्डे द्वितीये खलु कालवेद्ये ॥
कर्माख्यखण्डे द्विशतोत्तराणि श्लोकाः सहस्राणि दश प्रदिष्टाः । १०२००
श्लोकास्तथा राजचरित्रखण्डे शताष्टकं चाष्टसहस्रयुक्तम् ॥ ८८००

**Colophon:**

इति सकलविबुधमनोहरबन्धुजनचिन्तामणिज्यौतिषसार्वभौमपञ्चाग्निदीक्षितलोल्लक्ष्मणार्यविरचिते दैवज्ञविलासनाम्नि ग्रन्थे शास्त्रनिरूपणं नाम प्रथमोल्लासः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



I. उत्पातखण्ड.

१. शास्त्रनिरूपण.
२. कालनिरूपण.
३. दैवज्ञलक्षण.
४. राशिस्वरूप.
५. ग्रहयोनिभेद.
६. अङ्कायुदय.
७. भूगोललक्षण.
८. रविचारलक्षण.
९. चन्द्रचारलक्षण.
१०. कुजचारलक्षण.
११. बुधचारलक्षण.
१२. गुरुचारलक्षण.
१३. शुक्रचारलक्षण.
१४. शनिचारलक्षण.
१५. राहुचारलक्षण.
१६. ग्रहयुद्धलक्षण.
१७. ग्रहसमागमलक्षण.
१८. ग्रहकूटलक्षण.
१९. ग्रहशृङ्गाटकलक्षण.
२०. सप्तर्षिचारलक्षण.
२१. केतुचारलक्षण.
२२. प्रतिसूर्यलक्षण.
२३. इन्द्रधनुर्लक्षण.
२४. गन्धर्वनगरलक्षण.
२५. उल्कापातलक्षण.
२६. भूकम्पलक्षण.
२७. ग्रहपरिवेषलक्षण.
२८. दिग्दाहलक्षण.
२९. रजोलक्षण.
३०. निर्घातलक्षण.
३१. सन्ध्यालक्षण.
३२. इन्द्रध्वजलक्षण.
३३. त्रिविधोत्पातशान्ति.
३४. देवतोत्पातलक्षण.
३५. अग्न्युत्पातलक्षण.
३६. वृक्षोत्पातलक्षण.
३७. वृष्ट्युत्पातलक्षण.
३८. प्रसवसंभवोत्पातलक्षण.
३९. गोवृषभोत्पातलक्षण.
४०. गजोत्पातलक्षण.
४१. यानकेतुरथाद्युत्पातलक्षण.
४२. नानाखगमृगशकुनकजोत्पातलक्षण.
४३. देशदुर्निमित्तोत्पातलक्षण.
४४. सकलगेहजनितोत्पातलक्षण.
४५. औत्पातिकफलकालनिश्चय.
४६. देहोद्भूतसकलदुष्टोत्पातलक्षण.
४७. स्वप्नशान्तिलक्षण.
४८. नवग्रहप्रार्थनलक्षण.
४९. पर्जन्यहोमलक्षण.
५०. सस्योत्पत्तिलक्षण.
५१. अर्घसमृद्धिलक्षण.
५२. पुष्पफलवृद्धिलक्षण.
५३. कृषिकर्मलक्षण.
५४. बीजावापलक्षण.
५५. वृक्षगुल्मलताद्यारोपण.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



५६. वनप्रतिष्ठा.
५७. वापीकूपादिविधि.
५८. देवालयकर्म.
५९. देवालयप्रतिष्ठा.
६०. वास्तुलक्षण.
६१. गृहप्रवेशलक्षण.
६२. दौर्गिकाविन्यास.
६३. दण्डयात्रा.

II. कालखण्ड.

६४. अब्दनिर्णय.
६५. अयननिर्णय.
६६. ऋतुनिर्णय.
६७. मासनिर्णय.
६८. मलमासनिर्णय.
६९. तिथिनिर्णय
७०. नक्षत्रनिर्णय.
७१. वासरयुगनिर्णय.
७२. करणनिर्णय.
७३. मुहूर्तनिर्णय.
७४. लग्नक्रिया.
७५. गोचारनिर्णय.
७६. सङ्क्रान्तिनिर्णय.
७७. प्रथमार्तवनिर्णय.

III. कर्मखण्ड.

७८. आधान.
७९. पुंसवनसीमन्त.
८०. नानाजातकविधि.
८१. नामकरण.
८२. बालकृत्य.
८३. अन्नप्राशन.
८४. वर्णस्वीकार.
८५. उपनयन.
८६. अध्ययन.
८७. समावर्तन.
८८. गोत्रप्रवर.
८९. मातुलसुतोद्वाह.
९०. देशविधि.
९१. स्त्रीपुंलक्षण.
९२. स्त्रीपुंकूट.
९३. कालविशुद्धि.
९४. गुरुसितमूढादित्यार्थसिंहगुर्वादिदोष.
९५. तद्भङ्ग.
९६. गुणनिरूपण.
९७. योगविधि.
९८. अवयोगविधि.
९९. जलयन्त्रादि.
१००. कन्यकावरण.
१०१. अङ्कुरार्पण.
१०२. विवाह.
१०३. वधूप्रवेश
१०४. गृहस्थकर्म.
१०५. पैतृकविधि.

IV. राजनीतिखण्ड.

१०६. नृपाभिषेक.
१०७. शास्त्रकर्म.
१०८. नृपचार.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13435. दैवज्ञविलासः.
## DAIVAJÑAVILĀSAḤ.

Substance, palm-leaf. Size, 14¼ × 1¼ inches. Pages, 61. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the 59th and the 60th Ullāsas.

Same work as the above.

Name of he copyist—Mājēṭi Sarvēśaliṅga. Date of copying—Tuesday (Jayavāra) the 13th day of the dark fortnight of the Caitra month in the year Pramōdūta.

**Beginning :**

अथ दैवज्ञविलासे देवालयप्रतिष्ठादिलक्षणमाह —

वराहः—

यत्र प्रभूतं सलिलमारामश्च विराजते ।
तत्र देवालयं कुर्यान्महाधर्माभिवृद्धये ॥
इष्टापूर्ताश्च लभ्यन्ते ये लोकस्थां बुभूषता ।
देवानामालयः कार्यो ह्ययमत्रैव दृश्यते ॥

* * * *

**Colophon :**

इति बुधजनपारिजातलोल्लक्ष्मणयज्वविरचिते दैवज्ञविलासनाम्नि ग्रन्थे एकोनषष्टितमोऽध्यायः ॥

**End :**

एते चतुर्दशविधाः म्लेच्छा वै वेददूषकाः ।
संव्याप्य निखिलां भूमिं भविष्यन्ति कलौ युगे ॥
षट्पञ्चाशत्प्रभेदाश्च वर्णाः प्रोक्ता वरानने ।
एतेष्वपि च संभेदाः सन्ति तच्छृणु पार्वति ॥

**Colophon :**

इति दैवज्ञविलासे नानावर्णप्रभेदविवेकः ॥

* * * *

एवं सङ्करवर्णानां जनानां जन्मलक्षणम् ॥

---

## No. 13436. दैवज्ञविलासः.
## DAIVAJÑAVILĀSAḤ.

Substance, palm-leaf. Size, 13 × 1¼ inches. Pages, 48. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

The leaves are taken from various parts of a copy of the MS. The first leaf is numbered 20 and the last 166. It contains portions with their colophons of Ullāsas 64 to 67 and certain other portions also.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Same work as the above. The colophons give the name of Kañcam Yallārya to be the author of the portion contained in the MS.

**Colophon:**

इति सकलविबुधपारिजातकञ्चमुयल्लार्यविरचिते दैवज्ञविलासनामग्रन्थे . .
. . . अब्दलक्षणं संवत्सरफलं राजाधिफलनिर्णयो नाम चतुष्षष्टितमोल्लासः ॥

---

## No. 13437. दैवज्ञविलासः.
## DAIVAJÑAVILĀSAḤ.

Substance, paper. Size, 13¼ × 8 inches. Pages, 359. Lines, 25 on a page. Character, Telugu. Condition, good. Appearance, new.

Breaks off in the 56th Ullāsa.

Same work as the above.

---

## No. 13438. पञ्चाङ्गम् (प्रभवादि).
## PAÑCĀṄGAM (PRABHAVĀDI).

Substance, palm-leaf. Size, 15½ × 1 inches. Pages, 27. Lines, 3 on a page. Character, Grantha and Tamil. Condition, injured. Appearance, old.

Incomplete.

This gives the names of the cyclic years commencing with Prabhava, also the names of the months, Ṛtus (seasons), fortnights, days of the week, Yōgas, Karaṇas, position and movement of the planets, formula for finding out the time by the observation of constellations, etc.

**Beginning:**

प्रभव, विभव, शुक्ल, प्रमोदूत, प्रजोत्पत्ति, आङ्गिरस, श्रीमुख, भव, युव, धातु, ईश्वर, बहुधान्य, प्रमाथी, विक्रम, विषु.

**End:**

अङ्ग, वङ्ग, कलिङ्ग, काश्मीर, काम्भोज, कर्णाट ॥

---

## No. 13439. पञ्चाङ्गम्—(शार्वरि).
## PAÑCĀṄGAM (ŚĀRVARI).

Substance, palm-leaf. Size, 17⅛ × 1 inches. Pages, 44. Lines, 4 on a page. Character, Telugu and Tamil. Condition, injured. Appearance, old.

Incomplete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



The calendar of the year Śārvari, Kali 4941. It is said to have been drawn up by Candraśēkhara, son of Subbārya of Vellāla family in Tanjore when Śivāji, son of Śarabhoji of the Bhonsale family was reigning there.

**Beginning :**

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
श्रीमत्तञ्जानगर्यां विरचितविहृतेः शासतश्चोल्लसीमां
तत्तादृग्भोसलीयान्वयजलधिविधोः केलिधाम्नो गुणानाम् ।
शकश्रीतुल्यसम्पच्छरभनृपतिजश्रीशिवाजीनृनेतुः
पञ्चाङ्गं (सं)प्रणीतं जगति विजयतामेतदाचन्द्रतारम् ॥
श्रीमत्तञ्जपुरे वसन् द्विजवरो वेल्लालवंशाम्बुधेः
जातः श्रीमदुमामहेश्वरकृपापाङ्गैर्दितो(?) (धितः)पेशलः ।
सुब्बार्यात्मजचन्द्रशेख(र)सुधीविद्वज्जनानन्दनः
पञ्चाङ्गं कलयत्यसौ बहुमतस्सिद्धान्तरीत्या स्फुटम् ॥

विन्ध्यस्योत्तरदेशे बार्हस्पत्यमानाब्दो ग्राह्यः । दक्षिणदेशे चान्द्रसौरमास्या-(नाब्दो)ग्राह्यः । बार्हस्पत्यमाने साधारणसंवत्सरः चान्द्रसौरमानाभ्यां शार्वरी-नामसंवत्सरः । सर्वत्र गुरूदयाब्दवशात् वैशाखाब्दः.

**End :**

१४. बु. १२½. श्र. ४९½. सौ. ५६½. प. १२½. रा. २½. म. ३. शु. ३९. रिगुश्रावणं ते ३०.

---

No. **13440.** पञ्चाङ्गम् (प्लवङ्ग).

PAÑCĀṄGAM (PLAVAṄGA).

Substance, palm-leaf. Size, $8\frac{5}{8} \times 1$ inches. Pages, 71. Lines, 6 on a page. Character, Grantha and Tamil. Condition, fair. Appearance, old.

Complete.

Contains the calendar for the year Plavaṅga, Kali 4948 (1847-48 A.D.). A few pages relating to the Kīlaka year are added at the end.

**Beginning :**

अथ संवत्सरफलम्—
प्लवङ्गाब्दे सस्यहानिः श्वासरोगात् मृते नरः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मध्यवृष्टिः क्षितिः पीनां . . . घाश्च परस्परम् ॥

* * * *

१. ति. द्वा. ३२. श. १२. शु. ११. कौ. ९. तै. २७. दि. २७. विषु-पुण्यकालः. वृद्ध्यार्घः. . . . ३०. ३१. वाक्यं ध्रुवम्. तु. १. शु. १-२. शून्य-तिथि. महाप्रदोषम्. ग्रहमालिन्या.

**End:**

३०. ति. स. २१. ति. ६. अ. १०. व. २१. रा. ९. उभा. २. बु. ४६. दिमा.

कीलक—१ शे. अ. १८½. पु. ५½. सु. ९. शस. १८. दि. २५. मेषेऽर्कः. ३. विषुपुण्यकालः शून्यार्घः. अह. ३०. वाक्यं ध्रुवम्.

* * * *

३०. व्या न. ४७।।।. म. ३३. धृति. १९½. बा. १९½. रा. १६।।।. भ. ४. बु. १४½.

---

No. 13441. पञ्चाङ्गम्—(पिङ्गल).

PAÑCĀṄGAM (PIṄGALA).

Pages, 72. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 3587.

Complete.

Contains the calendar for the Piṅgala year without introductory stanzas.

**Beginning:**

मेषम्—

१. श. द्वि. ३१. स्वा. ११. वं. १२. तै. २. दि. २६. मेषेऽर्कः. २३. विषुपुण्यकालः समार्घः. अह. ३०. वाक्यं ध्रुवम्.

**End:**

३१. ना. द्वा. ५. पू. ५०. बा. ४९. तै. ५. दि. ५. मेषेऽर्कः. ३८. विषुपुण्यकालः. व्यप्रः. निर्गः. १३. शून्यतिथि. वरा जयन्ती. राहुलत्ते. १. ति. त्र. ९. उ. ति. ४८. मा. ४३. व. ५. दि. ०. समार्घः वाक्यं ध्रुवम्.

---

No. 13442. पञ्चाङ्गम्—(कालयुक्ति).

PAÑCĀṄGAM (KĀLAYUKTI).

Substance, palm-leaf. Size, 10½ × 1¼ inches. Pages, 56. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Contains the calendar for the year Kālayukti Śaka 1780 (1858-59 A.D.), prepared under the order of Śivāji, son of Sarabhōji of Tanjore according to the Vākyas, at Kañjanūr near Tanjore by Aṇṇāvaiyaṅgār, son of Appanārya of Ātrēyagōtra and Bōdhāyanasūtra.

**Beginning:**

वागीशाद्यास्सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्यास्स्युस्तं नमामि गजाननम् ॥
श्रीमत्तञ्जानगर्यां विरचितविहृतेः शासतश्चोलसीमां
तत्ताहम्भोसलीयान्वयजलधिविधोः केलिधाम्नो गुणानाम् ।
शकश्रीभूरिसम्पच्छरभसुतशिवक्ष्मापतेराज्ञयेदं
पञ्चाङ्गं निष्कलङ्कं जगति विजयतामेतदाचन्द्रतारम् ।
श्रीमत्कंसपुरे वसन् द्विजवरस्त्रिस्कन्धपारङ्गतः
श्रीबोधायनसूत्रवान् विमलधीरात्रेयगोत्रोद्भवः ।
अप्पनार्यसुतस्त्रिकालमतिमानण्णावयङ्गारिदं
पञ्चाङ्गं प्रतिवत्सरं वितनुते वाक्यप्रकारेण सः ॥

विन्ध्यस्योत्तरदेशे बार्हस्पत्यमानाब्दा ग्राह्याः । दक्षिणदेशे सौरचान्द्रमानाब्दा ग्राह्याः । बार्हस्पत्यमानेन विभवनामसंवत्सरः । सौरचान्द्रमानाभ्यां कालयुक्तिनामसंवत्सरः । सर्वत्र गुरूदयाब्दवशात् कार्तिकाब्दः । अस्य संवत्सरस्य शालीवाहनशकाब्दाः १७८०.

अथ संवत्सरफलम्—

अतिवृष्टिः कालयुक्तिवत्सरे सुखिनो जनाः ।
वसन्ति ये च सस्यानि सम्पूर्णानि तथा द्रुमाः ॥

**End:**

३०. ति. नव-४७, पुष्य, ४४. धृ. ४३. बा. २०. दि. ५. मेषेऽर्कः. ५४. शत. ४. शु. १०. शून्यतिथिः. श्रीरामनवमी. श. ४७.

**Colophon:**

कालयुक्तिनामसंवत्सरपञ्चाङ्गं कञ्जनूरुवाक्यं எழுதி முடிஞ்சுது.

---

No. **13443.** पञ्चाङ्गम्—(कालयुक्ति).

PAÑCĀṄGAM (KĀLAYUKTI).

Substance, palm-leaf. Size, $12\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 61. Lines, 5 on a page. Character, Grantha and Tamil. Condition, good. Appearance, new.

Same work as the above, without the introductory stanzas.

Breaks off in the Dhanurmāsa.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13444. पञ्चाङ्गकल्पलता.
## PAÑCĀṄGAKALPALATĀ.

Substance, paper. Size, $12\frac{7}{8} \times 6\frac{3}{4}$ inches. Pages, 50. Lines, 13 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, old.

A set of astronomical tables and calculations specially useful for preparing calendars.

**Beginning:**

अथ पञ्चाङ्गकल्पलता लिख्यते तत्रादौ तिथिप्रकारान्तरमिताङ्कचक्रम् ।

| 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 | 10 | 11 | 12 | 13 | 14 | 15 | 16 | मिता. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| 11 | 22 | 3 | 14 | 25 | 6 | 17 | 28 | 9 | 20 | 1 | 12 | 23 | 4 | 15 | 27 | तिथयः. |
| 7<br>1<br>55 | 14<br>3<br>51 | 21<br>5<br>46 | 00<br>7<br>51 | 7<br>9<br>46 | 14<br>11<br>41 | 21<br>13<br>36 | 00<br>15<br>41 | 7<br>17<br>37 | 14<br>19<br>31 | 22<br>1<br>26 | 1<br>3<br>31 | 8<br>5<br>26 | 15<br>7<br>21 | 22<br>9<br>20 | 2<br>11<br>20 | केन्द्रः. |
| 1<br>11<br>42 | 2<br>23<br>23 | 3<br>35<br>5 | 4<br>46<br>47 | 5<br>58<br>28 | 0<br>10<br>10 | 1<br>21<br>52 | 2<br>33<br>34 | 3<br>45<br>15 | 4<br>56<br>57 | 5<br>8<br>38 | 0<br>20<br>20 | 1<br>32<br>2 | 2<br>43<br>43 | 3<br>55<br>25 | 6<br>6<br>12 | वारादि. |

**End:**

राजा भृगुः.

| मे. | वृ. | मि. | क. | सि. | क. | तु. | वृ. | ध. | म. | कु. | मी. | राशि. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| 2<br>8 | 11<br>14 | 14<br>11 | 8<br>11 | 11<br>5 | 14<br>11 | 11<br>14 | 2<br>8 | 5<br>14 | 8<br>8 | 8<br>8 | 5<br>14 | कृ.<br>108 |
| 11<br>5 | 5<br>14 | 11<br>11 | 5<br>8 | 8<br>5 | 11<br>11 | 5<br>14 | 11<br>5 | 8<br>11 | 2<br>14 | 2<br>14 | 8<br>11 | शु.<br>120 |

For Private and Personal Use Only

राजा शनिः.

| मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. | राशि. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| 14 | 8 | 11 | 5 | 8 | 11 | 8 | 14 | 2 | 5 | 5 | 2 | कृ. |
| 14 | 8 | 5 | 5 | 14 | 5 | 8 | 14 | 8 | 2 | 2 | 8 | 108 |
| 8 | 2 | 8 | 2 | 5 | 8 | 2 | 8 | 5 | 14 | 14 | 5 | श्रु. |
| 5 | 14 | 11 | 8 | 5 | 11 | 14 | 5 | 11 | 11 | 11 | 11 | 120 |

## No. 13445. पञ्चाङ्गगणितम्.
## PAÑCĀṄGAGAṆITAM.

**Pages, 14.** Lines, 22 on a page.

Begins on fol. 94*a* of the MS. described under No. 13397.

Incomplete.

Similar to the work described under R. No. 663(*c*) of the Triennial Catalogue of MSS., Vol. I, Part I-C.

## No. 13446. पञ्चाङ्गगणितम्.
## PAÑCĀṄGAGAṆITAM.

Substance, palm-leaf. Size, 12⅜ × 1⅝ inches. Pages, 22. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 62*a*. The other works herein are Pañcāṅgavākya 1*a*, Vākyakaraṇa 6*a*, Kālavidhānapaddhati 26*a*, Kālanirṇayagrantha 73*a*, Varṣādiviṣayagrantha 106*a*.

Incomplete.

Same work as the above.

## No. 13447. पञ्चाङ्गगणितविषयः.
## PAÑCĀṄGAGAṆITAVIṢAYAḤ.

Substance, paper. Size, 11⅛ × 8⅛ inches. Pages, 42. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol 1*a*. The other work herein is Jātakapaddhativyākhyā 22*a*.

On certain details required for the preparation of the Hindu calendars.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

नीत्वा मध्यं विलिप्ताविधिकमुरुधराद्याप्तहीने ध्रुवाढ्ये
क्षिप्त्वास्मिन् देशभेदं रविभुजचरयोर्हीपशाद्योभेदम्(?) ।
हत्वा मध्यात्मभुक्त्या ननु तवरहृतं तत्तुलाजादितं स्या-
त्स्वर्णं मध्ये स्वतुङ्गं त्यजतु पुनरता(?) पूर्णदोऽजा(ज्यां)विजह्यात् ॥
शिष्टज्याविकलाहतस्तथिसटामासेश्वरो हारको
दोर्ज्यां नीतिहतामनेन विभजेल्लब्धं तु कोट्यां त्यजेत् ।
तां नेत्रास्यहतां हरेत्फलयुता दोर्ज्या स्ववृत्ताहता
नन्दाप्ता खलु चापिता धनमृणं मध्ये तु लाजादितः ॥

* * * *

मार्ताण्डे ग्रहतोऽधिके ग्रहरवी सूर्योदये तौ स्फुटी-
कुर्यादस्तमयेऽन्यथापुनरिमं मौढ्यं तयोरन्तरे ॥
इति चन्द्रार्कगणनक्रिया ॥

**End :**

ग्राह्योऽन्त्यगृहान्त्येऽर्के भूगोदृग्गोलके च शीतांशुः ।
भूबिम्बार्कादैक्यं भौमश्चान्द्रिर्नृणामिनो ज्ञेयः ॥

* * * *

आम्रं सुपूर्णं नगरेऽत्र जीवः जानात्यवासुर्निरयं सुशुक्रः ।
उपेन्द्रगुप्तः खलु नाट्यमार्किः सहस्रघस्रे रविमुख्यमध्याः ॥

**Colophon :**

इति दृक्परहितम् ॥

---

No. **13448.** पञ्चाङ्गनिर्णयकौमुदी.

PAÑCĀṄGANIRṆAYAKAUMUDĪ.

Pages 68. Lines, 22 on a page.

Begins on fol. 107*a* of the MS. described under No. 13397.

Complete.

A treatise giving the required rules for the preparation of the Hindu calendar.

**Beginning :**

अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने ।
समस्तजगदाधारमूर्तये ब्रह्मणे नमः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वयम्भुवा पुरा सृष्टं चक्षुर्भूतं द्विजन्मनाम् ।
वेदाङ्गं ज्यौतिषं ब्रह्म समं वेदैर्विनिस्सृतम् ॥

अस्य शास्त्रस्य सम्बन्धाभिधेयप्रयोजनान्युच्यन्ते । सिद्धान्तजातकसंहिताभेदेन स्कन्धत्रयात्मकमित्यभिधेयम् । तत्कालनिर्णयः प्रयोजनान्युच्यन्ते । तत्र ग्रहगणनज्योतिश्चक्रभ्रमणपञ्चाङ्गधरणीसंस्थानादेः प्रतिपादको(कः) सिद्धान्तस्कन्धः प्रथमः । कर्मवशेन जातस्य जन्मलग्नवशात् तस्य कर्मायुर्दायनिर्याणादेः प्रतिपादको जातकस्कन्धो द्वितीयः । अस्य होरेति च परिभाषा । त्रिविधोत्पातवशात् जगच्छुभाशुभप्रतिपादकः शाखाशब्दवाच्यः संहितास्कन्धस्तृतीयः । एतैस्त्रिभिः स्कन्धैर्बहुशो विप्रकीर्णेऽस्मिन् शास्त्रे द्विजस्याधिकारः । अस्य प्रयोजनम्—

वनं समाश्रिता ये च निर्ममा निष्परिग्रहाः ।
अपि ते परिपृच्छन्ति ज्योतिषां गतिकोविदान् ॥
किमुतान्य इत्यर्थः ।

* * * *

सर्वेषामेव जन्तूनां शतमेवायुरुच्यते ।
तत्रोच्छ्वासः प्राणकालः सर्वस्यैष विनिर्णयः ॥
साङ्गोपाङ्गं वत्सरस्य ब्रह्मणो जन्मतः फलम् ।
ये शृण्वन्ति क्रतुफलं प्राप्नुवन्ति न संशयः ॥

**End:**

कूपप्रारम्भलग्नेषु एकद्वित्रिचतुष्टये ।
यत्र पापग्रहस्थित्या तत्र पाषाणदृश्यते ॥

* * * *

पञ्चाङ्गं परमं पवित्रमतुलं पापघ्नमिष्टार्थदं
गङ्गास्नानफलप्रदं ग्रहगणप्रीतिप्रदं मङ्गलम् ।
नित्यानन्दकरं जनप्रमुदितं विद्याभिवृद्धिप्रदं
पुत्रोत्पत्तिकरं नरेन्द्रसहितं पञ्चाङ्गमाकर्ण्यताम् ॥

The scribe adds—

रौद्रिनामसंवत्सरपुष्यशुक्लतृतीयेन्दुवासरे पञ्चाङ्गनिर्णयकौमुदी लिखितं पूर्तिमयात् ॥ ८ शाक. १७८३.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **13449.** पञ्चाङ्गवाक्यम्.

PAÑCĀṄGAVĀKYAM.

Substance, palm-leaf. Size, 8⅜ × 1½ inches. Pages, 14. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 4*a*. The other works herein are Saṅkrāntivākya 1*a*, Vākyagaṇita 11*a*, Sarvatōbhadracakra 16*a*.

Complete.

Same work as that described under R. No. 457(*e*) of the Triennial Catalogue of MSS., Vol. I, Part I-B, wherein this work has been named Vararucivākya.

**End:**

मन्त्रितं प्राज्ञाय । अभेद्यनं पूज्यः । श्रोत्रियप्रियस्य । मङ्गलम् ।
कवेश्शक्यम् । भवेत्सुखम् । अत्तु वाक्यम् ।

यद्वाक्येऽक्षरसन्देहः तद्वाक्यैर्देवैरेस्त्यजेत् ।
भवेत्सुखं शेषवाक्ये तत्त्वसन्देहमोक्षकृत् ॥

No. **13450.** पञ्चाङ्गवाक्यम्.

PAÑCĀṄGAVĀKYAM.

Pages, 14. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 13401.

Wants the beginning; otherwise complete.

Same work as the above.

No. **13451.** पञ्चाङ्गवाक्यम्.

PAÑCĀṄGAVĀKYAM.

Pages, 10. Lines, 24 on a page.

Begins on fol. 1*a* of the MS. described under No. 13402.

Complete.

Same work as the above.

No. **13452.** पञ्चाङ्गवाक्यम्.

PAÑCĀṄGAVĀKYAM.

Pages, 9. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13446.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13453. पञ्चाङ्गवाक्यम्, आन्ध्रटीकासहितम्.

## PAÑCĀṄGAVĀKYAM WITH TELUGU MEANING.

**Pages, 9.** Lines, 22 on a page.

Begins on fol. 89*a* of the MS. described under No. 13397.

Complete.

Same work as the above.

---

## No. 13454. पञ्चाङ्गवाक्यम्, केरलटीकासहितम्.

## PAÑCĀṄGAVĀKYAM WITH MALAYĀLAM MEANING.

Substance, palm-leaf (Śrītāla). Size, 14 × 1¾ inches. Pages, 10. Lines, 7 on a page. Character, Malayālam. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Pañcāṅgagaṇanaviṣaya (Malayālam) 6*a*.

Complete.

Same work as the above.

---

## No. 13455. पञ्चाङ्गसाधनसङ्गतिः.

## PAÑCĀṄGASĀDHANASAṄGATIḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 43*a* of the MS. described under No. 235.

Incomplete.

On certain details useful for the preparation of the Hindu calendar. This treatise was apparently written within 60 years after Śaka 1669 (Kali 4848).

**Beginning:**

षष्टिरेकविंशतिगुणितं ऽव्यपगतसंवत्सरेण संमिश्रम् ।
नवगगनाब्धिसमेतं शकनृपकालं विजानीयात् ॥
अशीतिनिहताः षष्टिर्गजवेदसमन्वितम् ।
प्रभवाद्यब्दसंयुक्तं भवेयुः कलिवत्सराः ॥

**End:**

पञ्चाङ्गसाधनं—

तौलास्संचरनेत्रैतस्सामैः तालतत्त्वपत्रासरैः ।
परिवृत्त्यब्दमासैर्वा वाराश्च परिगण्यते ॥
षट्त्रिंशभिर्दिनैर्मासं व्यष्टमासास्तु वर्षकम् ।
षट्त्रिंशद्वर्षकं प्रोक्तं मण्डलं शर्करेण तु ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13456. परहितगणितम्.
## PARAHITAGAṆITAM.

Pages, 13. Lines, 24 on a page.

Begins on fol. 72*b* of the MS. described under No. 13402.

Incomplete.

On the preparation of the Hindu calendar based upon certain statements of Vararuci.

**Beginning:**

प्रणम्य जानकीनाथं शुक्लाम्बरधरं शुचिम् ।
स्फुटं परहितं वक्ष्ये ग्रहाणां बालबोधनम् ॥
राज्यपालो हि तुष्टेति त्यजेच्छुद्धदिने ध्रुवम् ।
तच्छेषं खण्डशेषाख्यं कुजवारादिकं दिनम् ॥
तत्कालघटिकायुक्तं गुणयेत्तदशेषतः ।
तत्तद्गुणकवाक्यस्य स्थानवर्णोक्तसङ्ख्यया ॥
हत्वा हारकवाक्येन लब्धास्स्युः पूर्वराशयः ।
तच्छेषं गुणयेत्पश्चात् राशी भागकलाक्रमात् ॥

**End:**

अयनांशम्—

शकाब्दाः कौरवैरूनाः गानसङ्ख्यागुणीकृताः ।
नानरैराहता भागाः लिप्तास्स्युरयनांशकाः ॥

एतद्रविस्फुटे कलाक्रमेण युक्तं चेत् सायनांशरविस्फुटं भवति.

---

## No. 13457. परहितगणितम्.
## PARAHITAGAṆITAM.

Pages, 18. Lines, 7 on a page.

Begins on fol. 80*a* of the MS. described under No. 13401.

Incomplete.

Same work as the above.

---

## No. 13458. बीजगणितम्, सव्याख्यानम्.
## BĪJAGAṆITAM WITH COMMENTARY.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 278. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Contains up to the end of the Vargaprakṛticakranāla.

The Bījagaṇita (Algebra) of Bhāskara, son of Mahēśvara, together with a commentary entitled Kalpalatāvatāra on the metrical portion thereof. The commentator was Kṛṣṇamiśra, son of Ballāla. He was the disciple of Viṣṇu who was the pupil of Nṛsiṁha (nephew of Gaṇeśa, son of Kēśava). The commentator states that Bhāskarācārya lived in Jaḍaviḍanagara. A copy of the commentary is described under No. 2827 of the India Office Library Catalogue, Part V.

Date of copying—18th Paṅguni in Vibhava year, Śaka 1791.

**Beginning:**

शिवयोर्भजनातिगौरवाद्यत् सुतलीलाधृतकुञ्जरास्यरूपम् ।
अपहन्तु ममान्तरं तमस्तत् सततानन्दमयं महो महीयः ॥

यदीयचरणाम्भोजस्मर्तुः सकलसिद्धयः ।
भवन्ति वशवर्तिन्यः सिद्धेशीं तामहं भजे ॥

मिहिरमिव वराहमिहिरं वन्दे संदेहभेदिनं जगताम् ।
ज्योतिश्चक्रविभावनहेतुं जगदेकचक्षुरक्षुद्रम् ॥

कविवृद्ध(बुध)जनमूर्धनि स्फुरन्तं कविवृद्ध(बुध)संततसेवनीयपार्श्वम् ।
गणितनिपुणतां प्रवर्तयन्तं प्रणमत भास्करमीप्सितार्थसिद्ध्यै ॥

कदापि नैव सम्भ्रमं स्थितश्च भौममण्डले ।
अपूर्वमार्गमाश्रयन् जयत्यपूर्वभास्करः ॥

आसीदसीमगुणरत्ननिदानकुम्भः कुम्भोद्भवाभरणदिग्ललनाललामः ।
आशैशवार्जितविशेषकलानुवर्ती श्रीकेशवः सुगणितागमचक्रवर्ती ॥

तस्मादभूद्भुवनभूषणभूतमूर्तिः श्रीमानगण्यगुणगौरवगेयकीर्तिः ।
ज्योतिर्विदागमगुरुर्गुरुसंप्रदायप्रज्ञातशास्त्रहृदयः सदयो गणेशः ॥

भ्रातुः सुतस्तस्य यथार्थनामा नृसिंह इत्यद्भुतरूपशोभः ।
अवर्धयद्यो जगतामभीष्टं प्रह्लादमाश्चर्यकरः सुराणाम् ॥

तच्छिष्यो विष्णुनामा स जयति जगतीजागरूकप्रतिष्ठः
शिष्टानामग्रगण्यः सुगणितगणिताम्नायविद्याशरण्यः ।
यद्वक्त्रोक्तचु(न्मु)क्तमुक्ताफलविमलवचोवीचिमालागलन्तो
द्वित्रि(त्रा)स्सिद्धान्तलेशा जगति विदधतेऽज्ञेऽपि सर्वज्ञगर्वम् ॥

तस्मादधीत्य विधिवत् त्रिस्कन्धं ज्यौतिषं गुरोः ।
कृष्ण(ष्णो)दैवविदां श्रेष्ठस्तनुते बीजपल्लवम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अव्यक्तत्वादिदं बीजमित्युक्तं शास्त्रकर्तृभिः ।
तद्व्यक्तीकरणं शक्यं न विना गुर्वनुग्रहम् ॥

अथ शाण्डिल्यगोत्रमुनिवरवंशावतंसजडविडनगरनिवासिकुम्भोद्भवदिग्भूषण-सकलागमाचार्यवर्यश्रीमहेश्वरोपाध्यायतनयनिखिलविद्यावाचस्पतिगणितविद्याचतु-राननधरणीतरणिः श्रीभास्कराचार्यः स्वगणितरूपं सिद्धान्तशिरोमणिं चिकीर्षुः तदुपयोगितया तदध्यायभूतं व्यक्तगणितमुक्त्वा तथाभूतमव्यक्तमारभमाणः प्रत्यूहव्यूहनिरासाय शिष्टाचारपरिपालनार्थं च मङ्गलमाचरन् शिष्यशिक्षार्थं तदुपजातिकया निबध्नाति—

उत्पादकं यत्प्रवदन्ति बुद्धेरधिष्ठितं सत्पुरुषेण साङ्ख्याः ।
व्यक्तस्य कृत्स्नस्य तदेकबीजमव्यक्तमीशं गणितं च वन्दे ॥

ईशपक्षे यत्तदोर्लिङ्गपरिणामेन यदिति स्थाने यं तदिति स्थाने तमिति च बोध्यम् ।

* * * *

इदानीं प्रेक्षावत्प्रवृत्तिहेतुविषयादिचतुष्टयं सङ्गतिं शालिन्या दर्शयति—

पूर्वं प्रोक्तं व्यक्तमव्यक्तबीजं प्रायः प्रश्ना नो विना व्यक्तयुक्त्या ।
ज्ञातुं शक्या मन्दधीभिर्नितान्तं यस्मात्तस्माद्वच्मि बीजक्रियां च ॥

**Colophon:**

दैवज्ञवर्यगणसन्ततसेव्यपार्श्वबल्लालसंज्ञगणकात्मजनिर्मितेऽस्मिन् ।
बीजक्रियाविवृतिकल्पलतावतारे वृत्तिः क्रमादभवदम्बरषड्विधस्य ॥

इति श्रीसकलगणकसार्वभौमश्रीबल्लालदैवज्ञसुतकृष्णगणकविरचितबीजविवृतिकल्पलतावतारे खषड्विधविवरणम् ॥

**End:**

एवमृणप्रकृतावपि यथासम्भवं पदानयनं द्रष्टव्यमिति तदुदाहरणमनुष्टुभाह—

ऋणगैः पञ्चभिः क्षुण्णः को वर्गस्सैकविंशतिः ।
वर्गः स्याद्यदि चेद्वेत्सि क्षयगप्रकृतौ विधिम् ॥

स्पष्टोऽर्थः ।

* * * *

वच्मि बीजक्रियां चेति प्रतिज्ञाय तदुपयोगितया निरूपितस्य धनर्णषड्विधादेश्चक्रवालान्तस्य गणितस्य बीजत्वं भ्रमादधिगच्छेयुरधिगम्य च बीजत्वं बीजस्य नीरसतां वावगच्छेयुश्शिष्याः । तन्निरासार्थमाहानुष्टुभा—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उक्तं बीजोपयोगीदं संक्षिप्तं गणितं किल ।
अतो बीजं प्रवक्ष्यामि गणकानन्दकारकम् ।। १४ ।।

स्पष्टोऽर्थः ।।

---

## No. 13459. बीजगणितम्, सव्याख्यानम्.

## BĪJAGAṆITAM WITH COMMENTARY.

Substance, palm-leaf. Size, 14½ × 1½ inches. Pages, 196. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains from the Ēkavarṇa-Samīkaraṇa to the end of the work, (i.e.) in continuation of the portion contained in the MS. described under the last number.

Same work as the above. The genealogy of the commentator is given thus :—




It is stated that Rāma had four brothers and had great influence with the King of the Vidarbha country. According to the reading in the extract given under No. 2827 of the India Office Library Catalogue, Rāma was the son of Cintāmaṇi.

**Beginning :**

ओं नमो व्यक्तनिदानाय ।

अत्र अतो बीजं प्रवक्ष्यामीति बीजनिरूपणं प्रतिज्ञातम् । अतस्तन्निरूपणीयम् । तच्चतुर्विधमस्तीति प्रवदन्त्याचार्याः । तथाहि—प्रथममेकवर्णसमीकरणम् । द्वितीयमनेकवर्णसमीकरणम् । तृतीयं मध्यमाहरणम् । चतुर्थं भावितमिति । तत्र समशोधनादिना अव्यक्तराशेः । मानमवगन्तुं यत्रैकमेव वर्णमधिकृत्य पक्षयोस्साम्यं क्रियते तदेकवर्णसमीकरणमित्युच्यते । यत्त्वनेकवर्णानधिकृत्य पक्षसाम्यं क्रियते तदनेकवर्णसमीकरणमित्युच्यते ।

* * * *

तत्रानेकवर्णानामेकवर्णपूर्वकत्वादेकवर्णसमीकरणं प्रथमतः शालिनीत्रयेणाह—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यावत् तावत् कल्प्यमव्यक्तराशेर्मानं तस्मिन् कुर्वतोद्दिष्टमेव ।
तुल्यौ पक्षौ साधनीयौ प्रयत्नात् त्यक्त्वा क्षिप्त्वा वापि संगुण्य भक्त्वा ॥

**End:**

एवं स्वकृतस्यास्य बीजस्य गुणान् युक्त्या संस्थाप्योपसंहरति—
गणक भणितिरम्यं बाललीलावगम्यं सकलगणितसारं सोपपत्तिप्रकारम् ।
इति बहुगुणयुक्तं सर्वदोषैर्विमुक्तं पठ पठ मतिवृद्ध्यै लघ्विदं प्रौढिवृद्ध्यै ॥
गणकेति सम्बोधनम् । भणतयः शब्दाः । तैः रम्यं पदलालित्ययुक्तमित्यर्थः ।
शेषं स्पष्टम् ।

अभूत्पृथिव्यां प्रथितो गुणो(णौघै)(र)शेषसद्दैवविदां वरिष्ठः ।
संपूजनानेहसि यस्य गौरी स्मृता स्तुता प्रत्यहमाविरासीत् ॥
तत्सूनवः पञ्च बभूवुरेषां ज्येष्ठोऽभिरामः किल रामनामा ।
भविष्यदर्थज्ञतया हि यस्य विदर्भराजोऽपि निदेशवर्ती ॥
रामादभूतां सीतायां पुत्रौ कुशलवाविव ।
श्रीमल्लो गोपिराजश्च गुणैः सर्वैः समन्वितौ ॥
(श्री)मल्लसूनुर्जयति द्विजन्द्रो वल्लालसंज्ञः शितिकण्ठभक्तः ।
यः सन्ततं जपति(रुद्रजपादि)सज्ञात् ब्राह्मं मदो(हो)मूर्तमिवावभाति ॥

**Colophon:**

दैवज्ञवर्यगणसन्ततसेव्यपार्श्वबल्लालसंज्ञगणकस्य सुतोऽस्ति कृष्णः ।
रामानुजः स परमेश्वरतुष्टिहेतोः बीजक्रिया(विवृति)कल्पलतामकार्षीत् ॥
यद्भास्करेण निजधामगुणातिरेकात् संपादितं सगुणवर्गघनं हि बीजम् ।
तत्कृष्णभूमिमधिगम्य विचारवारिसंसिक्तमङ्कुरजनुष्यभवत्समर्थम् ।'
यैर्यैः श्रमैर्विरचितोऽस्ति नवाङ्कुरोऽसौ
तेषामभिज्ञ इह कः परमात्मनोऽन्यः ।
इत्थं विचिन्त्य जगदीश तवैव तुष्ट्यै
सर्वज्ञ ते चरणयोर्निहितस्ततोऽयम् ॥

The scribe adds:—

अस्य प्रमातृकालेखस्य शकाब्दः १५२३. मातृकालेखस्य शकाब्दमासतिथयः १७७८-३-१. एतल्लेखनस्य शकाब्दमासतिथयः १७९२-५-८.
रङ्गाचार्यहस्तलिखितमिदम् । पेरुकवाल्न्दान् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13460. बीजगणितम् , सव्याख्यानम्.
## BĪJAGAṆITAM WITH COMMENTARY.

Substance, palm-leaf. Size, 20⅝ × 1¼ inches. Pages, 216. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins in the Kuṭṭakaprakaraṇa and breaks off in the Arkavarṇasamīkaraṇa.

Same work as the above.

---

## No. 13461. बीजगणितम् , सव्याख्यानम्.
## BĪJAGAṆITAM WITH COMMENTARY.

Substance, palm-leaf. Size, 16 × 1⅛ inches. Pages, 92. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Wants the beginning in the खषड्विधप्रकरण and breaks off in the करणीषड्विधप्रकरण.

Same work as the above.

---

## No. 13462. बीजगणितव्याख्या.
## BĪJAGAṆITAVYĀKHYĀ.

Substance, palm-leaf. Size, 15¼ × 1⅜ inches. Pages, 122. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Grahaṇaṣōḍaśadānapraśaṁsā 62*a*.

Breaks off in the fourth Adhyāya.

Same work as Sūryaprakāśa's Bījavyākhyā, described under No. 2823 of the India Office Library Catalogue, Part V, wherein detailed description is given. A commentary on Bhāskara's Bījagaṇita by Sūryagaṇaka, son of Jñānarāja.

**Beginning** :

फाले प्रालेयरश्मिः सुनयनयुगलोन्मीलने सिद्धवो(यो ऽ)ष्टौ
कण्ठे श्रीकण्ठसक्तो द्युमणि(लसति)फणिक(फणिफ)णासन्मणीनां प्रकाशः ।
आस्ते ब्रह्मादिमौलिस्थलमधुपन(ग)णो यत्पदाम्भोजपीठ-
प्रान्तेऽनन्तप्रभावं गणपतिरिति यत् ज्योतिरव्यादिहास्मान् ॥
यावत्कालकनीलवर्णरुचिरं पीतं सितं लोहितं
वासो हासकराधरैरिव गुणं हारप्रवर्गं दधत् ।

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सन्मूलं समशोधनं . . . गतव्यक्ताभिधं वा धिया
वेद्यं योगविशेषतः किमपि तत् कृष्णेति बीजं भजे ॥
यत्पादाम्बुरुहप्रसादकणिकासञ्जातबोधादहं
पाटीकुट्टकबीजतन्त्रगणनाकूपारपारङ्गतः ।
छन्दोऽलङ्कृतिकाव्यनाटकमहासङ्गीतशास्त्रार्थवित्
तं वन्दे निजतातमुत्तमगुणं श्रीज्ञानराजं गुरुम् ॥
चक्रे चक्रविहङ्गयोरिव युतिं निघ्नन् विमोहक्षपौ
वि . षे गणिनार्थयोः कविमुखाम्भोजं समुच्छ्वासयन् ।
शृङ्गारादिरसानुसक्तविबुधेन्द्राशामसौ पूरयन्
शश्वद्विष्णुपदस्थिरो विजयते तद्बोधसूर्योदयः ॥
स्फुरद्बीजाम्भोधौ विविधरचनागाधसलिले
तितीर्षूणां याभूदथ गतमतीनां श्रमभरः ।
विमुग्धानां प्रीत्यादृतसदयचेताः परिमिता-
मिमां व्याख्यानार्थं सपदि रचये सूर्यगणकः ॥
बीजाक्षरार्थः प्रथमं दुरायः का वासना तत्र विचारणीया ।
तथाच सूर्योऽहमुदारबुद्धिः बीजं सबीजं विशदीकरोमि ॥

* * * *

ज्योतिःशास्त्रं निखिलागमाङ्गमौलिकलिकालमहिम्ना लुप्तमिदमुद्धर्तुमज्ञानतमोनिहितं जगदुपकर्तुमाविष्कृततनुरसौ भास्करः प्रकृतोपक्रमानुसारं व्यक्तं गणितं विरचय्य तद्बीजभूतमतिगहनमव्यक्तगणितं विवक्षु . . . . . समाप्तिगमनाप्रतिबन्धकविघ्नोत्सारणासाधारणकारणं

* * * *

नमस्काररूपं मङ्गलं स्वयमनुष्ठितं छात्रोपयोगमात्रेणानेकार्थैः . . . . उपेन्द्रवज्रावृत्तेन ग्रन्थतो निबध्नाति ।

**End** :

दैवज्ञज्ञानराजात्म(ज)कविगणकाचार्यसूर्याभिधान-
प्रोक्ते सद्बीजभाष्ये सुजनबुधजनानन्दसन्दोहहेतौ ।
सम्यक् सूर्यप्रकाशे पटुषड्डु(वट्ट)हृदयध्वान्तविध्वंसदक्षे
जातस्सर्वोपपत्तिः बहुगुणफलभाक् कुट्टकोऽपि . . ध्यन्यः ? ।
निरूप्य गणकाग्रणीः स्फुटतरोक्तिभिः कुट्टकं
पराभिनवभास्करः प्रथितपण्डितो भास्करः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करोति सुकृती कृती कृतचमत्कृतैस्सत्कृतिः
शिशूपकृतयेऽधुना विविधकल्पनासञ्चयैः ॥

* * * *

**Colophon :**

दैवज्ञज्ञानराजात्मज ( . . . . . ) सन्दोहहेतौ ।
सम्यक्सूर्यप्रकाशे यदबुधहृदयध्वान्तविध्वंसदक्षे
युक्तोऽध्यायस्तृतीयः प्रकृतिरुचि . . . चारुवर्गप्रकृत्या ॥
साक्षा (?) अक्षकिपक्षपक्षपतनालक्षक्षयं (?) कुर्वतो
लक्ष . . . तो (?) क्ष्मावलये शतामित . . . दातुर्जनस्य स्वयम् ।
लक्ष्यालक्ष्यविलक्षणाक्षयतनोर्लक्षादिसत्साक्षिणो
हे हेरम्ब तवाम्बुजं तव विभो नित्यं स्मरामोऽव्ययम् ॥
सद्बीजकरणीभूतं वर्गप्रकृतिसंज्ञकम् ।
व्याख्यायाध्यायमधुना बीजं व्याख्यायते मया ॥

* * * *

एवमपरः एको भृङ्गः डोलायमानः सन्नितस्ततो भ्रमति । अथ तस्य भृङ्गस्य इतस्ततो भ्रमणे साहित्योक्त्या हेतुमाह केतकीमालतीति । किंभूतो भृङ्गः केतकीमालतीपरिमलप्रत्यैककालः केतकी च मालती च तयोः परि.

---

## No. 13463. ब्रह्मसिद्धान्तः.
## BRAHMASIDDHĀNTAḤ.

Substance, paper. Size, 8½ × 6¾ inches. Pages, 288. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Contains Adhyāyas one to seven.

Same work as that described under No. 2784 of the India Office Library Catalogue, Part V, wherein this work is said to contain six Adhyāyas, while the present MS. contains seven Adhyāyas. The stanza given as the beginning in the second Adhyāya in the India Office Library Catalogue is, according to the present MS., found to be the 38th stanza of that Adhyāya.

**Beginning :**

योगध्यानसमारूढं ब्रह्माणं त्रिजगद्गुरुम् ।
अभिवाद्य सुखासीनं नारदः परिपृच्छति ॥
देवदेव जगन्नाथ सर्वज्ञ कमलासन ।
ज्योतिषां चरितं ज्ञानं ब्रूहि विस्तरतो महत् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अधीतमखिलं छन्दः स्थूलरूपं प्रतीयते ।

* * * *

नारायणस्सुरश्रेष्ठो वेदाकारेण वर्तते ।
छन्दःशास्त्रं तस्य पादौ कल्पः पाणी मुखं तथा ।
शब्दशास्त्रं श्रोत्रयुग्मं निरुक्तं घ्राणमेम च ।
शीक्षाशास्त्रं ज्यौतिषं च नयने षड्भिरेव हि ॥

* * * *

अष्टादशनिमेषास्तु काष्ठा त्रिंशत्कला च ताः ।
तासां त्रिंशत् क्षणस्तेषां षण्णाडीति प्रगण्यते ॥
यद्वा गुर्वक्षराणां तु दशभिः प्राण उच्यते ।
षड्भिः प्राणैर्विनाडी स्यात् तत् षष्ठ्या घटिका तथा ।
श्वासः प्राणस्तु सर्वेषां तदायुस्तेन निर्दिशेत् ॥
नाडीषष्ठ्या दिवारात्रं मासस्तु त्रिंशता भवेत् ।
उदयादुदयं भानोर्भूदिनं मर्त्यलोकजम् ।
स्यात् तेनार्कोदयो मासस्तथायं सावनश्च हि ।
भास्वद्वियोगतश्चन्द्रो यावत्तेतीह . पुनः ।
स्यात्तावानैन्दवो मासस्तिथीनां त्रिंशता च सः ॥

* * * *

इत्थं तत्परिवर्तेन पौष्णान्ते भगणः स्मृतः ।
सर्वत्रेच्छाफलवधः प्राणाः प्रस्तुततत्फलम् ॥

* * * *

कुजार्किगुरुशीघ्राणां भगणास्सूर्यवत्सराः । १४३२००००.
इन्दोस्तर्कामराग्न्यर्ध(क्ष)सप्तशैलशरास्तथा ॥ ५७७५३३३६.
रदेभतर्कगोनेत्रनयनानि कुजस्य च । २२९६८३२.
बुधः शीघ्रस्य वै षष्टिखाद्यग्न्यङ्कमुनीन्दवः ॥ १७९३७०६०.

* * * *

**Colophon:**

इति श्रीशाकल्यसंहितायां द्वितीयप्रश्ने ब्रह्मसिद्धान्ते द्वितीयो(प्रथमो)ऽध्यायः ॥

**End:**

ऊर्ध्वलोकाः प्रमाणं स्यादेव यं विकीर्तितम्(?)।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ब्रह्मा योग्यं पादक्लृप्त्यै वयोहानामनन्तकम् ।
इति स्मरन् तदानन्दे समाधिं समवाप्नुयात् ॥
इत्येतदखिलं ब्रह्म पैतामहमनुत्तमम् ।
यो वेद स परं ब्रह्म सदानन्दस्स्वयं भवेत् ॥

**Colophon:**

इति श्रीशाकल्यसंहितायां द्वितीयप्रश्ने ब्रह्मसिद्धान्ते सप्तमोऽध्यायः ।

---

## No. 13464. भूगोलम्.
## BHŪGŌLAM.

Pages, 5. Lines, 4 on a page.

Begins on fol. 19*a* of the MS. described under No. 2847.

Complete.

Gives a description of the universe as found in the Brahmāṇḍa-purāṇa.

**Beginning:**

ब्रह्माण्डे—

लोकानामन्तरालं तु चतुर्दशसहस्रकम् ।
बिलानि सप्त लोकानामयुतञ्च पृथक् पृथक् ॥
उच्छ्रूयं प्रोच्यते प्राज्ञैः विस्तारो भूमिवद्भवेत् ।
सप्तलोकादधः प्रोक्तो नरकाख्यो महामते ॥

**End:**

गम्यते श्रुतिगैस्सर्वैर्वैकुण्ठश्चापि चोच्यते ।
सर्वेषां संस्तुते मासौ कचिन्नापि(?) भविष्यति ॥
सर्वेषामेव जीवानां विष्णुरेकः प्रभुः स्तुतः ।
एतत् ज्ञात्वा च भूगोलं यथावदनुवर्णितम् ॥
स मुक्तस्सर्वबन्धेभ्यो याति विष्णोः परं पदम् ।

---

## No. 13465. भूगोलनिर्णयः, सव्याख्यः.
## BHŪGŌLANIRṆAYAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 15 × 1 inches. Pages, 21. Lines, 4 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Sāmudrikaśāstra 12*a*.

Complete.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Herein the author Vēdāntadēśika gives an idea of the extent of the different worlds including the earth and the heavens comprised in the cosmic universe. The size of certain mountains also is found given herein.

**Beginning:**

श्रीमान् वेङ्कटनाथार्यः . . . सदा हृदि ॥
पञ्चाशत्कोटिभिः स्यान्मितमवनितलं योजनानां तथाहि
स्याज्जम्बूद्वीपमेकं नियुतमुदधिना तावता वेष्टितं तत् ।
प्लक्षद्वीपेन सोऽपि द्विगुणविततिना तावतेष्वब्धिनासौ
द्वीपा द्वैगुण्यभाजःस्वसदृगुदधिभिः संवृता एवमेव ॥
जम्बूप्लक्षौ शाल्मलिकुशक्रौञ्चशाकपुष्करद्वीपाः ।
लवणेक्षुसुरासर्पिदधिक्षीरशुद्धसिन्धुसंवृताः क्रमशः ॥

* * * *

अण्डकटाहभित्तिः कोटियोजना । अण्डकटाहविवरं पञ्चाशत्कोटियोजनम् । पञ्चाशत्कोटिविस्तीर्णं च । तत्र भूर्भुवस्सुवर्महर्जनस्तपस्सत्यलोकाख्यानि । तत्र पञ्चाशत्कोटिविस्तीर्णा भूमिः । तथाहि जम्बूद्वीपं लक्षयोजनविस्तृतम् तच्च नववर्षभागयुक्तम् । तानि भारतकिम्पुरुषहरिवर्षेलावृतरम्यकहिरण्यककुरुभद्राश्वकेतुमालनामकानि । वर्षपर्वताश्च ।

**End:**

एवं ध्रुवादुपरि सत्यलोकादुपरि सीमान्तं त्रयोविंशतिकोटियोजनानि भवन्ति । तत उपरि किञ्चिदूनकोटिद्वयं तमः । ततः परमण्डकटाह इति सूर्याण्डगोलयोर्मध्ये पञ्चविंशतिकोटियोजनमूर्ध्वमधश्च भवतीति अण्डकटाहविवरोच्छ्रायस्य पञ्चाशत्कोटिविस्तीर्णत्वं सिद्धम् ॥

**Colophon:**

कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य श्रीमद्वेदान्ताचार्यस्य कृतिषु सव्याख्यानभूगोलनिर्णयः समाप्तः ॥

The scribe adds—

वर्षे विषौ कार्तिकमासि कृष्णे पक्षे तृतीयाख्यमनोज्ञातिथ्याम् ।
भूगोलतत्त्वं लिखितं च सम्यग्लक्ष्मीनिवासेन गुरोः कटाक्षात् ॥

जम्बूद्वीप लक्षयोजनम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दक्षिणोत्तरक्रमः—

| | |
|---|---|
| भारतं योजनम् ९,०००. | हरिवर्षयोजनम् ९,०००. |
| हिमवत्पर्वतं योजनम् २,०००. | निषधपर्वतं योजनम् २,०००. |
| किम्पुरुषं योजनम् ९,०००. | इलावृतं योजनम् ४,०००. |
| हेमकूटपर्वतयोजनम् २,०००. | नीलपर्वतं योजनम् २,०००. |

* * * *

आहत्य पञ्चाशत्कोटिविस्तीर्णा भूमिः ॥

---

## No. 13466. भूगोलनिर्णयः, सव्याख्यः.

## BHŪGOLANIRṆAYAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, $15\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 10. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above.

---

## No. 13467. महाभास्करीयम्.

## MAHĀBHĀSKARĪYAM.

Pages, 75. Lines, 20 on a page.

Begins on fol. 65*a* of the MS. described under No. 13426.

Complete in eight Adhyāyas.

An astronomical work dealing with the duration of the day and the night, with the method of testing the accuracy of a given position of the planets, with the mode of finding out the excess month in a year, etc. The author is Bhāskarācārya. It is not known whether he is the same as the author of the Līlāvatī. He says he follows Āryabhaṭa. The author has written another work entitled the Laghubhāskarīya, vide No. 13474

**Beginning:**

कलां बिभर्ति क्षणदाकरस्य यः प्रकाशिताशां शिरसा गभस्तिभिः ।
नमोऽस्तु तस्मै सुरवन्दिताङ्घ्रये समस्तविद्याप्रभवाय शंभवे ॥

* * * *

तपोभिराप्तं स्फुटतन्त्रमाश्मकं चिरं समभ्येतु जगत्सु सद्गुणैः ।
चिरं च जीयासुरपेतकल्मषाः भटस्य शिष्या जितरागशत्रवः ॥

नवाग्निरूपाग्नियुतं महीभुजां शकेन्द्रनाम्नां गतवर्षसंग्रहम् ।
द्विषट्कनिघ्नं गतमाससंयुतं युगाधिमासैर्गणयेद्विराशितम् ॥

* * * *

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति महाभास्करीये कर्मनिबन्धे प्रथमोऽध्यायः ॥

**End:**

भास्करे मिथुनपर्ववसाने शर्वरी त्रिगुणसप्तघटी स्यात् ।
अक्षचापगुणतावदतस्मिन् लम्बकेन सहितं विगणय्य ॥
भास्करेण परिचिन्त्य कृतोऽयं मन्दबुद्धिपरिपोथ(बोध)समर्थः ।
सम्यगार्यभटकर्मनिबद्धः स्पष्टवाक्यकरणैः स भास्करी ॥
स्पष्टार्थानेककरणैश्छेद्यकेन्द्रगणै रवेः ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् (क्वचित्) ॥

**Colophon:**

इति महाभास्करीये अष्टमोऽध्यायः ॥
इति महाभास्करीयं समाप्तम् ॥

---

No 13468. मातृकागणभूषणम्.
MĀTṚKĀGAṆABHŪṢAṆAM.

Pages, 68. Lines, 4 on a page.

Begins on fol. 15*a* of the MS. described under No. 1338.

Breaks off in the fourth Pāda of the sixth Adhyāya.

A work in astronomy by Kavirājamaṇḍalēśvara dealing with the method of finding out the exact time by measuring the shadow of a person by his foot and with the method of classifying the 27 constellations into three groups according to certain peculiarities and as well indicating them by means of certain letters of the alphabet.

**Beginning:**

श्रीवेङ्कटाचलाधीशं श्रीनिवासं रविस्थितम् ।
प्रणम्य वक्ष्यते सम्यङ्मातृकागणभूषणम् ॥
कविराजगन्धसिन्धुरनिरान्ध्यस्य नन्दनेनेवम् ।
सीतापतेः कृतं यत्कौण्डनकविराजमण्डलेन्द्रेण ॥

वर्णानां गतयश्चतस्रस्सुरनरतिर्यग्रौरवभेदाद्विप्रादिनाम(।)हैः । भ(सा)नुनासिकास्याः कचटतपा ह्रस्वास्सुरगतयश्शुभा दीर्घयुक्ता न रतया मध्यमाः ।
भा(सा)नुनासिकयलशषसहलक्षास्तिर्यग्गतयः कार्पण्यदारेफोऽधोगतिर्मृत्युकृत् ।

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीनलतौरवलिवररविकौण्डनकविराजमण्डलेश्वरकृतौ मातृकागणभूषणव्याकरे प्रथमोऽध्यायः ॥

**End:**

पादच्छायासु परित्यज्य रविभुक्तेरर्धपादं त्यक्त्वा नाड्यस्स्थिताः सुवेद्याः, अष्टानवतिसार्धपञ्चचत्वारिंशदष्टाविंशदेक( कोन )विंशश्चतुर्दशसार्धदशाष्ट( षट्सार्धच )-तुष्कसार्धत्रयसार्धद्वयसत्रिपादेकैकार्धशून्यपादानामेकादिपञ्चदशान्ता गतघटिकाः तद्वदपराह्णे स्थितघटिकाः ॥

**Colophon:**

इति कविराजमण्डलेश्वरकृतौ मातृकागणभूषणे षष्ठस्याध्यायस्य तृतीयः पादः ॥

संक्रमणवारादिशनिवारान्तं गणयेत् तत्संख्या च तुलादिगताब्दे युतेषु सप्तभागितेष्ववशिष्टा च मासध्रुवकौ चैकीकृत्य तत्संख्यादिनस्य सायमादिषष्टिघटिकाः त्याज्याः पुनस्त्याज्या तद्वत् ।

* * * *

नवदशगुणिताः षष्टिर्गतवर्षयुता नव सङ्ख्या शकनृपकालसूचिका । चैत्राद्यजसिंहकर्कटधनुर्युग्मार्द्रक्षतुलामकरेषु वारेशास्संवत्सरप्रभुमन्त्रिसेनासस्यधान्यनीरसाधिपावर्षेशगणस्यानु.

---

## No. 13469. रव्यादिगतिभेदः.
## RAVYĀDIGATIBHEDAḤ.

**Pages, 24. Lines, 30 on a page.**

Begins on fol. 9*a* of the MS. described under No. 13431.

A set of tables showing the differences in time in regard to the movements relating to the Sun, the Moon, etc.

**Beginning:**

| रविगतिभेदाः, संवत्सरान्तं मध्यराशितागताः. | | | | | चन्द्रमध्यगतिः 132-44-55. | | | एकादिसंख्या. | चन्द्रमन्दकेन्द्रगतिः 62-4-16. 7519. | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| दिनानि. | वार. | घटिका. | विनाडी. | षष्ठ्यंशम् | 1165 3 | 463. | दशां. | | | | |
| 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| 365 | 1 | 15 | 22 | 54 | 132 | 44 | 55 | 1 | 62 | 4 | 17 |
| 730 | 2 | 30 | 45 | 48 | 265 | 29 | 50 | 2 | 184 | 8 | 34 |
| 1095 | 3 | 45 | 8 | 42 | 38 | 14 | 45 | 3 | 275 | 12 | 50 |
| 1461 | 5 | 1 | 31 | 36 | 170 | 59 | 40 | 4 | 8 | 17 | 7 |
| 1826 | 6 | 16 | 54 | 30 | 303 | 44 | 36 | 5 | 100 | 21 | 24 |

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

| 1 ने. | 2 ने. | 10 ने. | 11 ने. | | | 12 ने. | 13 ने. | 14 ने. | |
|---|---|---|---|---|---|---|---|---|---|
| 140<br>150<br>160<br>170<br>180 | 51<br>51<br>40<br>15<br>0 | 37<br>29<br>20<br>10<br>0 | 25<br>20<br>13<br>7<br>0 | 220<br>210<br>200<br>190<br>180 | 140<br>150<br>160<br>170<br>180 | 25<br>27<br>18<br>9<br>0 | 49<br>38<br>25<br>13<br>0 | 31<br>24<br>16<br>8<br>0 | 220<br>210<br>200<br>190<br>180 |

## No. 13470. रव्यादिचक्रम्.
## RAVYĀDICAKRAM.

**Pages, 7. Lines, 6 on a page.**

Begins on fol. 19*a* of the MS. described under No. 13420.

Gives astronomical tables for ascertaining accurately the position of the planets.

**Beginning :**

रविचक्रम्.

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| 9 | | | | 6 | 9 | 2 | 8 | 5 |
| 7 | 6 | | स | रि | 3 | 1 | 4 | 3 |
| 5 | 2 | 3 | 1 | 4 | 8 | 7 | 6 | 9 |
| 1 | | 9 | 5 | 8 | 3 | 6 | 2 | 7 |
| 6 | इ | 7 | 2 | 1 | 7 | 5 | 5 | 4 |
| 2 | 3 | 5 | 6 | ९ | 4 | 9 | 1 | 8 |
| 3 | 7 | 2 | 4 | 5 | 6 | 8 | 9 | 1 |
| 4 | 9 | 1 | 8 | 3 | 2 | 3 | 7 | 6 |
| 8 | 3 | 6 | 7 | 7 | 1 | 4 | 3 | 2 |

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

सुदधिपरगावशाचमने ९ चक्रं केतुविधिं प्रकल्पते(?)
दशरेभुनवागृहं विदत्ते एकाशीतिपदैः यथोचितम्(?) ॥

---

## No. 13471. रव्यादिज्यावाक्यम्.
## RAVYĀDIJYĀVĀKYAM.

Pages, 13. Lines, 24 on a page.

Begins on fol. 21*a* of the MS. described under No. 13402.

Gives the sines for determining the position of the Sun and the planets.

**Beginning:**

रव्यादीनां ज्यावाक्यानि लिख्यन्ते—

रविज्या—

जनेन-१. सत्येन-२. सुखेन-३. लिङ्गेन-४. येवेन-५. मावेन-६ समेन-७. वर्तनम्-८. रसेन-९. हासेन-१०. मदेन-११. योधनम्-१२. सुधेन-१३. रत्नस्य-१४. सुनीपा-१५. रूपकम्-१६. तटस्य-१७. धान्यस्य-१८. खुरस्य-१९. भद्रकम्-२०.

**End:**

तरङ्गी-१७. गङ्गाम्बु-१८. जलाम्बु-१९. कुम्भगी-२०. विभङ्गी-२१. शोभाङ्गी-२२. भवाङ्गी-२३. लीढगु-२४. तीरुहः शनिः ॥

**Colophon:**

रव्यादीनां ज्यावाक्यं संपूर्णम् ॥

* * * *

उपरि शिष्टज्या—

शुभाङ्गम्-१. नागोसौ-२. मान्यं पुण्यम्-३. अनामयम्-४.

* * * *

भृगुगुरुबुधशनिभौमाशशिन(व)मांशकाः. भृगुर्नवभिः कलांशैर्दृश्यः. गुरुरेकादशभिः. बुधस्त्रयोदशभिः. मन्दः पञ्चदशभिः. भौमस्सप्तदशभिर्दृश्यः.

---

## No. 13472. रव्यादिज्यावाक्यम्.
## RAVYĀDIJYĀVĀKYAM.

Pages, 16. Lines, 70 on a page.

Begins on fol. 28*a* of the MS. described under No. 13401.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. 13473. रव्यादिस्फुटम्.
RAVYĀDISPHUṬAM.

Pages, 9. Lines, 30 on a page.

Begins on fol. 1*a* of the MS. described under No. 13431.

On the accurate calculation of the position and movements of the Sun, etc.

**Beginning:**

रविस्फुटं यथा—

तत्रोक्ततन्त्रस्यार्धरात्रिस्फुटत्वादर्धरात्रानयनं यथा—

घटिका यत्र पथिकादानीतं घटिकादिकम् ।
घण्टाभिधाना होरा वा . . . पूर्वार्धरात्रकः ॥

* * * *

सषट्चोच्चोनमध्यं तु रवेः केन्द्रमुदाहृतम् ।
स्वमृणं मेषतौल्यादौ पदं तत्पथकागतम् ॥
एकेनैवेष विधिना स्फुटो भवति भानुमान् ।
दिनद्वयस्फुटानां तु अन्तरं गतिरिष्यते ॥

**End:**

सञ्यंशवस्वङ्ग १,३६८-२० परमक्रान्तिशिञ्जिनी ।
श्रीरसारोगश्री २३-२७-२२ ज्ञेयाः क्रान्तिर्याम्योत्तराभिधाः ॥

---

No. 13474. लघुभास्करीयम्.
LAGHUBHĀSKARĪYAM.

Pages, 23. Lines, 20 on a page.

Begins on fol. 93*a* of the MS. described under No. 13426.

Complete in 8 Adhyāyas.

This treatise deals briefly with the movements of the planets and the constellations, with the calculation of excess month in a given year, with the duration of the day and night in a given month, etc. By Bhāskara, probably the same as the author of the Mahābhāskarīya already described under No. 13467.

**Beginning:**

भास्कराय नमस्तस्मै स्फुटयन् ज्योतिषां गतिम् ।
प्रक्रिया तद्भेदेऽपि यस्य गत्यानुमीयते ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



काले महति देशे वा स्फुटार्थो यस्य दर्शनम् ।
जयत्यार्यभटस्सोऽब्धिप्रान्तप्रोल्लासिसद्यशाः ॥
नालमार्यभटादन्ये ज्योतिषां गतिवित्तये ।
यत्र भ्रमन्ति ते ज्ञानबहुलभ्रान्तिसागरे ॥
नवाद्येकाग्निसंयुक्ताः शकाब्दाः द्वादशाहताः ।
चैत्रादिमाससंयुक्ताः पृथक् गुण्या युगाधिकैः ॥
ते च षट्त्रिकरामाग्निनवभूतेन्दवो युगे ।
भागहारोऽब्धिवस्वेकशरास्स्युरयुताहताः ॥

**End:**

लिप्ताशेषः कुजस्य द्विकघनगुणितो मूलदोरूपयुक्तः
सप्ताभ्यस्तस्सरूपः पुनरपि पददोवर्गराशिस्स एव ।
इत्थं शेषं विचिन्त्य क्षितिजदिनगणैर्वेत्ति यो वर्षपूगैः
स स्यादम्भोधिकाञ्च्यां गणितपटुधियामग्रगामी धरायाम् ॥
विस्तरग्रन्थभीरूणां ग्रहसद्धर्मवित्तये ।
निबन्धः कर्मणां प्रोक्तो भास्करेण समासतः ॥

**Colophon:**

इति लघुभास्करीये अष्टमोऽध्यायः ॥
लघुभास्करीयं समाप्तम् ॥

---

## No. 13475. लघुमानसम्, सव्याख्यानम्.
## LAGHUMĀNASAM WITH COMMENTARY.

Substance, paper. Size, $6\frac{3}{8} \times 5$ inches. Pages, 63. Lines, 24 on a page. Character, Telugu. Condition, good Appearance, old.

Contains the Madhyamādhikāra and the Sphuṭādhikāra and breaks off in the Tripraśnādhikāra

The text is an astronomical treatise by Mañjulācārya and the commentary called Kalpalatā is by Yallaya, son of Śrīdhara and disciple of Sūryaṇārya, who was the son of Bālāditya. The commentator states in the commentary on the first stanza that the author of the text lived at Prakāśa (said to be a town in northern India) and that, according to the language spoken in that town, Mañjula is the name of Sūrya (the Sun) which name is given in the first stanza. It states that the author was a Brāhmana of the Bhāradvājagōtra and that he composed this smaller treatise, thereby implying that he wrote a bigger work of

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



this name. The commentator quotes a stanza (vide extracts below) which speaks highly of the author as compared to Āryabhaṭa, Dāmōdara and Jiṣṇu's son.

**Beginning :**

श्रीमञ्जुलाचार्यकृतं प्रभवसंवत्सरकार्तिकशुक्लपौर्णम्यां (मास्यां) प्रारब्धं लघुमानसाख्यं गणितं यल्लयार्यकृतसोपपत्तिकव्याख्यासहितम् ।

श्रीमद्ग्रहनक्षत्रैरनुमितिकालस्स निर्गुणो देवः ।
गणदेवो गौरीशो मद्वागर्थप्रबोधको भवतु ॥
श्रीवीरश्शरभेशस्सकलान् विघ्नान्निरस्य वागर्थान् ।
दद्यादस्माकं यस्तं वन्देऽहं गणेश्वरं सूर्यम् ॥
लघुमानसाख्यगणितस्कन्धस्य तु यल्लयाभिधः कुरुते ।
टीकां सूर्यगुरोस्तच्चरणद्वन्द्वं प्रणम्य मेधावी ॥
सौरादिकसिद्धान्तान्यार्यभटब्रह्मगुप्ताद्यैः ।
कृततन्त्राणि च दृष्ट्वा मानसमुक्तं च मञ्जुलार्येण ॥
तत्कृतपूर्वध्रुवकान् दृष्ट्वा तद्धेतुतन्त्राणि ।
ज्ञात्वा तद्भगणादीन् वक्ष्ये पूर्वध्रुवान् ग्रहादीनाम् ॥

ग्रहाणां भगणाद्युपदेशः—

अयुतहतरदवेदा ४,३२०,००० रविभगणा वत्सराश्च भटतन्त्रे ।
रसरामसुरेषुमुनिक्षितिप्रबाणा ५,७७५,३३३६ श्शशाङ्कस्य ॥

* * * *

(व्या) स्यादिति यत्प्रयोजनं प्रोच्यते सद्भिः सतामयमाचारो यच्छास्त्रप्रारम्भेऽष्वभिमतदेवताप्रसादात्तन्नमस्कारेण तत्स्तुत्या वा तत्स्मरणेन वा तद्भक्तिविशेषेण वा अभिप्रेतार्थसिद्धिं वाञ्छन्ति । तदयमाचार्यो मञ्जुलो नाम द्विजोऽर्कलब्धवरप्रसादेन ज्योतिश्शास्त्रसङ्ग्रहकृत् गणितं चिकीर्षुरशेषविघ्नोपशान्तये भगवन्तं सूर्यं गोपितस्वनामविख्यापकव्याजेन स्मरन् स्वनामगोत्रपट्टणग्रन्थनामान्याद्यश्लोकेन वक्ष्यति ।

(मू) प्रकाशादित्यवत्ख्यातो भारद्वाजो द्विजोत्तमः ।
लघ्वपूर्वं स्फुटोपायं वक्ष्येऽन्यल्लघुमानसम् ॥

(व्या) प्रकाशः प्रसिद्धः प्रकाशश्चासावादित्यश्चेति तद्वत् ख्यातः । लोके आदित्यनामधेयाः पुरुषाः विद्यन्ते । तथाविधख्यातिमानहम् । ब्रह्माणान्तस्तिमिरसंहारकोऽर्को यद्वत्प्रसिद्धः तद्वदहमपि । अथान्यदर्थान्तरं व्यक्तेरुच्यते । प्रकाशं नाम पट्टणमुत्तरदेशेषु विद्यते । तत्रस्थाः पुरुषास्तु देशभाषया सूर्यं मञ्जुल इति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वर्णयन्ति । मञ्जुलाचार्योऽहमित्युक्तं भवति । प्रकाशादित्यवत् ख्यातः भारद्वाजो भरद्वाजगोत्रसंभूतः । अपत्यं पौत्रप्रभृति गोत्रमित्यण् प्रत्ययः । द्विजोत्तमः ब्राह्मणश्रेष्ठः आचार्यत्वात् । वृद्धैरुक्तं च—

आर्यभटो ग्रहगणितं गोलं दामोदरो विजानाति ।
यन्त्रज्ञो जिष्णुसुतस्सर्वं जानाति मञ्जुलाचार्यः ॥

लघु अल्पग्रन्थेनोदितं बह्वर्थदमेव । सङ्ग्रहोक्तस्य शास्त्रस्य सुखग्रहणसाधनत्वादपूर्वं लोके येन केनापि वा कृतमवलोक्य न कृतम् । अहमेवेदृशं मार्गं कृतवान् । नान्येनैतत्पूर्वं कृतमित्यर्थः । स्फुटोपाया गुणहारभागहारादयः यस्मिन् तदन्यत् । पूर्वं बृहन्मानसाख्यो ग्रन्थः कृतः । तदन्यं लघुमानसाख्यं गणितं वक्ष्ये । श्रीमत्प्रकाशपट्टणवासिनो देशभाषया सूर्यं मञ्जुल इति हि वदन्ति । श्रीमञ्जुलनामको विप्रः ।

बहुलग्रन्थेनादौ कृत्वा शास्त्रं स्वकीयसंवादे ।
तद्वाक्यनिरसनार्थं कृतवान् लघुमानसाभिधं ग्रन्थम् ॥
यद्वत्सूर्यो लोके ख्यातस्सोऽयं तथैव विख्यातः ।
त(स्मा)द्ग्रन्थविचारो मया हि कश्चिन्नियोजिते शक्यः ॥

* * * *

**Colophon:**

श्रीमच्छम्भुवरप्रसादविलसद्वागर्थवान्यल्लयः
श्रीमच्छ्रीधरनन्दनस्सुरगुरुप्रख्याद्गुरोस्सूर्यतः ।
संप्राप्तागमकोविदोऽद्य रचिता मध्यग्रहाणां गते-
ष्वेषा कल्पलताच्छलेन हि मया श्रीमानसे विस्तृता ॥

**Colophon:**

श्रीमच्चन्द्रशेखरवरलब्धवाग्विभवेन श्रीबालादित्यसुतसूरणार्यशिष्येण श्रीधरार्यपुत्रेण यल्लयाख्येन विपश्चिता लघुमानसमध्याधिकारव्याख्या ॥

**End:**

केवलसायनसूर्याल्लग्नं कुर्याद्दिवा क्षपायान्तु ।
षड्राशियुताद्भानावेष्यं लग्नं प्रकल्पयेन्नित्यम् ॥
अर्कोदयतः पूर्वं गतनाडीभिर्विलोमगं लग्नम् ।
एकस्मिन् राशौ यदि लग्नार्कौ तिष्ठतस्तयोर्मध्यः ॥
भागैस्तद्राशिमितं गणयित्वा खाग्निभिर्भवेत्कालः ।
यदि भुक्तं भोग्यं वा स्वेष्टात् संशोधितुं न शक्यं स्यात् ॥
इष्टविघटिकाश्च त्रिंशद्गुणितास्तद्राशिमानतो भक्तात् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13476. लघुमानसम्, सव्याख्यानम्.
## LAGHUMĀNASAM WITH COMMENTARY.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 32. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Varṣaphaṇī 17*a*.

Incomplete.

Same work as the above.

---

## No. 13477. लीलावती.
## LĪLĀVATĪ.

Substance, palm-leaf. Size, 15¾ × 1⅝ inches. Pages, 35. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

This is the name given to that portion of the Siddhāntaśirōmaṇi treating of arithmetic and mensuration.

Date of copying: Saturday, the 1st day of the bright fortnight of the Kārtikai month in the year Prabhava.

**Beginning:**

प्रीतिं भक्तजनस्य यो जनयते विघ्नं विनिघ्नन् स्मृत-
स्तं वृन्दारकवृन्दवन्दितपदं नत्वा मतङ्गाननम् ।
पाटीं सद्गणितस्य वच्मि चतुरप्रीतिप्रदां प्रस्फुटां
सङ्क्षिप्ताक्षरकोमलामलपदैर्लालित्यलीलावतीम् ॥

वराटकानां दशकद्वयं २० यत्सा काकिणी ताश्च पणश्चतस्रः ४ ।
ते षोडश १६ द्रम्म इहावगम्यो द्रम्मैस्तथा षोडशभिश्च १६ निष्कः ॥

**End:**

न गुणो न हरो न कृतिर्न घनः पृष्टस्तथापि दुष्टानाम् ।
गर्वितगणकबहूनां स्यात् पातोऽवश्यमङ्कपाशेऽस्मिन् ॥

येषां सुजातिगुणवर्गविभूषिताङ्गी शुद्धाखिलव्यवहृतिः खलु कण्ठसक्ता ।
लीलावतीह सरसोक्तिमुदाहरन्ती तेषां सदैव सुखसम्पदुपैति वृद्धिम् ॥

**Colophon:**

इति श्रीभास्कराचार्यविरचितायां गणितपाट्यां लीलावत्यामङ्कपाशस्स-
माप्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13478. लीलावती.

## LĪLĀVATĪ.

Substance, palm-leaf. Size, 16 × 1 inches. Pages, 14. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Breaks off in the Prakīrṇaka.

Same work as the above.

---

## No. 13479. लीलावती.

## LĪLĀVATĪ.

Substance, (Śrītāla). Size, 15¼ × 2 and 14 × 2 inches. Pages, 12 Lines, 8 on a page. Character, Kanarese. Condition, good. Appearance, old.

Begins on fol. 1a. The other works herein are Jainōpanayanakrama 7a, Jinamālikāstōtra 9a, Upāsakasaṁskāra 12a.

Incomplete.

Same work as the above.

---

## No. 13480. लीलावती.

## LĪLĀVATĪ.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 50. Lines, 7 on a page. Character, Telugu. Condition, slightly injured but the bottom side is broken. Appearance, old.

Wants five leaves in the beginning ; otherwise complete.

Same work as the above.

**Colophon :**

इति श्रीभास्कराचार्यविरचितायां लीलावत्यां सिद्धान्तशिरोमणौ पाटीगणिताध्यायोऽयं समाप्तिमगमत् ॥

---

## No. 13481. लीलावती, सव्याख्या.

## LĪLĀVATĪ WITH COMMENTARY.

Substance, palm-leaf. Size, 16 × 1⅞ inches. Pages, 148. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

The commentary here is the same as that described under R. No. 338, wherein see for the beginning. The author of the commentary is given herein as Mahīdharācārya.

**End :**

येषां तु शान्तिगुण . . . संपदुपैति वृद्धिम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



येषामिह लोके लीलावतीग्रन्थो नारी च कण्ठसक्ता तेषां नित्यं सुखसम्पद्वृद्धिं प्राप्नोति । कीदृशी शोभना जातिः भागजात्यादिः ब्राह्मणत्वादिश्च । गुणो गणनं वर्गः कृतिः पक्षे गुणवर्गो विनयादिसमानास्तैर्विभूषितमङ्गं यस्यास्सा उत्था अखिला समग्रा व्यवहृतिमिश्रादिव्यवहारस्संसारव्यवहारश्च यस्यास्सा सरसां शृङ्गारादिरसयुक्तामुक्तिं शब्दं वचनमुदाहरन्ति ॥

**Colophon:**

इति श्रीमहीधराचार्यविरचिते लीलावतीविवरणे अङ्कपाशव्यवहारो दशमः ॥

श्रीमहीधराचार्यविरचितं भास्कराचार्यकृता(या)लीलावत्या विवरणं समाप्तम् ॥

---

## No. 13482. लीलावती, सव्याख्या.

## LĪLĀVATĪ WITH COMMENTARY.

**Pages**, 388. Lines, 15 on a page.

Begins on fol. 6*a* of the MS. described under No. 13408.

Incomplete.

Same work as the above

---

## No. 13483. लीलावती, सव्याख्या.

## LĪLĀVATĪ WITH COMMENTARY.

Substance, paper. Size, $7\frac{5}{8} \times 6\frac{1}{8}$ inches. Pages, 68. Lines, 33 on a page. Character, Telugu. Condition, good. Appearance, old.

Almost complete.

Same work as the above.

---

## No. 13484. लीलावतीव्याख्या—कर्मप्रदीपिका.

## LĪLĀVATĪVYĀKHYĀ : KARMAPRADĪPIKĀ

**Pages**, 120. Lines, 20 on a page.

Begins on fol. 60*a* of the MS. described under No. 13386.

Complete.

A commentary on the Līlāvatī by Nārāyaṇa. It is called Karmapradīpikā.

**Beginning:**

प्रणम्य भास्करं देवमाचार्यभटं तथा ।
व्याख्या विलिख्यते लीलावत्याः कर्मप्रदीपिका ॥

तत्र तावत् स्वेष्टदेवतानमस्कारपूर्वकं भास्कराचार्यः चिकीर्षितं प्रतिजानीते—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रीतिं भक्तजनस्य . . . लालित्यलीलावतीम् ॥

स्वतो युक्तिसिद्धस्य लौकिकस्य शास्त्रीयस्यापि निखिलस्य गणितस्य पाटीं साकल्येन सन्दर्शनस्थानभूताम् ॥

**Colophon :**

इति लीलावतीव्याख्याने कर्मप्रदीपके क्षेत्रव्यवहारः ॥

**End :**

अथोपसंहरति—

येषां तु जातिगुणवर्गविभूषिताङ्गी शुद्धाखिलव्यवहृतिः खलु कण्ठसक्ता ।
लीलावतीह सरसोक्तिमुदाहरन्ती तेषां सदैव सुखसंपदुपैति वृद्धिम् ॥

इति । जातिः गुणानां वर्गश्च जातिश्च गुणवर्गाः । अथवा योषिज्जातेर्गुणसमूहो जातिगुणवर्गः ॥

एतन्नारायणाख्येन रचितं कर्मदीपकम् ।
सन्तिष्ठतु परं लोके नमाम्यार्यभटं सदा ॥

**Colophon :**

समाप्तमिदं कर्मदीपकम् ॥

---

No. **13485.** लीलावतीव्याख्या—बुद्धिविलासिनी.

LĪLĀVATĪVYĀKHYĀ : BUDDHIVILĀSINĪ.

Substance, palm-leaf. Size, $13\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 125. Lines, 5 on a page. Character, Grantha Condition, good. Appearance, new.

Breaks off in the Miśravyavahāra.

Another commentary on the Līlāvatī by Gaṇēśa, son of Kēśava and Lakṣmī. Same work as that described under No. 2811 of the India Office Library Catalogue. The author of the text is said to have been the son of Mahēśvarōpādhyāya of Śāṇḍilyagōtra and a resident of Jaḍaviḍanagara.

**Beginning :**

श्रीविद्याधरसेवितो द्विजपति[:]श्रीवर्धनो यत्त्रयी-
मूर्तिः स्वोद्गमनात्सदा सुमनसामानन्दपूरप्रदम्(:) ।
काव्याचारविदोऽपि यत्पदमिताः स्युः स्वप्रकाशा अपि
युष्टोनाञ्ज(द्युत्यूना ज)यति क्षितौ खगपतिः श्रीकेशवः सद्गुरुः ॥

अथ यत्र—वाची ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(शरजाव इवानीश शनीरासुरधामश ।)
सहज्ञा सहशनिशशनिरासुरधामशा ।
शमधाम . . . . . जावशा ॥
श्रमधामवपायाशयपायात् हृदिज्ञारधी ॥

अष्टदलपद्मबन्धश्लोकः ।

[चित्रम् ।

श्रीभास्करोक्तवचसामपि संस्फुटानां व्याख्याविशेषवचनेन(न)चास्ति
अत्रोपपत्तिकथने किल सारभूते पश्यन्तु सुज्ञगणका मम बुद्धिचित्रम् ॥
व्यक्ते वाऽव्यक्तसंज्ञे यदुदितमखिलं नोपपत्तिं विना तं
त्र(?)र्भान्तो नो ऋते तां सुगण(क)सदसि प्रेणत्थ(प्रौढ)तां नैति चायम् ।
प्रत्यक्षं दृश्यते सा करतलकलितादर्शवत्सुप्रप(स)न्ना
तस्मादस्योपपत्तिं निगदितुमखिलामूह्यसे(मुत्सहे)बुद्धिवृद्ध्यै ॥
नानागमार्थनिपुणः प्रथितो धरायां श्रीकेशवस्य तनयेन गणेशनाम्ना ।
लीलावतीविवृतिरग्रिमबुद्धितुष्ट्यै प्रारभ्यते विमलबुद्धिविलासिनीयम् ॥
अत्रोच्चावचदैवज्ञा दृष्ट्वा व्याख्यानकौशलम् ।
तुष्यन्तु मतिमन्तस्तु वासनार(व)चनामपि(मृते) ॥

अथ प्रथमश्लोकस्यार्थो मयोच्यते । सः क्षितौ प्रसिद्धः केशवस्सद्गुरुर्जयति सर्वोत्कर्षेण वर्तते ॥

* * * *

अथ शाण्डिल्यगोत्रमुनिश्रेष्ठवंशोद्भवजडविडनगरनिवासिसकलागमाचार्यवर्यमहेश्वरोपाध्यायसुतसकलगणितविद्याचतुराननः श्रीभास्कराचार्यो ग्रहगणितस्कन्धरूपं सिद्धान्तं चिकीर्षुः ग्रहगणिताद्यपयोगित्वेन तदध्यायभूतं पाटीगणितमादावारभते ।

* * * *

अभिमतदेवतानमस्काररूपं मङ्गलमाचरन् ग्रन्थारम्भं शार्दूलविक्रीडितेन प्रतिजानीते—प्रीतिमिति ।

* . * *

ज्योतिर्वित्कुलमण्डनं द्विजपतिः श्रीकेशवोऽजीजनत्
यं लक्ष्मीश्च समस्तशास्त्रनिपुणं श्रीमद्गणेशाभिधम् ।
अस्यां बुद्धिविलासिनीसमभिधौ लीलावतीव्याकृतौ
तत्कृत्यां परिकर्मणां निरगमत् प्रस्पष्टमत्राष्टकम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

श्रीसकलागमाचार्यवर्य(गणे)शदैवज्ञविरचितायां लीलावतीव्यावृतौ बुद्धिविलासिन्यां परिकर्माणि समाप्तानि ॥

**Colophon:**

इति श्रीगणेशदैवज्ञविरचितायां लीलावतीटीकायां बुद्धिविलासिन्यां प्रकीर्णानि समाप्तानि ॥

**End:**

शेषं स्पष्टम् । अत्रोपपत्तिः . . पूर्वव्यत्यासेन तद्यथायुतिजातवर्णः स्वर्णे कृत्यनिघ्नस्सन् सुवर्णवर्णाहतियोगराशिस्स्यात् । अस्माज्जातसुवर्णवर्णाहतियोगे शोधिते अज्ञातवर्णतद्वर्णाहतिः शिष्यते । सा तेन सुवर्णेन भक्ता अज्ञातवर्णस्स्यादिति स्पष्टम् । अथ ज्ञातवर्णसुवर्णेषु मिश्रितस्य ज्ञातवर्णसुवर्णस्याज्ञातमानज्ञानार्थमुपजातिकामाह । स्वा.

---

No. **13486.** लीलावतीव्याख्या—विलासः.

LĪLĀVATĪVYĀKHYĀ : VILĀSAḤ.

Substance, palm-leaf. Size, $14\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 55. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Breaks off in the Khātavyavahāra.

This commentary on the Līlāvatī is by Raṅganātha.

**Beginning:**

लीलावतीविलासोऽयं बालानन्दैककारणम् ।
लिख्यते रङ्गनाथेन सोपपत्त्या निरर्थकम् ॥

श्रीभास्कराचार्यः गणितस्कन्धरूपं सिद्धान्तं चिकीर्षुः तदवयवभूतं पाटीगणितमारभमाणश्शिष्यशिक्षार्थं मङ्गलमारचयति—प्रीतिमिति । यद्यप्यव्यक्तगणितस्यापि ग्रहगणितोपयोगित्वमस्ति, तथापि तस्याप्युपयोगित्वेन पाट्यास्तत्प्राथम्यं द्रष्टव्यम् । उक्तञ्च बीजगणिते—पूर्वं प्रोक्तं व्यक्तमव्यक्तबीजमिति । भक्तजनस्येति । भक्तेत्यत्र कर्तरि क्तः । ललितस्य भावो लालित्यम् । सौष्ठवम् । तस्य लीला विलासः स विद्यते यस्यां सा तथोक्ता ताम् । अत्र गणितस्य पाटीमित्यनेन सम्बन्धादिचतुष्टयमुक्तं भवति । तथाहि । सङ्कलनव्यवकलनगुणनभजनवर्गतन्मूलघनतन्मूलत्रैराशिकादिमिश्रश्रेढीक्षेत्रखातक्रकचराशिच्छायाङ्कपाशादिकमत्र विषयः ।

See under the next number for the end.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. 13487. लीलावतीव्याख्या—विलासः.
LĪLĀVATĪVYĀKHYĀ : VILĀSAḤ.

**Pages**, 96. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 5080.

Contains from the Kṣētravyavahāra to the end.

Same work as the above.

See under the previous number for the beginning.

**End:**

अथास्याध्यायस्य प्रशंसाद्वारेण दुर्जनगणकान् निन्दयितुमार्यामाह—न गुणो न हर इति । पाशबद्धा इव निश्चेष्टा भवेयुरिति भावः । अथाश्लेषेण स्वकृतपाटीस्तवनरूपं ग्रन्थसमाप्त्यलङ्कारं सिंहोद्धतयाह—येषां सुजातिगुणवर्णविभूषिताङ्गीति ।

---

No. 13488. वर्षगणितम्.
VARṢAGAṆITAM.

**Pages**, 46. Lines, 7 on a page.

Begins on fol. 31*a* of the MS. described under No. 13066.

Contains the fourth Adhyāya complete and the fifth incomplete. There is another copy of this work beginning on fol. 26*b* and containing 67 stanzas.

Explains at first the method of drawing a snake-like diagram with certain astronomical tables of calculation for predicting the occurrence of certain things in a given year, such as the abundance or otherwise of rain, crops, the rise and fall in the price of certain articles, the prevalence of famine, war, etc. The work goes on to give the method of determining certain details ordinarily found in Indian calendars.

**Beginning:**

अथातस्संप्रवक्ष्यामि वर्षचक्रं लिखेद्बुधः ।
येन विज्ञानमात्रेण वृष्टिज्ञानस्य साधकम् ॥
ऊर्ध्वगा वसु विन्यस्य तिर्यग्रेखाच पञ्चकम् ।
वसुपे(प)क्षपदं चक्रं जायते नात्र संशयः ।
कृत्तिकादि लिखेद्भानि साभिजित्तत्क्रमेण च ।
सप्तनाडिमिदं चक्रं कर्तव्यं पन्नगाकृति ॥
ताराचतुष्कभेदेन नाडिकासु प्रजायते ।
तासां नामान्यहं वक्ष्ये तथा चैव फलानि च ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृत्तिका च विशाखा च मैत्रा च भरणी तथा ।
ऊर्ध्वाख्या शनिनाडी स्याच्चण्डवायुरियं मता ॥

* * * *

**Colophon :**

इति वर्षगणिते चतुर्थोऽध्यायः ॥

**End :**

वाञ्छारासिदगोरसंनादिजलं राधौ मखं राजगो
वीर्थामिति सजावधीमतिसतौ सजागतिस्सा परा ।
जालागोधमवर्णसंज्ञगतयः धीमान् क्रमाल्लिखये-
देकाशीतिपदे नवमहमये वामादिपङ्क्तिक्रमात् ॥

* * * *

एकाशीतिपदे नवग्रहयुदे संपूजयेद्रक्तः ॥

---

## No. 13489. वर्षगणितम्.
## VARṢAGAṆITAM.

Substance, palm-leaf. Size, $9\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 75. Lines, 7 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 47*a*. The other works herein are **Mēghamālāmañjarī** 1*a*, **Ariṣṭanavanīta** 27*a*, **Ariṣṭalakṣaṇa** 40*a*.

Incomplete. Contains the following topics :—Varṣacakra, Dōṣāpavāda-prayāṇādikālanirṇaya, Strījātaka, Śakunādi, Svapnādhyāya, Gaulī-patanaphala.

Similar to the work described above.

**Beginning :**

चतुर्दिक्षु लिखेच्चक्रं सप्त सप्त क्रमेण च ।
अष्टाविंशतिरेखायां वर्षचक्रं प्रकीर्तिता:(म्) ॥
कृत्तिकादीनि गण्यन्ते सङ्क्रान्त्या ऋक्षसंज्ञकाः ।
पूर्वादि गण्य लिख्यन्ते अभिजित्सह गण्यते ॥

**End :**

चतुरष्टा द्वादशी कृष्णे शुक्ले द्विनवपञ्चमी ।
यथा माता सुतं रक्षेत् तथा रक्षति चन्द्रमाः ॥
लग्नाष्टमो पञ्चमे वा राहुकेतुस्थिते यदि ।
तस्य जातस्य समये शिशौ च नाळवेष्टनम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13490. वर्षफणी.

## VARṢAPHAṆĪ.

Substance, palm-leaf. Size, $1\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 14. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 183*a*. The other works herein are Nāradīyasaṁhitā 1*a*, Narapatijayacaryā 108*a*, Kālacakra 154*a*, Jyautiṣadarpaṇa 167*a*.

Incomplete.

Similar to the above.

**Beginning:**

अथातस्सम्प्रवक्ष्यामि तच्चक्रं सप्त नाडिकाः ।
येन विज्ञातमात्रेण वृष्टिं जानाति साधकः ॥
कृत्तिकादि लिखेद्भानि नाडीचक्रं क्रमेण तु ।
सप्तनाडी भवेत्तत्र सव्यासं पन्नगाकृतिः ॥
ताराचतुष्कभेदेन नाड्येकैकाः प्रजायते ।
तासां नामान्यहं वक्ष्ये तथा चैवंपराणि च ॥
कृत्तिका च विशाखा च मैत्राख्यं भरणी तथा ।
ऊर्ध्वगा शनिनाडिः स्यात् चण्डवायुर्विनिर्दिशेत् ॥
रोहिणीस्वातिज्येष्ठाश्विद्वितीया नाडिका मता ।
आदित्यप्रभवा नाडी अनावृष्टिं विनिर्दिशेत् ॥

**End:**

यावद्रक्ततमो मेघो यावदग्निसमो रविः ।
यावद्वायव्यवायुश्च तावद्वृष्टिर्भविष्यति ॥
यावत्काकोदरो मेघो यावच्चन्द्रसमो रविः ।
यावन्निरृतिवायुश्च तावद्वर्षं विनश्यति ॥

रात्रिकालनिर्णयः ॥

Name of the former owner—

वेलमूरिवेङ्कम्भट्लुगारि ज्यौतिषपुस्तकम् ॥

---

## No. 13491. वर्षफणी.

## VARṢAPHAṆĪ.

Pages, 18. Lines, 7 on a page.

Begins on fol. 45*a* of the MS. described under No. 2510.

Complete.

This is a portion of the Varṣagaṇita described above and deals with the drawing of the snake-like diagram described under No. 13488.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

अथातस्सम्प्रवक्ष्यामि चक्रं वर्षफणि तथा ।
सस्यार्घवृद्धियुद्धादिफलाफलविनिर्णयः ॥
ऊर्ध्वरेखा अष्टरेखास्तिर्यग्रेखाश्च पञ्चमम् ।
एवमष्टाविंशतिश्च ग्रहाः स्युश्च फणाकृतिः ॥
कृत्तिकादीनि ऋक्षाणि ईशाद्यश्च क्रमाद्दिशेत् ।
आर्द्रादिश्रवणान्तं च कन्यादिधनुरन्तकम् ॥
वर्षकाले स विज्ञेयमिति शास्त्रस्य निश्चितम् ।
मकरं कुम्भमीनं च कर्की वृश्चिक एव च ॥
जलराशिरिति प्रोक्तं शेषाश्च निर्जलाः स्मृताः ।
* * * *
सायाह्ने क्षुद्भयं नृणां निशि चेन्निर्जलागमः ।
उषः(काले) महावृष्टिः परिवेषो यथाक्रमम् ॥

**Colophon:**

इत्यगस्त्यसंहितायां परिवेषक्रमः ॥

**End:**

गन्धर्वनगरं नाम उत्पातानि वदाम्यहम् ।
गन्धर्वनगरं गेहं गानं स्याद्वाद्यघोषकम् ॥
अलाताकृतिधूमाश्च प्र(ा)कारं गोपुराकृतिः ।
गजाश्वपशुपक्ष्यादिनानावर्णाकृतीर्दिशेत् ॥
रात्रौ प्रथमयामादिपूर्वादिवर्णतः क्रमात् ।
नन्दादिरिक्तति(थ)यः क्रूरग्रहस्थितके ॥
गन्धर्वनगरं दृष्ट्वा क्षामडाभ्रं (?) नृपक्षयः ।

**Colophon:**

वर्षफणिचक्रं सम्पूर्णम् ॥

## No. 13492. वर्षवाक्यम्.
## VARṢAVĀKYAM.

Substance, palm-leaf. Size, $9\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 9. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete.

Gives the formula for arriving at the time of the Mēṣasaṅkrānti in week days, Ghaṭikās and Vināḍikās for each of the 60 years commencing with Prabhava, Kali 4969. It also gives the time of the commencement of each of the 12 months in a year.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

वर्षप्रवेशगणनवाक्यम्—

कलियुगादि ४९६९ विक्रमशक १९२५ शालीवाहनवर्षे १७९० वर्तमानप्रभववर्षगणनम्—

साङ्गदमीशं दानविकासं धीमधिरोऽयं नाकमभारम् ।
पावननावं श्रीपतिकामं लोभकलुषं घोटसुवासम् ॥
मे वरनारी तापदपूगी खोभगलोभी दायधिबाणी ।
धीभवनासं नीरनरोयं पाणिमगौरं क्रूरयमाश्रम् ॥

* * * *

कल्यब्दः ४९६९ ; प्रभववर्षम् साङ्गदमीशं ७, ३, ८, ५, ५ ; क+ब्दः ४९७०.

**End :**

क्रोधनवर्षे ५९ ; शीलदशाटी ५, ३, ८, ५, १ ; कल्यब्दः ५०२८ ; अक्षयवर्षम् तेन विटाङ्गी ६, ०, ४, १, ३.

**Colophon :**

वर्षवाक्यमक्षरसङ्ख्या संपूर्णं लिखितम् ॥

वृषभव्यासादिद्वादशसंक्रमणश्लोकः लिख्यते ।

श्रीगुणमित्रो भूविधिप श्रीरितिशूरो भोगवराते ॥
भाव चरोरी तेन वशत्वं लोकजभीतिः स्थूलहयोऽयम् ।
कालधिगारी स्तम्भितनाभिर्नित्यशशीशं यागमयूयम् ॥

---

No. **13493**. वर्षादिविषयकग्रन्थः, कर्णाटकटीकासहितः.

VARṢĀDIVIṢAYAKAGRANTHAḤ WITH KANARESE MEANING.

Pages, 53. Lines, 4 on a page.

Begins on fol. 106*a* of the MS. described under No. 13446.

Incomplete.

On the nature of the influence, good or evil, exercised on the meteorological, economic and other conditions of a country by the planet when they occupy certain positions in relation to each other in a given year.

**Beginning :**

गौरी चारुबला रविशशिनस . . द्देदाननं तोयजं
धीरोनाभनमः समाथमहिमा लक्ष्मी . . . . . ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूरिर्दानबुधैर्हि सद्गति धवं जालन्धरामन्त्रिस-
द्रुद्रो वीरहरोऽसलो . . . . . क्रुधा सूनुजा ॥
रुद्रो भोगिशुभो गुणो हिमदमः सोमोसमोरं भजे
योगस्सीव्यखगि तदाशद्तमो भावो भगश्चारसी ।
गौरीगात्रचिरंखरी युववशीसूतोमजोदेधसे
गोपीजारधिगो नृणां शशिहिमौ धर्मश्शशी सर्वदा ॥

**End :**

. . . भूभुजानां धान्यं समार्घं पयसां समृद्धिम् ।
क्षुद्रक्षितीशाः प्रबलास्समस्ता महीभृतो धर्मपरा भवन्ति ॥
वारेषुमर्धरात्रान्ता पश्चाद्रात्रिं परे दिनम् ।
मन्त्रिमेघस्य सस्यस्य रसधान्यस्य नीरसम् ॥

---

No. **13494.** **वाक्यकरणम्.**

VĀKYAKARAṆAM.

Pages, 102. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13399.

Breaks off in the 7th Adhyāya.

Gives certain tables of calculation for finding out the exact position of the planets Mars, Mercury, Jupiter, Venus and Saturn.

**Beginning :**

शम्बशक्र . . . . नः. ६६०. यो . . . . मः, ७७०, प्रमाणं कुम्भसूनुः ७१९.

* * * *

लक्ष्मीवनार्थनिघ्नः ८०. शूलंगानिदंशनैः १२०. उमाप्पुस्मरादाहज्ञः १९०. राज्यार्हयुद्धदनाः १८०. दरानूरूपनयादीनाम् २१०.

* * * *

कुजमायापरिवृत्ति १५७ समाप्तं वाक्यम् ॥

**End :**

इति वाक्यकरणे षष्ठोऽध्यायः समाप्तः ॥

कुजे माया बुधे रुद्रो गुरौ पुण्यं भृगौ मुनिः ।
धीरो दिनेशतनये पर्यायाः परिकीर्तिताः ।

* * * *

अन्तरद्रुमयोस्साम्ये यस्याद्वाक्येऽन्तराहतम् ।
त्यजेच्छोध्यान्तरहृतं ध्रुववाक्ये हितागमे ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. 13495. वाक्यकरणम्.
VĀKYAKARAṆAM.

Pages, 39. Lines, 4 on a page.

Begins on fol. 6*a* of the MS. described under No. 13446.

Complete in six Adhyāyas.

An astronomical treatise dealing with the determination of week days, the position and movement of the planets, etc., with the time of solar and lunar eclipses, etc.

Contains the following Adhyāyas:—

१. पञ्चाङ्गराहुचारः.
२. ग्रहचारः.
३. छायाधिकारः.
४. ग्रहणाधिकारः
५. उदयास्तमयाधिकारः.
६. पातवैधृतिः.

**Beginning:**

प्रणम्य करिशैलस्थं महः कमललोचनम् ।
भास्करीयानुसारेण गणितं क्रियते लघु ॥
कल्यब्दो मातुलगुणो वर्षवांशेन संयुतः ।
पुनरब्दोन्मानगुणात्सालप्रियविवर्जितात् ॥
त[च्छ]त्समाप्तदिनैर्युक्तं शुक्रवारादिकं दिनम् ।
स्फुट . . . . ढार्कचक्रावधिकं सिनाभक्तावशेषितम् ।
श्रीगुणादिध्रुवं विन्द्यात् भान्तं वाक्यैस्तु दृश्यते ॥

**End:**

तत्कालचन्द्रपातार्कैः पुनः क्रान्ति पुनर्दिनम् ।
यदाक्रान्तिसमस्यातां पातमध्यं तदा भवेत् ॥
तत्कालचन्द्रमार्तण्डमुक्तलक्षणयोर्यदि ॥
गत्यन्तरांशकं प्रोक्तं मासार्धं रविचन्द्रयोः ॥

**Colophon:**

इति वाक्यकरणे पातवैधृतिः षष्ठोऽध्यायस्समाप्तः ॥

No. 13496. वाक्यकरणम्, कर्णाटकटीकासहितम्.
VĀKYAKARAṆAM WITH KANARESE MEANING.

Substance, palm-leaf. Size, $17\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 59. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains one to five Adhyāyas complete and breaks off in the sixth Adhyāya.

Same text as the above, and with Kanarese meaning word by word.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **13497.** **वाक्यकरणदीपिका.**

VĀKYAKARAṆADĪPIKĀ.

Substance, paper. Size, 13½ × 8½ inches. Pages, 152. Lines, 23 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete.

Contains the following Adhikāras :—

१. पञ्चाङ्गराहुचारः.
२. स्फुटाधिकारः.
३. त्रिप्रश्नाधिकारः which includes छायाधिकार.
४. ग्रहणाधिकारः.
५. उदयास्तमयाधिकारः.

A commentary on the Vākyakaraṇa described under No. 13495 by Jambunātha Mahābhāṣyabhaṭṭa Sundararāja, son of Anantanārāyaṇa, who was the pupil of Padmagarbhayati, a famous astrologer who lived at the time of Tippu Sultan. This work is written in accordance with the views of Nīlakaṇṭhācārya of Nallūr in Malabar and has been approved of by Sōmadēva, son of Raṅganātha and grandson of Vāñcayyar who had another son named Varadarāja and who was the pupil of Nṛsiṁhasūri. The author is said to have lived in Viprasadgrāma (Pāpanallūr) on the banks of the river Kāvērī.

**Beginning :**

ज्योतिश्चक्रप्रवृत्ताय ज्योतीरूपाय भास्वते ।
ज्योतिर्दर्शाय भक्तेभ्यो ज्योतिश्शास्त्रकृते नमः ॥
श्रीनीलकण्ठाङ्घ्रिनिविष्टचेताः श्रीसोमदेवानुजिघृक्षयैव ।
विचित्रवाक्यैर्विवृतं पुनश्च प्रकाशयेऽहं करणं लघीयः ॥

स्वाभीप्सितग्रन्थस्य निष्प्रत्यूहपरिसमाप्तये प्रचयगमनविशिष्टाचारपरिपालनाभ्यां च स्वेष्टदेवतानमस्कारपुरस्कारेण चिकीर्षितमर्थं प्रतिजानीते—"प्रणम्य करिशैलस्थम्" इति ।

मू ॥ प्रणम्य करिशैलस्थं महः कमललोचनम् ।
भास्करीयानुसारेण गणितं क्रियते लघु ॥

व्या ॥ प्रशब्देन प्रणन्तुः भक्तिश्रद्धातिशयवत्त्वं त्रिविधनमस्कारश्च प्रतिपाद्यते । प्रणम्य-प्रकर्षेण सर्वैर्मनोवाक्कायैः करणैः ध्यात्वा स्तुत्वा प्रह्वीभूय च । किं करिशैलस्थं हस्तिगिरिनिवासं महः ब्रह्म मह इति श्रुतेः कमललोचनम् कमल-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिव लोचनं यस्य तत्कमललोचनम् । भास्करीयानुसारेण भास्कराचार्यप्रोक्त-हरणपरिध्याद्युपदेशानुसारेण गणितं कालपरिच्छेदोपायभूतं कालक्रियाख्य-गणनं लघुशब्दप्रक्रियातो लघु क्रियते । करिशैलस्थं कमललोचनं महः प्रणम्य भास्करीयानुसारेण लघुगणितं क्रियते इति क्रियाकारकसम्बन्धः । अभिधेयं प्रतिज्ञाय श्रोतृजनप्रवृत्तये द्वितीयेन श्लोकेन तदुत्तरश्लोकादिपादत्रयसहितेन चक्राधिकमित्यन्तेन गणितशास्त्रप्रधानप्रतिपाद्यनवग्रहचाराद्यानयनसाधनीभूतभानु-मण्डलावसानिकभास्करभूमिभ्रमणभगणजनितविवरलक्षणाहर्गणमाह --कल्यब्द इति ।

* * * *

कर्मानुष्ठानकालसमानीतलग्नादिद्वादशभावस्थितस्फुटग्रहगत्यनुरूपशुभाशुभ - फलसंवाददर्शनात् । श्रीजिष्णुनन्दनार्यभटलल्लटनटेशपूर्तदामोदरपरमेश्वरवटश्वेरि-श्रीकेरलनीलकण्ठादिभिरपि उपगतस्फुटार्कचक्रावधिकोऽहर्गणः स्फुटाहर्गणासि-द्ध्यर्थमयमप्याचार्यः सालप्रियशोधनं कृतवान् । सालप्रियशोधनेन मध्यमाह-र्गणस्य स्फुटत्वापत्तौ युक्तिरुच्यते---

* * * *

सुन्दरेशकृते वाक्यकरणस्य प्रकाशने ।
सोमदेवादृतेऽध्यायः प्रथमो लघुरीरितः ॥

**Colophon:**

इति वाक्यकरणे लघुप्रकाशिकायां सोमदेवादृतायां सुन्दरराजविरचितायां प्रथमोऽध्यायः ॥

इति सुन्दरराजसोमदेवविरचितायां वाक्यकरणदीपिकायां स्फुटाधिकारो नाम द्वितीयोऽध्यायः ॥

**End:**

एवं वैधृतेरपि स्पर्शमोक्षकालावानेतव्यौ । अत्र गत्यन्तरांशकहृतमिति आचार्यखलेन(स्खलने)नोक्तवान् । यद्वा सूर्यसिद्धान्तकारादिना स्खालित्येनोक्तं न ज्ञातवान् । ग्रहणस्थित्यर्थ एव गत्यन्तरांशकैः हरणं युक्तमिति श्रीमत्के-रलसद्ग्रामनिवासिनीलकण्ठाचार्येण त्रिस्कन्धविद्यापारदृश्वना षड्दर्शनीपारङ्गते-नाश्वलायनसूत्रेण गर्गगोत्रेण शिवकलसन्द(शान्धि)जातेन गोलचूडामणिनास्म-दनुग्रहार्थे सुन्दरराजप्रश्नोत्तराख्ये ग्रन्थे प्रतिपादितव्यम् । तेन गतियोगेनैव विभज्य स्थितिदलं ज्ञेयम् । षष्ठाध्यायप्रथमेयं(?) द्वितीयाध्याये प्रायेणोक्तमिति न पुनरिदानीं व्याख्यातं प्रक्षिप्तत्वाच्च । अस्याध्यायस्य पञ्चमाध्यायेऽपि बहवः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्लोकाः प्रक्षिप्तास्सन्ति । ते सर्वे निरस्ताः ' श्रीमन्ति(त्ति)पुराज काले पद्वाक्य-प्रमाणज्ञो ज्योतिश्शास्त्रविशारदो यतीश्वरः पद्मगर्भ इति प्रसिद्धोऽपरो बृहस्पति-रिवासीत् । तस्मादेतस्मात् पिता प्रक्षेपव्यतिरिक्तं शुद्धवाक्यकरणमार्यानपि बहूनि गणितान्यध्यैष्ट । अस्मत्पितुरेवास्माकं वाक्यकरणसम्प्रदायान्तद(मीद)शमेव संप्रदा-यशुद्धम् । वाक्यकरणव्याख्या वयं किञ्चित् श्रीमन्नृसिंहशिष्यभूतज्योतिश्शास्त्र-विच्छ्रीवाञ्छयजन्मभारद्वाजवरदराजताद्दग्विधकनिष्ठपुत्रसोमदेवसंप्रदायशुद्ध -वाक्यकरणं चास्माकं संप्रदायसिद्धवाक्यकरणेन सम्मतेन एतद्व्याख्यानसिद्ध-प्रकारसिद्धं यन्मूलं तदेव शुद्धमूलमिति ज्ञेयम् ॥

सुन्दरेशकृते वाक्यकरणस्य प्रकाशने ।
सोमदेवाहतेऽध्यायः पञ्चमो लघुरीरितः ॥
अनन्तनारायणसूनुना पुनः कवेरकन्यातटवासिना मया ।
प्रकाशिता वाक्यकृतिर्लघीयसी द्विजेशदेवानुजिघृक्षया लघु ॥

**Colophon:**

विप्रसद्ग्रामवासिना अनन्तनारायणपुत्रजम्बूनाथमहाभाष्यभट्टसुन्दरराजेन श्रीवाञ्छयजन्मश्रीरङ्गनाथपुत्रसोमदेवाहतेन विरचितायां वाक्यकरणलघुदीपि-कायां पञ्चमोऽध्यायस्समाप्तः ॥

---

## No. 13498. वाक्यकरणदीपिका.
## VĀKYAKARAṆADĪPIKĀ.

Pages, 84. Lines, 9 on a page.

Begins on fol. 9*a* of the MS. described under No. 13400.

Breaks off in the third Adhyāya.

Same work as the above.

---

## No. 13499. वाक्यगणितम्, द्राविडव्याख्यासहितम्.
## VĀKYAGAṆITAM WITH TAMIL MEANING.

Pages, 39. Lines, 7 on a page.

Begins on fol. 8*a* of the MS. described under No. 13401.

Incomplete.

On the method of determining accurately the position of the planets in a given year. From the first stanza found herein, it is inferred that the work should have been written between Śakas 1729 and 1789 corresponding to 1803 and 1866 A.D.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

षष्टिस्त्रयोविंशतिगुणितं व्यपगतसंवत्सरेण संमिश्रम् ।
नववेदाग्निसंयुक्तं शकनृपकालं विजानीयात् ॥
धूसीकालयुतं वर्षं कल्यब्दमिति कथ्यते ।
कल्यब्दो मातुलगुणान् वर्षवांशेन संयुताम् ॥
पुनरब्दान् मानगुणान् सालप्रियविवर्जितः ।
तत्समाक्षदिनैर्युक्तं शुक्रवारादिकं दिनम् ॥

* * * *

सूर्यस्फुटसाधनम्—

गतमासैर्गतदिनैः शेषसङ्क्रमनाडिभिः ।
तत्र योग्यादिकं योग्यं नाडीष्वेव रविस्फुटम् ॥

**End:**

ஹரணமென்னும்படி வஸ்துத்தைவச்சு மொக்ஷூ° என்று ஹரிச்சு வந்த கலையை முன்பாகங்களில் கூட்ட ஒரு என்னு மூணு ஈ கலையைக்கொண்டு தாக்காலிகஸ்பஷ்டமெய்யா ஸ்பஷ்டு° என்று கலையாகக் கூட்ட இது ராஹுஸ்புடம். இந்த ராஹுஸ்புடத்தை ஷணம் 12 ராசியில் வாங்க இது ராஹுஸ்புடமாம். இந்த ஸ்புடத்தில் ௬ ராசிகூட்ட கேது ஸ்புடமாம்.

---

## No. 13500. वाक्यगणितम्, द्राविडटीकासहितम्.
## VĀKYAGAṆITAM WITH TAMIL MEANING.

Pages, 27. Lines, 25 on a page.

Begins on fol. 6*b* of the MS. described under No. 13402.
Incomplete.
This MS. was copied from the one described under the last number.
Same work as the above.

---

## No. 13501. वाक्यगणितम्, आन्ध्रटीकासहितम्.
## VĀKYAGAṆITAM WITH TELUGU MEANING.

Pages, 9. Lines, 8 on a page.

Begins on fol. 11*a* of the MS. described under No. 13449.
Incomplete.
Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13502. वाक्यगणितम्.
## VĀKYAGAṆITAM.

Substance, palm-leaf. Size, 15 × 1⅛ inches. Pages, 17. Lines, 7 on a page. Character, Grantha and Tamil. Condition, good. Appearance, old.

Begins on fol. 34*a*. The other works herein are Lampāka 1*a*, Pañcāṅgagaṇita 42*b*.

Incomplete.

Same work as the above.

---

## No. 13503. वाक्यगणितविचारः.
## VĀKYAGAṆITAVICĀRAḤ.

Substance, palm-leaf. Size, 13½ × 1 inches. Pages, 26. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Wants the beginning and the end.

A discussion on the relative importance of the two methods of drawing up the Hindu calendars, viz., that based upon the rules enunciated by Vararuci and generally known as Vākyagaṇitam and that based upon the direct observation of the heavenly bodies, i.e., Dṛggaṇitam. Herein the author apparently comes to the conclusion that the method of Vākyagaṇitam is by far the better one.

**Beginning :**

एवं सामान्यत आर्षत्वे सिद्धे—

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥

इति वैयाकरणैर्मङ्गलार्थतया पठ्यमानश्लोकेन तस्य वररुच्याख्यमुनिप्रणीतत्वसिद्धिरिति तदे[व]तदत्यन्तपरिहास्यम् । उदाहृतश्रुतिस्मृत्योर्वाक्यशब्दस्याखण्डस्यैव विद्याविशेषवाचकत्वेन भाष्यादिषु व्याख्याततत्वात् वाक्यशब्दस्य पृथगर्थकत्वानुपपत्तेः । अत्र वाको वाक्यशब्दस्तर्कशास्त्रपर इति भाष्यकृतः । किंस्विदासीत्पूर्वचित्तिरित्यादिः प्रश्नोत्तररूपः मात्रभाग इति विज्ञानेश्वरादयः । तत्र श्रुतौ ज्योतिश्शास्त्रवाचकं पादान्तरं नास्तीत्येतदपि पूर्वोत्तरपर्यालोचनाविधुरम् ।

* * *

नचापौरुषेयं भास्करतन्त्रमार्षमूलकं भविष्यति तत्प्रामाण्याच्चार्षमूलकत्वमस्याप्यविरुद्धमिति वाच्यम् । भास्करीयस्यार्यभटीयाख्यापौरुषेयतन्त्रान्तरमूलकत्वस्य विस्पष्टत्वात् । आर्यभटस्यापि षष्ट्यब्दानां षष्टिः यदा व्यतीताः त्रयश्च युग-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पादाः त्र्यधिका विंशतिरब्दाः तदेह मम जन्मनोऽतीता इति स्वीयश्लोकेनैव स्वजन्मकालकथनात् ।

* * * *

पौरुषेयग्रन्थानां दृग्वैषम्यं भूयिष्ठमार्षाणां तु अल्पतरमिति। नचैतावता तत्प्रामाण्यसिद्धिः । अत एव वाक्यकरणकृता आर्यभटीयं सर्वकालेषु दृक्समं कर्तुं संस्कारं कल्पयिता तस्य प्रामाण्यं निर्व्यूढम् । अत एव च वाक्यकरणं शिष्टैरप्यङ्गीकृतमिति चेन्न । एवं सति वाक्यकरणकृतः आर्यभटीयं संस्कृत्य प्रमाणं कुर्वतः ततोऽपि लघुतया आर्षग्रन्थानेव संस्कृत्य तत्प्रमाणीकरणे अत्यन्तसुकृतोपपत्तेः ।

**End :**

तुल्यौ राश्यादिभिः स्याताममावास्यान्तकालिकौ ।
सूर्येन्दू पौर्णमास्यन्ते भार्धे भागादिभिस्समौ ॥

इति वचनविरोधश्च । तत्रामावास्यान्ते सूर्येन्द्वोस्समकालत्वं पौर्णमास्यन्ते षड्राश्यन्तरितत्वं न नियतमित्यभिधानादिति चेन्मैवम् । अयनादिसंस्कारस्तावत् दृक्सिद्ध्यर्थोऽपि सतिथिनक्षत्रादिकालज्ञानोपयुक्तय . . . . स एव स्फुटम् । स्फुटीकरणन्तु तिथिनक्षत्राद्यानयनात्प्रागेवोक्तत्वात्तत्र उपयुज्यते । तत्पुनः दृक्सिद्ध्यर्थमपि न सर्वे.

---

## No. 13504. सङ्क्रान्तिवाक्यम्.
## SAṄKRĀNTIVĀKYAM.

Pages, 6. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 13449.

Incomplete.

On the calculations to be made with a view to ascertaining the exact time when the Sun passes from one Rāśi (sign of the zodiac) to another This work was apparently written between Śaka 1729 and 1789, i.e., 1806 to 1866 A.D.

**Beginning :**

प्रभवादिगताब्दं तु धारासेव्यशकाब्दकम् ।
धूसीकालयुतं वर्षं कल्यब्दमिति कथ्यते ॥
कल्यब्द . . . . गुणान् वर्ष(र्षां)शेन संयुतम् ।
पुनरब्दान् मासगुणान् नालप्रियविवर्जितान् ॥
तस्समासैर्दिनैर्युक्तं शुक्रादिकलिवासरम् ।
शेषं षष्टिगुणं कृत्वा मेषसङ्क्रान्तिनाडिका ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माससङ्क्रान्तिवाक्यम्—

. . . . १, विश्वाधिकप्रीतः २, श्रेष्ठक्षेमगन्धः ३.

**End:**

द्वादश्यादौ पौर्णमान्ते कृष्णे चतुर्थ्यमादिषु ।
सप्तम्यान्तैकदश्यादौ भवादिभद्रसप्तकम् (?) ॥
चतुर्दश्यां त्य शे गुनि अमाश्वातुष्पदे नगे (?) ।
प्रतिपद्यौ किमिस्तुघ्ने . र . . . . . . . ॥

---

No. **13505.** सिद्धान्तशिरोमणिः, वासनाभाष्यसहितः.

SIDDHĀNTAŚIRŌMAṆIḤ WITH VĀSANĀBHĀṢYA.

Substance, paper. Size, $8\frac{1}{2} \times 6\frac{5}{8}$ inches. Pages, 376. Lines, 30 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the Adhyāyas entitled Gōla and Grahagaṇita.

Foll. 189 to 249 contain Navagrahapadaka.

The text is the same as that described under R. No. 313 of the Triennial Catalogue, Vol. I, Part I-A. The commentary is called Vāsanā and was written by the author of the text, Bhāskarācārya. The work has been printed.

**Beginning:**

गोलाध्याये निजे या या अपूर्वा विषमोक्तयः ।
तास्ता बालावबोधाय संक्षेपाद्विवृणोम्यहम् ॥

गोलग्रन्थो हि सविस्तारतया प्रोज्वलः। किन्तु अत्र अपूर्वा या या वाक्यैरुक्ता उक्तयो विषमास्तास्ताः सङ्क्षेपाद्विवृणोमि । अत्र या या इति प्रथमान्तं पदम् । तास्ता इति द्वितीयान्तं पदं । बुद्धिमता व्याख्येयम् । तत्रादौ तावत् अभीष्टदेवतानमस्कारपूर्वं गोलं ब्रवीमीत्याह—

सिद्धिं साध्यमुपैति यत् स्मरणतः क्षिप्रं प्रसादात्तथा
यस्याश्चित्रपदा स्वलङ्कृतिरलं लालित्यलीलावती ।
नृत्यन्ती मुखरङ्गगेव कृतिनां स्याद्भारती भारती
तं तां च प्रणिपत्य गोलममलं बालावबोधं ब्रुवे ॥

ब्रुवे वच्मि । कः कर्ता, अहं भास्करः । कं, गोलं गोलाध्यायम् । किंविशिष्टम् ? अमलम् निर्दूषणम् ।

* * * *



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तां च प्रणिपत्येति । मङ्गलादीनि मङ्गलान्तानि च शास्त्राणि अलङ्कारकृत। मतानि । अतः सिद्धिवृद्धिशब्दावाद्यन्तयोर्निक्षिप्तौ ।

अथ गोलग्रथनकारणमाह ।

मध्याद्यं द्युसदां यदत्र गणितं तस्योपपत्तिं विना
प्रौढिं प्रौढसभासु नैति गणको निस्संशयो न स्वयम् ।
गोले सा विमला करामलकवत् प्रत्यक्षतो दृश्यते
तस्मादस्म्युपपत्तिबोधविधये गोलप्रबन्धोद्यतः ॥

इदानीं गोलप्रशंसया गोलानभिज्ञगणकोपहासं श्लोकद्वयेनाह—

भोज्यं यथा सर्वरसं विनाज्यं राज्यं यथा राजविवर्जितं च ।
सभा न भातीव सुवक्तृहीना गोलानभिज्ञो गणकस्तथात्र ॥

**End:**

इदानीं पातप्रयोजनम्—

पातस्थितिकालान्तर्मङ्गलकृत्यं न शस्यते तज्ज्ञैः ।
स्नानजपहोमदानादिकमत्रोपैति खलु यतो वृद्धिम् ॥

**Colophon:**

इति श्रीमहेश्वरोपाध्यायसुतभास्कराचार्यविरचिते सिद्धान्तशिरोमणौ वासनाभाष्ये मिताक्षरे गणिताध्याये पाताध्यायः ॥

समाप्तोऽयं गणिताध्यायः पाताध्यायग्रन्थः ३४०१ । सर्वगणिताध्यायग्रन्थसंख्या सव्याख्या ॥ ४८३४९ ॥

चक्षुर्लौकिकवैदिकव्यवहृतेः प्रत्यक्षसत्प्रत्ययं
शास्त्रं खेचरचक्रचारचरिते सिद्धान्तबोधप्रदम् ।
तस्य प्रस्फुटसोपपत्तिरचनाचातुर्यचिन्तामणिं
श्रीसिद्धान्तशिरोमणिं व्यरचयच्छ्रीभास्करार्यः सुधीः ॥

The scribe adds—


या नारी तु स्तनावर्ता गुल्फावर्ता प्रदक्षिणे ।
दुश्शीला भ्रमणं तत्र परपुरुषरता भवेत् ॥
भ्रूयुग्मे च भ्रुवोर्मध्ये पादावर्ता भवन्ति या ।
विधवा जायते तस्य भ्रमणं च यथेप्सितम् ॥
भुजे मध्ये यथावर्ता हंसावर्ता भवे . . . ॥

**Colophon:**

. . . . . . . . . . संपृच्छे पञ्चमोऽध्यायः ॥

---

## No. 13719. जातकाभरणम्.

## JĀTAKĀBHARAṆAM.

Substance, paper. Size, 11 × 4¾ inches. Pages, 14. Lines, 10 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, old.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



This work seems to be the same as that described under No. 3075 of the India Office Library Catalogue by Daivajña Ḍuṇḍirāja who quotes Yavanācārya.

Contains the following subjects :—

१. नष्टजातकाध्यायः, २. चन्द्रनिर्याणम्.

**Beginning :**

आधानकाले(लो)ऽप्यथ जन्मकालो न ज्ञायते यस्य नरस्य नूनम् ।
प्रसूतिकालं प्रवदन्ति तस्य नष्टाभिधानादपि जातकश्च ॥
तज्जातकं येन शुभाशुभानि जातस्य जन्तोर्जननोत्थकालात् ।
तस्मिन्प्रनष्टे सति जन्मकालो येनोच्यते तेन हि नष्टकं तत् ॥

* * *

**Colophon :**

इति श्रीदैवज्ञढुण्डिराजविरचिते जातकाभरणे नष्टजातकाऽध्यायः ।

**End :**

आश्विनस्यासिते पक्षे द्वितीयायां गुरोर्दिने ।
कृत्तिकानामनक्षत्रे सायं मृत्युर्न संशयः ॥
इतीरितं तु निर्याणं यवनाचार्यसम्मतम् ।
मीनस्थे यामिनीनाथे भवेदत्र न संशयः ॥

इति मीनराशिस्थितिचन्द्रनिर्याणम् ॥

**Colophon :**

इति श्रीदैवज्ञढुण्डिराजविरचिते जातकाभरणे नष्टजन्मपत्रिकानिर्याणाध्यायस्सम्पूर्णम्(:) ॥

The scribe adds—

संवत् १८२७ फाल्गुनमासे कृष्णपक्षे तिथौ ३ शनिवासरे लिखितं मिश्रकरामेण स्वार्थे परोपकारार्थे च ॥

---

## No. 13720. जातकाभरणम्.

## JĀTAKĀBHARAṆAM.

Substance, palm-leaf. Size, 9¾ × 1⅛ inches. Pages, 23. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old

Incomplete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Similar to the above. By Rāmacandra who wrote it between 1747 and 1807 A.D.

Contains the following Adhyāyas :—

१. सिद्धान्ताध्यायः.
२. भावाध्यायः.
३. सृष्टिसाधनाध्यायः.
४. बलाध्यायः.

**Beginning :**

नत्वा शिवपदाम्भोजं रामचन्द्रः प्रवक्ष्यहम् ।
श्रीपतिग्रन्थसदृशं जातकाभरणं स्फुटम् ॥

कल्यब्द(ा)नयनम्—

अशीतिनिहता षष्टिर्गजवेदसमन्विता ।
प्रभवाद्यब्दसंयुक्ता भवेयुः कलिवत्सराः ॥

अथ सृष्ट्यब्दानयनम्—

खचतुष्काष्टनागार्ष(क्ष)पवनाङ्कहिमांशुभिः । १९५९८८०००० ।
कल्यादिवत्सरा युक्ता भवेयुस्सृष्टिवत्सराः ॥

* * * *

ग्रहाणामुच्चादीनि—

सूर्यस्य मेषो दशभिस्तु भागैरुच्चस्त्रिभिस्स्याद्वृषभो हिमांशोः ।
मृगोऽष्टविंशैर्धरणीसुतस्य बुधस्य कन्या पवनेन्दुभिश्च ॥
शरैः कुलीरः सुरराजसूरेः शुक्रस्य मीनोऽद्रिविलोचनैश्च ।
शनैस्तुला व्योमकरैस्तु नीचाः स्वस्वोच्चराश्यन्तगृहा भवेयुः ॥

* * * *

**Colophon :**

इति वक्ष्यमाणगणितोपयोग्यसिद्धान्ताध्यायः ।

**End :**

इति बलाध्यायः ॥

**Colophon :**

युद्धं पञ्चविधं ज्ञेयं भेदमुल्लेखनं बुधैः ।
रश्मिसङ्घट्टनं कूटमपसव्यं यथाक्रमम् ॥

* * * *

उदक्स्थो दीप्तिमान् स्थूलो जयी याम्ये जितो बली ।
उदक्स्थो दक्षिणस्थो वा भार्गवः प्रायशो बली ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13721. जातकालङ्कारः.
## JĀTAKĀLAṄKĀRAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 40*b* of the MS. described under No. 13606.

Complete.

Similar to the above.

**Beginning:**

देहाधिपस्सपापः षष्ठाष्टव्ययेषु स्थितश्चेत् न देहसौख्यम् । षष्ठष्ट(ष्ठाष्टम)पः तत्र स्थितश्चेत् तदेव फलं, देहसौख्यं नास्तीत्यर्थः । लग्नस्थोऽपि लग्नपापास्तथा व्याधिमान् । बलहीनोऽपि केन्द्रत्रिकोणेषु स्थितश्चेश्चा(दा)धिर्न भवति । किन्तु कोपवान् ।

**End:**

धनभाग्यलाभाधिपः केन्द्रत्रिकोणेषु स्थितः तत्तत्स्थानराशिपाः केन्द्रत्रिकोणेषु स्थिताश्चेत्तदा बहुधनवान् भवति ॥

**Colophon:**

जातकालङ्कारः समाप्तः ॥

---

## No. 13722. जातकालङ्कारः.
## JĀTAKĀLAṄKĀRAḤ.

Pages, 31. Lines, 16 on a page.

Begins on fol. 31*a* of the MS. described under No. 13601.

Complete.

Same work as that described under R. No. 1288(*c*) of the Triennial Catalogue of MSS., Vol. II, Part I-A, wherein see for the beginning.

**End:**

मन्दस्य लग्ने मन्दे पापपीडितदेहः दरिद्रः दीर्घरोगः । उच्चे स्थिते परबलद्रव्याधिकारी तिलमाषकोद्रवाशी कृष्णधान्यवृद्धिमान् । द्वितीये मन्दे पितृव्यभावः दारद्वयं पापयुते पापम् । तृतीये मन्दे भ्रातृभा(व)हानिः । चतुर्थे मन्दे पापयुते मातृविपत् मातृद्वयम् । पञ्चमे मन्दे पुत्रहानिः दारिद्र्यम् उत्सुकश्च । षष्ठे मन्दे रविवत्फलम् । सप्तमे मन्दे व्यभिचारी कलत्रद्वयम् । अष्टमे मन्दे दीर्घायुः । नवमे मन्दे जीर्णोद्धारणं गोपुरादिकर्ता । दशमे मन्दे गङ्गास्नानम् । अन्यत्र रविवत् फलम् ॥

**Colophon:**

इति जातकालङ्कारस्समाप्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13723. जातकालङ्कारः.
## JĀTAKĀLAṄKĀRAḤ.

**Pages**, 64. Lines, 19 on a page.

Begins on fol. 37*a* of the MS. described under No. 5764, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete. Contains a few Tamil passages at the end.

Same work as that described above, but the end is different.

**End:**

उक्तयोगेषु गुलिकयोगे उत्तमफलनिश्चयः । द्वितीयराहुस्थितः पापदृष्टश्चेत् केन्द्रवादिकृत् शीतान्नभुक् भवति । लग्नपे बलवति धनस्थे निधनप्राप्तिः । ये पापग्रहपश्चनाडीप्राप्तिः शुक्रचन्द्रान्यतरः स्यात् तृतीयस्थितौ सुखभुक्तिः ॥

**Colophon:**

जातकालङ्कारः समाप्तः ॥

---

## No. 13724. जातकालङ्कारः.
## JĀTAKĀLAṄKĀRAḤ.

Pages, 20. Lines, 7 on a page.

Begins on fol. 17*a* of the MS. described under No. 13648.

Incomplete.

Similar to the work described under R. No. 1288(*c*) of the Triennial Catalogue of MSS., Vol. II, Part I-A.

**Beginning:**

अथ जातकालङ्कारमार्गे वक्ष्ये पण्डितपामरसाधारणम् । अथ लग्नाधिपद्वादशभावेषु केन्द्रत्रिकोणेषु तद्भावफलं वक्ष्ये लग्नाधिपः केन्द्रत्रिकोणेषु स्थितश्चेत् देहभावफलमुत्तमम् । षष्ठाष्टमव्ययेषु स्थितश्चेत् देहाधिपेन देहेन जातकस्य देहवर्णं वक्तव्यम् । शुभाशुभे फलं विचारणीयम् ।

**End:**

अनागतमदैवज्ञकालज्ञानं ज्ञात्वा जातकालङ्कारोक्तं भूतभविष्यद्वर्तमानं करतलामलकं यथा तथा प्रकाशितं कालज्ञानदैवज्ञचिन्तामणाविति ।

**Colophon:**

द्वादशभावस्समाप्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रविशुक्रौ रक्तवर्णौ श्वेतौ शशिबुधौ तथा ।
गुरुभौमौ पाटलौ च कृष्णवर्णश्शनैश्चरः ॥
राहुः कर्बुरवर्णश्च केतुस्स्याच्चित्रवर्णकः ।

## No. 13725. जैमिनिसूत्रम्.
## JAIMINISŪTRAM.

Pages, 25. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 13688.

Contains up to the end of the second Pāda of the fourth Adhyāya.

Same work as that described under R. No. 371(*g*) of the Triennial Catalogue of MSS., Vol. I, Part I-B, wherein see for the beginning. This is a treatise in the form of Sūtras dealing with horoscopy.

**End:**

दारभाग्ये च । वर्णपुराश्रयकोणेषु शुक्रे च । कोणयोश्शुभेषु । मित्र-प्रागपव . . . . . . . .

**Colophon:**

इत्युपदेशसूत्रे चतुर्थाध्याये बलविचारो नाम द्वितीयः पादः ॥
बुधशुक्रयोर्युग्मे स्त्रीजननम् ॥

## No. 13726. जैमिनिसूत्रम्.
## JAIMINISŪTRAM.

Pages, 6. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 13618.

Contains the Adhyāyas one and two.

Same work as the above.

## No. 13727. जैमिनिसूत्रम्.
## JAIMINISŪTRAM.

Pages, 12. Lines, 7 on a page.

Begins on fol. 12*a* of the MS. described under No. 13717.

Contains from the beginning of the first Pāda of the third Adhyāya to the end.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13728. जैमिनिसूत्रम्.
## JAIMINISŪTRAM.

Pages, 11. Lines, 7 on a page.

Begins on fol. 105*a* of the MS. described under No. 13619.

Contains Adhyāyas one and two complete.

Same work as the above.

---

## No. 13729. जैमिनिसूत्रम्.
## JAIMINISŪTRAM.

Pages, 46. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 13708.

Incomplete.

Same work as the above.

---

## No. 13730. जैमिनिसूत्रम्.
## JAIMINISŪTRAM.

Pages, 13. Lines, 7 on a page.

Begins on fol. 69*a* of the MS. described under No. 13651.

Contains the Adhyāyas 1 to 8.

Similar to the above. The name given above is what is found in the margin at the beginning of the work.

**Beginning:**

अथ सर्वेषां भावानां द्वादशभावफलं वक्ष्यते ॥

लग्नाधिपनीचराशिकुटुम्बशत्रुगतत्वात् तस्य देहसौख्यं परिमितम् । जलराशिगतत्वात् स्थौल्यम् । शुष्कराशिगतत्वाच्छुष्कम् । एषु राशिषु शुभग्रहसम्बन्धश्चेत् देहसौख्यमस्ति । पूर्वोक्तदोषं नास्ति ।

**End:**

व्ययहीनोऽत्र लोभी च निर्घृणः पिशुनाग्रणीः ॥

लग्नाष्टमेनभाग्येशकेन्द्रस्वोच्चगता यदि ।

यदि जातोऽतिदीर्घायुः संपन्नाविभवात्सुखी ॥

... वक्ता तारतम्यस्य तमेकं वेधसं विना ।

...नीये स्थिते गवसारेण भावबोधं मया कृतम् ॥

द्वि(वि)द्वच्चित्ता...

**Colophon:**

अष्टमोध्यायः ॥ ...दपि ... लग्नसंयुतम् ।

दिनेन गतनाडी तु चतुष्कातिमनुर्णयम् ॥

सप्तविंशं हरेद्भागं जन्मनक्षत्रा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **13731.** जैनिमिसूत्रम् , कर्णाटकटीकासहितम्.

JAIMINISŪTRAM WITH KANARESE MEANING.

Pages, 40. Lines, 6 on a page.

Begins on fol. 85*a* of the MS. described under No. 13619.

Contains the Adhyāyas one and two.

Same work as that described under No. 13729 ante, but the notes here are in the Kanarese language.

---

No. **13732.** जैमिनिसूत्रम् , सव्याख्यानम्.

JAIMINISŪTRAM WITH COMMENTARY.

Pages, 29. Lines, 6 on a page.

Begins on fol. 52*a* of the MS. described under No. 13619.

Contains the first Adhyāya complete.

Same work as the above and with a commentary which is the same as that described under R. No. 1840(*b*) of the Triennial Catalogue of MSS., Vol. II, Part I-C, wherein see for the beginning.

**End:**

(सू.) शनिराहुभ्यां प्रसिद्धिः ।

कारकांशे शनिराहुभ्यां परभूतत्वस्य प्रसिद्धिः ।

(सू.) गोपनमन्येभ्यः ।

अन्ये (भ्यः) पापग्रहेभ्यः । गोपनं भवति ।

(सू.) शुभवर्गे अपवादमात्रम् ।

कारकांशे शुभवर्गेण(न)परजातः । किं तु अपवाद एव ।

(सू.) द्विग्रहे कुलमुख्यः ।

तस्मिन् शुभग्रहद्वये कुलश्रेष्ठो भवति ॥

**Colophon:**

इत्युपदेशसूत्रे प्रथमाध्यायस्समाप्तः ॥

---

No. **13733.** जैमिनिसूत्रम् , सव्याख्यानम्.

JAIMINISŪTRAM WITH COMMENTARY.

Pages, 19. Lines, 9 on a page.

Begins on fol. 99*a* of the MS. described under No. 13618.

Breaks off in the first Pāda of the second Adhyāya.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **13734.** जैमिनिसूत्रम् , सव्याख्यानम्.

JAIMINISŪTRAM WITH COMMENTARY.

**Pages,** 42. **Lines,** 18 on a page.

Begins on fol. 3*a* of the MS. described under No. 13570.

Contains the first Adhyâya.

Same work as the above

---

No. **13735.** जैमिनिसूत्रम् , सव्याख्यानम्.

JAIMINISŪTRAM WITH COMMENTARY.

**Pages,** 32. **Lines,** 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 13673.

Contains the first Adhyâya.

Same work as the above.

---

No. **13736.** जैमिनिसूत्रम् , सव्याख्यानम्.

JAIMINISŪTRAM WITH COMMENTARY.

**Pages,** 22. **Lines,** 8 on a page.

Begins on fol. 39*a* of the MS. described under No. 13688.

Contains the first Adhyâya.

Same work as the above.

---

No. **13737.** जैमिनिसूत्रम् , सव्याख्यानम्.

JAIMINISŪTRAM WITH COMMENTARY.

**Pages,** 6. **Lines,** 8 on a page.

Begins on fol. 109*a* of the MS. described under No. 13618.

Breaks off in the second Pāda of the first Adhyâya.

Similar to the above. The commentator's name here is not known.

**Beginning :**

उपदेशं व्याख्यास्यामः । उपदेशं विज्ञातुमशक्यशास्त्रं जातकशास्त्रं जैमिनिप्रणीतं व्याख्यास्यामः व्याख्यानं कुर्मः । अभिपश्यन्त्यृक्षाणि ऋक्षाणि मेषादिराशयः अभिपश्यन्ति अभिमुखराशीन् पश्यन्ति ।

**End :**

केतौ द्वितीये स्थिते गजव्यवहारवन्तः चोराश्च भवन्ति । तत्र २६१२ मन्दसर्पयोस्ताम्बूलदायी । लग्नादारुढात् कारके.

* * * *

श्रेणिः प्रश्नाक्षराणां तदपि च गुणितं चान्त्यवर्णेन युक्तं
बन्ताष्टौ लोकपाला रविधृतिमनुभिर्विंशतिर्मूर्च्छनाभिः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वर्षा मासाश्च पक्षाः तिथिरुडुभवनं वारराशिक्रमेण
एवं साध्यं नराणामविकलमतिभिर्जातकं नष्टसंज्ञम् ॥

---

No. **13738.** जैमिनिसूत्रव्याख्या, ज्योतिःप्रदीपिका.

JAIMINISŪTRAVYĀKHYĀ: JYOTIḤPRADĪPIKĀ.

Pages, 33. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 13717.

Contains the first Adhyāya.

Same commentary as the above.

---

*No. **13739.*** जैमिनिसूत्रवृत्तिः, आन्ध्रटीकासहिता.

*JAIMINISŪTRAVṚTTIḤ WITH TELUGU MEANING.*

Pages, 27. Lines, 9 on a page.

Begins on fol. 116*a* of the MS. described under No. 13618.

Contains the second Adhyāya which breaks off in the third Pāda.

Another commentary on the Jaiminisūtras described under No. 13725 ante. The subjects treated of in the Āyurdaśā are summarized in the introductory stanzas.

**Beginning:**

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥
आदावायुर्निर्णयश्च योगास्तदनु तत्फलम् ।
भावानां द्वादशानां च बलाबलविचारणम् ॥
जातस्य जन्मलग्नाद्वा यद्यद्वक्तव्यमस्ति तत् ।
इह जन्मनि यद्वृत्तं परलोके यदस्ति च ॥
पूर्वजन्मनि वृत्तान्तं देवताराधनं तथा ।
मातापितृणां भ्रातॄणां कलत्रस्य धनस्य च ॥
पुत्रोत्पत्तिं कष्टदशां राजसंमानमेव च ।
विद्यावाप्तिं राजकोपं यानप्राप्तिं निरोगताम् ॥
रूपं जातस्य भार्यायाः कर्म चान्यच्छुभाशुभम् ।
शारीररोगा ये चान्ये भौतिकोत्थाद्युपद्रवाः ॥
ब्रह्मणा लिखितं यद्यल्ललाटे संप्रकाश्यते ।
तत्सर्वं जैमिनिः प्राह तदालोच्य प्रकाश्यते ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आदावायुर्दायनिर्णयः क्रियते—

आयुः पितृदिनेशाभ्याम्। पितृशब्देन लग्नमभिधीयते दिनशब्देनाष्टममुच्यते। तयोरीशौ पितृदिनेशौ ताभ्यां लग्नेशाष्टमाधिपतिभ्याम्। आयुः आयुर्निर्णयः।

**End:**

शुभग्रहास्सिते पक्षे पापाः कृष्णे बलाधिकाः।
अतिह्यर्केज्यसितारात्राविन्द्वक्यौरास्सदा बुधः॥
स्वाब्दे मासि दिने कालहोरायां सर्वखेचराः।
बलिनः कालवीर्येण चेष्टाबलमिहोच्यते॥
वक्रगायुधसौम्यस्थास्सचन्द्रा दृश्यमूर्तयः।
चेष्टाबलंतु(लसमा)युक्ताः चन्द्रार्कावुत्तरायणे॥
शनिकुजबुधगुरुभृगुशशिदिनपतयः क्रमेणैव।
बलसप्तमभागवृद्ध्या बलिनस्स्युस्ते निसर्गतः खेटाः॥
त्रिदशत्रिकोणचतुरश्रसप्तगानवलोकयन्ति चरणाधिवृद्धितः।
रविजामरेज्यरुधिराः परे च य क्रमशो भवन्त्यखिलवीक्षणेऽधिकाः॥

---

No. **13740.** जैमिनिसूत्रार्थप्रकाशिका.

JAIMINISŪTRĀRTHAPRAKĀŚIKĀ

**Pages, 49. Lines, 4 on a page.**

Begins on fol. 1*a* of the MS. described under No. 13555.

Contains the following Paṭalas :—

१. . . . . . . .
२. कारकांशफलनिरूपण.
३. पदाधिकारनिरूपण.
४. उपपदाधिकारनिरूपण.
५. आयुर्दायनिर्णय.
६. आयुर्दायदशानिरूपण.
७. पित्राद्यायुर्दायनिर्णय.
८. आयुर्दायदशाफलगोचारफलादिनिरूपण.

A metrical commentary on the Sūtras of Jaimini by Ākumalla Nṛsiṁhasūri.

Complete.

**Beginning:**

वन्दे वृन्दारकेन्द्रादिवन्दिताङ्घ्रिसरोरुहम्।
प्रत्यूहकदलीव्यूहभञ्जनं कुञ्जराननम्॥
भूरिसारदयोन्निद्रबोधमुद्रोल्लसत्करः।
देवो जगद्गुरुस्साक्षात् सन्निधत्तां सदा हृदि॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जैमिनिं मुनिमानम्य तत्सूत्रार्थप्रकाशिका ।
श्लोकैरानुष्टुभैरेषा नृसिंहेन विरच्यते ॥
पश्यन्त्यभिमुखान् राशीन् पार्श्वभानि च राशय ।
तन्निष्ठाश्च ग्रहास्तद्वत् पश्यन्त्य(त्र) तु नान्यथा ॥
प्रक्रियैवं चराः स्थारनून् पश्यन्ति स्वधनं विना ।
अन्त्यं विना चरं सर्वान् चरान् पश्यन्ति च स्थिराः ॥
विनात्मानं द्विदेहास्तु द्विदेहान् त्रीन् प्रपश्यति ।
तन्निष्ठाश्च ग्रहास्तद्वत् पश्यन्तीत्ययमागमः ॥

* * * *

**Colophon :**

इत्याकुमल्ल नृसिंहसूरिविरचितायां सूत्रार्थप्रकाशिकायां प्रथमः पटलः ॥

**End :**

उच्चे राहौ नीचसंस्थे च तस्मिन् शूलाद्याज्ञा राजकोपोद्भवा स्यात् ।
उच्चे केतावाधिपत्यं च भुक्तिर्नीचे तस्मिन् गेहदाह्ये नृपाज्ञा ॥
कारागेहप्रीतिरत्यन्तभीतिर्मासानां चोत्पाटनं संभवे च ।
एतत्सर्वं सम्प्रदायानुरोधाद्रव्यादीनामुच्चनीचप्रसिद्धम् ॥

**Colophon :**

इति श्रीमदाकुमल्ल नृसिंहसूरिविरचितायां सूत्रार्थप्रकाशिकायामायुर्दायदशा-फलगोचरफलादिनिरूपणं नाम अष्टमः पटलः ॥

---

## No. 13741. जैमिनिसूत्रार्थप्रकाशिका.

## JAIMINISŪTRĀRTHAPRAKĀŚIKA.

Pages, 12. Lines, 7 on a page.

Begins on fol. 23*a* of the MS. described under No. 13631.

Contains the seventh and the eighth Paṭalas of which the former wants the beginning and the latter the end.

Same work as the above.

---

## No. 13742. ज्योतिश्शास्त्रसङ्ग्रहः.

## JYOTIŚŚĀSTRASAṄGRAHAḤ.

Substance, palm-leaf. Size, 16½ × 1⅜ inches. Pages, 68. Lines, 12 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Śukranāḍi 35*a*.

Incomplete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



A treatise in horoscopy which is said to have been taught by Nārāyaṇa to Lakṣmī. It deals with the evils that may happen to infants, with the fortunes and characteristics of persons, with the expiations to be performed for preventing the evils indicated by the 27 constellations, etc.

**Beginning:**

ज्योतिश्शास्त्रप्रकारेण जातकं मे वद प्रभो ।

नारायणः—

जातस्य पूर्वं नक्षत्रं वदेद्वीक्ष्य फलाफलम् ।
अरिष्टफलदमृक्षं वक्ष्ये तदितरं . . . ॥
. . . . . . ज्येष्ठान्तं मूलपूर्वकम् ।
रेवत्यन्तं गण्ड . . . . दं प्रकीर्तितम् ॥
तत्र तत्र द्विघटिका गण्डदा नात्र संशयः ।
पूर्वाषाढे धनुर्लग्ने . . . . . . ॥
. . . प्रथमे सिंहे चित्रपूर्वार्धकेऽपि च ।
जातस्य बालारिष्टं स्यादृक्षगण्डं प्रकीर्तितम् ॥

* * * *

नारायणः—

जनौ तात्कालिकीं नाडीं दृष्ट्वा स्त्रीति पुमानिति ।
निश्चयं कलयेत्तस्माद्भवेन्नाडीविनिश्चयः ॥

* * * *

सूर्योदयं समारभ्य यावती जन्मनाडिका ।
तावतीं द्विगुणीकृत्य यावन्मेषादिसङ्ख्यया ॥
जन्मलग्नं च . . . . ख्या च यावती ।
तत्सङ्ख्यां च हरेद्धीमान् सप्तविंशतिसङ्ख्यया ॥
शेषसङ्ख्या जन्मतारा ह्यश्विन्यादिविचिन्तने ।
धनिष्ठाद्यथा जन्मलग्ने पश्चद . . . . ॥

* * *

**Colophon:**

इति ज्योतिश्शास्त्रसङ्ग्रहो नाम लक्ष्मीनारायणसंवादः प्रथमः ॥

**End:**

अथ चन्द्रनाडी—

चन्द्रनाडीफलं वक्ष्ये मूर्धादीनां यथाक्रमम् ।
वसिष्ठादिऋषिप्रोक्तं शुक्राचार्याय . . . ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



* * * *

**Colophon :**

इति ज्योतिश्शास्त्रे अष्टैश्वर्यफलं संपूर्णम् ॥

* * * *

कुजफलम्—

अर्थनाशं मनःक्लेशं राजविड्वरमेव च ।
शरीररक्तपादं च कुजनित्यदशाफलम् ॥

**Colophon :**

इति नित्यदशाफलम् ॥

---

No. **13743.** ज्यौतिषफलग्रन्थः.

JYAUTIṢAPHALAGRANTHAḤ.

Pages, 24. Lines, 6 on a page.

Begins on fol. 50*a* of the MS. described under No. 13425.

Incomplete.

Gives the nature of the influence exercised by the planets on a person, etc.

**Beginning :**

लग्ने रवौ, आरोग्यं भवति, पैत्यदेही, नीलमेघनयनः, सदाचारवान्, तृतीये वर्षे किञ्चित् ज्वरपीडा । तत्र शुभयु . . . अरोग्यवान् । द्वितीये रवौ-मुखरोगी पञ्चविंशति वर्षे राजदण्डनेन द्रव्यव्ययः ॥

**End :**

पक्षग्रहाः—

चन्द्रात् सप्तमतारकः क्षितिसुतो भौमश्चतुर्थो बुधः ;
सौम्याः पञ्चमसंस्थितो गुरुरथो षष्ठे भृगुन(गोर्न)न्दनः ॥
शुक्रात् सप्तमगो दिवाकरसुतो मन्दो भृगोर्नन्दनः ।
सूर्यादार्क(र्कि)र(यु)तः सुधाकरयुतो राहुश्च केतुस्तथा ॥

---

No. **13744.** ज्यौतिषविषयः.

JYAUTIṢAVIṢAYAḤ.

Pages, 17. Lines, 8 on a page.

Begins of fol. 130*b* of the MS. described under No. 13618.

Incomplete.

Deals with Aṣṭakavarga, Vāraphala, Tithiphala, etc.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

जन्मनक्षत्रमारभ्य नित्यनक्षत्रगण्यते ।
नेत्रघ्नं नित्यताराादि जन्मनक्षत्रसंयुतम् ॥
नवसङ्ख्या हरेद्भागं शेषं नित्यशुभं फलम् ।
सूर्यनित्यदशायां तु त्रात्रासश्वारसम्भवम् ॥
मनोविचारं देहोष्णं . . . व्याधिभोजनम् ।
उग्रकार्यप्रवृत्तिं च शुष्कद्रव्यसमागमम् ॥
तीक्ष्णशस्त्रादिकं चैव रसवस्तुसमागमम् ।
नृपाणां दर्शनप्राप्तिः गङ्गास्नानादितत्परः ।
शाकाहारादिभुक्तिं च आद्यपर्यायकेवलम् ॥

रवेर्द्वितीयपर्यायफलम्——

**End:**

इति भिन्नाष्टकवर्गम् ।

सङ्क्रान्तिऋक्षमारभ्य जन्मनक्षत्रगण्यते ।
सप्तभिर्गुणितं चैव अष्टभिर्भागमाहरेत् ॥
रोगो लाभो तथाध्वानं बन्धनं धनमेव च ।
ऐश्वर्यमर्थसिद्धिं च अपमृत्युः प्रजायते ॥

वारफलम्——

पन्था भोजनमालस्यं विद्या वस्त्रं वराङ्गना ।
मलिनं जन्मऋक्षादि सूर्यवारादिषु क्रमात् ॥

---

No. **13745.** ज्यौतिषविषयः.

JYAUTIṢAVIṢAYAḤ.

Pages, 16. Lines, 10 on a page.

Begins on fol. 11*a* of the MS. described under No. 13631.

Incomplete.

Similar to the above. Deals with the nature of the influence for good or evil exercised by the planets on a person in relation to his father, mother, son and other relations, in relation to such things, such as wealth, age, learning, etc.

**Beginning:**

लग्नेशस्फुटतो विशोध्य सहजस्थानाधिपस्य स्फुटं
तन्नक्षत्रशनौ तदा तु मरणं तत्सोदराणां वदेत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्माद्विस्फुटतस्सहोदरपतिं भौमं च संशोधिते
राशौ भानुसुते तथैव च चतुर्योगस्फुटांशेऽथवा ॥
भूसूनुः स्फुटतो विशोध्य शशिनं राशित्रिकोणे गुरौ
जातस्यानुजनाशनं क्षितिसुतो राहुस्फुटात् शोधयेत् ।
तद्राशिस्थनवांशकेऽमरगुरौ तज्ज्येष्ठनाशं वदेत्
लग्नाद्भ्रातृपलग्नपस्फुटयुते जीवेऽनुजो जायते ॥

**End:**

. . . . कीर्तिमवाप्नोति कर्मेशे कुजसंयुते ।
बुधेन गुरुणा वापि दृष्टे भूसुररक्षणात् ॥
शा . . . . लग्ने भानौ धने भृगौ ।
पापग्रहान्विते दृष्टे पितृलोकादिहागतः ।

---

No. **13746.** ज्यौतिषविषयः.

JYAUTIṢAVIṢAYAḤ.

**Pages, 50. Lines, 5 on a page.**

Begins on fol. 13*b* of the MS. described under No. 13688.
Incomplete.
Similar to the above.

**Beginning:**

अथारूढलग्नानयनम्—

लग्नाल्लग्नपतिर्यावद्राशिसंस्थस्ततो ग्रहः ।
तावानृषिभिरारूढः कथितस्सर्वदा त्विति ॥

* * * *

नवमं तुलामारभ्य नवमराशिर्मिथुनं भावलग्नं जातम् ।

होरालग्नम्—

तथा सार्धद्विघटिकामितात् कालाद्विलग्नभाक् ।
प्रयाति लग्नं तन्नाम होरालग्नं प्रचक्षते ॥

जन्मलग्नमोजराशिश्चेत् सूर्यादारभ्य गणना, युग्मश्चेल्लग्नादारभ्य गणना ।

**End:**

अथ भावफलविचारः—

भावं भावकारकं नित्यकारकं च विचार्य तत्तद्भावफलं वदेत् । तत्र कलत्रविषये . . . . . . रराशिगतश्चेत् पूर्वकलत्रनाशः । तस्य पापयोगे नियमेन कलत्रगण्डः । तस्य शुभयोगे सौन्दर्यादि.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13747. ज्यौतिषविषयः.
## JYAUTIṢAVIṢAYAḤ.

**Pages, 10.** Lines, 6 on a page.

Begins on fol. 87*a* of the MS. described under No. 6470.

Wants the beginning and the end.

On the astrological consequences, good or evil, resulting from the time of the birth of a person, etc.

**Beginning:**

सिनीवालिप्रसूतस्य यस्य भार्या पशुस्तथा ।
गजाश्वमहिषं चैव परित्यागो विधीयते ॥
अमायाः षट्सु भागेषु न दोषफलमश्नुते ।
प्रथमे वित्तहानिस्स्यात् मातृहन्ति द्वितीयके ॥

* * * *

ऋक्षसन्धिमिति ज्ञेयं शिशुगण्डमितीरितम् ॥
प्रथमे च द्वितीये च ज्येष्ठर्क्षे च तृतीयके ।
पादत्रये जातनरो ज्येष्ठपुत्रो विनश्यति ॥

**End:**

मातुर्मातुलपुत्रश्च विज्ञेया मातृबान्धवाः ।
आत्मपितृष्वसुः पुत्रः आत्ममातृष्वसुस्सुतः ॥
आत्ममातुलपुत्रश्च विज्ञेया आत्मबान्धवाः ।
यस्मात् . . श्यते वंशप्र . . दि परिगण्यते ।
कूटस्थगणनायां तु स्वसारं मातरं त्यजेत् ॥

---

## No. 13748. ज्यौतिषविषयः, आन्ध्रटीकासहितः.
## JYAUTIṢAVIṢAYAḤ WITH TELUGU MEANING.

**Pages, 36.** Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 3103.

Incomplete.

On the nature of the planetary influence as judged purely from the constellation in which the moon is at the time of the birth of a person, etc.

Foll. 1 to 7 contain matter in Telugu language.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

सूर्याष्टमं द्वादशपञ्चजन्मे जन्माष्टमं द्वादशपञ्च चन्द्रे ।
भौ(म)द्वयं द्वादशपञ्चमस्थे सौम्यश्चतुर्द्वादशमष्टषष्ठे ॥
जीवत्रयं द्वादशषष्ठमस्थे द्वादश्यषष्ठे यदि भार्गवो वा ।
मन्दाष्टमं द्वादशपञ्चजन्मे राहुर्नवं द्वादशपञ्चजन्मे ॥
प्रसूतिकाले यदि लग्नकेतुर्यथातिनक्षत्र तथापि राशिम् ।
तत्र ग्रहस्थानमरिष्टदोषं तत्कालचन्द्रं मुनयो वदन्ति ॥

**End :**

चोरस्वभोक्ता मतिमान् धनाढ्यो राजाजषण्डो विजयी दरिद्रः ।
कार्येषु दक्षः खलु कर्मकर्ता क्षुद्रस्य विद्वानिति जातकांशः ॥

* * * *

. . . मासं तु षण्मासं शूद्रकं तथा ।
आश्लेषा कृत्तिका चातुर्मासं विधीयते ॥

---

No. **13749.** ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

Pages, 38. Lines, 9 on a page.

Begins on fol. 28*a* of the MS. described under No. 13605.
Incomplete.
Similar to the above.

**Beginning :**

. . . . . . . . . . . . . बुधः ।
राज्यवानर्थवान् ज्ञानी सेनानाथोऽथ वा भवेत् ॥
स्वतन्त्रस्सर्वविख्यातो बुधे शिरसि संस्थिते ।
वाग्विवेक(द)दास्ये च बहुरत्नार्थसम्पदः ॥
बहुशास्त्ररतो नित्यं बुधे नेत्रस्थिते सति ।

**End :**

चरराशिस्थितैस्सर्वै रज्जुयोग इति स्मृतः ॥
मुसलं स्थिरराशिस्थैः उभयस्थैर्नलः स्मृतः ।
सौम्यग्रहैः केन्द्रगतैः मालायोगस्स उच्यते ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13750. ज्यौतिषविषयः.
## JYAUTIṢAVIṢAYAḤ.

**Pages, 7.** Lines, 5 on a page.

Begins on fol. 23*a* of the MS. described under No. 13612.

Incomplete.

On the different Yōgas, etc., and the good or evil resulting therefrom.

**Beginning :**

भानुर्विशाखाशशिपूर्वषाढा भौमे धनिष्ठा बुधरेवतीषु ।
बृहस्पति . . . . . . . . . . ॥

उत्पातयोगः ।

अर्कबुब्ब(पूर्वा)मखा चैव इन्दुपुष्यभुजङ्गमौ ।
. . . . . बुधो ज्येष्ठोत्तराणि च ॥
गुरुपौष्णो निरृती च शुक्रे स्वाती च रेवती ।
. . . धनिष्ठायां क्षयोऽयं यमगण्डकः ॥

**End:**

ऐरावतन्तु नवमं फलं तेषां पृथक् पृथक् ॥
वर्गास्त्रयोदश प्रोक्ताः . . . . . . . ।
भवन्ति वर्गकं योगे पारिजातादिसंज्ञकः ॥

---

## No. 13751. ज्यौतिषविषयः, द्राविडटीकासहितः.
## JYAUTIṢAVIṢAYAḤ WITH TAMIL MEANING.

**Pages, 17.** Lines, 6 on a page.

Begins on fol. 59*a* of the MS. described under No. 13534.

Incomplete.

Similar to the above. The characteristics and fortunes of girls who attain their puberty in the different Lagnas are also described.

**Beginning :**

मेषे तु व्यभिचारी स्यात् वृषभे तु पतिव्रता ।
मिथुने सर्वसम्पत्स्यात् कर्कटे भ्रष्टचारिणी ॥
सिंहे तु पुत्रलाभस्स्यात् कन्यायां श्रीमती भवेत् ।
तौल्यां विचक्षणा चैव वृश्चिके परगामिनी ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शतमखेन्दुहुताशनरक्षसां यमजलेशसमीरणशूलिनाम् ।
दिवि भुवि क्रमशः परिवर्तते सिततिथिप्रथमादिषु योगिनी ॥

* * * *

रव्युच्चमेषे वृषभे शशाङ्के शनिस्तुलायां मकरे च भौमः ।
गुरुः कुलीरे भृगुतुङ्गमीने बुधे च कन्याधिप उच्चसंज्ञः ॥

**End:**

पञ्चमं नववैधव्यं माङ्गल्यं नवपञ्चमम् ॥
षष्ठाष्टमे पुत्रनाशः पुत्रलाभोऽष्टषष्ठके ।
सप्तसमे विवाहं स्यान्मङ्गल्यायुष्यवर्धनम् ॥

* * * *

---

No. 13752. ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 12*a* of the MS. described under No. 13612.

Incomplete.

Similar to the above. On the results of planetary ascendency, and depression, etc., which depend upon the relative position they occupy in a given horoscope.

**Beginning:**

स्थानं बलं विशेषः—

स्वोच्चस्वकीयभवनस्वदृगाणहोरा वारांशकोदगयनेषु दिनस्य मध्ये।
राशिप्रवेशसमये सुहृदांशकादौ मेषूरणे दिनमणिर्बलवानजस्रम् ॥
चन्द्रः कर्किणि गोपतौ निजदिनद्रेक्काणहोरांशके
राश्यन्ते शुभवीक्षणे निशि सुखे याम्यायने वीर्यवान् ।
इन्दुस्सर्वकलाधरो यदि बली सर्वत्र सन्धि विना
सौम्यव्योमचरेक्षितस्तु कुरुते भूपालयोगं नृणाम् ॥

**End:**

मेषो गौर्मकरस्वतीशाशिगृहं मीनस्तुलोच्चाभिधः
दिग्ग्रामामनुयुग्दिनं शरमिता ताराक्रमाद्विंशतिः ।
स्वस्वोच्चास्तग्रहं स्वनीचभवनं सूर्यादितस्सिंहगो
मेषे षष्ठधनुस्तुलोच्चकलशो मूलत्रिकोणाभिधाः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **13753.** ज्यौतिषविषयः.

JYAUTIṢAVIṢAYAḤ.

Pages, 50. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 13661.

Incomplete.

Similar to the above. The name of the work is given as **Pārāśaryam** in the front leaf.

**Beginning:**

ग्रहोच्चनीचाः—

रवेर्मेषतुला प्रोक्तो चन्द्रस्य वृषवृश्चिके ।
भौमस्य मृगकर्कौ च कन्यामीनौ बुधस्य च ॥
गुरोस्तु कर्किमकरौ मीनकन्यौ सितस्य च ।
तुलामेषौ तु मन्दस्य उच्चनीचं यथाक्रमम ॥

* *

अष्टमादष्टमाधीशे पापद्वययुतेऽपि वा ।
पापद्वयेन दृष्टे वा द्वात्रिंशद्वर्षजीवनम् ॥
स्वक्षेत्रश्च गतो वापि पापो वा शुभमिच्छते ।
अतिनीचगतो वापि शुभो वा पापमिच्छते ॥
चतुर्ग्रहैश्च जातो वा विलग्ने दुर्बलो यदि ।
धर्मेशे कर्मराशिस्थे जातो भिक्षौ च संभवेत् ॥

**End:**

ग्रहदान—

गोधूमैस्तण्डुलैर्माषैर्मुद्गश्चणकबर्बरैः ।
तिल . . शधान्यानि ग्रहधान्यं यथाक्रमम् ॥
मयूरो हयमेषं च गजवायसजम्बुकम् ।
मृगेन्द्रो वैनतेयश्च हंसकैर्वाहनादिषु ॥

---

No. **13754.** ज्यौतिषविषयः.

JYAUTIṢAVIṢAYAḤ.

Pages, 83. Lines, 8 on a page.

Begins on fol. 7*a* of the MS. described under No. 13592.

Incomplete

On certain minor astrological matters, such as the characteristics and the fortunes of persons as indicated by the Tithi, the Nakṣatra, the Yōga, the Rāśi, etc., in which they are born.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

लग्नस्य पञ्चाङ्गप्रधानत्वात्तावत् पञ्चाङ्गफलमुच्यते—

तत्र तिथिफलम्—

कृत्वाग्निहोत्रमासीनं यवनं मुनिपुङ्गवम् ।
विनयेनोपसङ्गम्य कश्यपः परिपृच्छति ॥
कस्यां तिथौ नरो जातः कथं विन्द्या(न्दे)च्छुभाशुभम् ।
वारनक्षत्रयोगे च तथैव करणेऽपि च ॥
साधु साधु महातेजा गुणवान् परिपृच्छसि ।
तत्सर्वं कथयिष्यामि पञ्चाङ्गफलजातकम् ॥
यत्सुरैरपि न ज्ञातं मुनिभिश्च विशेषतः ।
ततस्स्नेहेन हे वत्स कथयामि शृणुष्व हि ॥
जातो नरः प्रतिपदि त्रिदिनं च त्रिमासकम् ।
साधु साधु महातेजास्सर्वथाशीतिमायुषः ॥
चपलोऽप्यतिनिष्ठूरोऽप्यग्नि . त् व्रणजानुकः ।
जलप्रमाणनिपुणो बहुभाषणतत्परः ॥

**Colophon :**

इति तिथिफलम् ।

* * * *

इति ब्रह्मयामले जन्मराशिफलानि ।

* * * *

अथ जननलग्नफलमुच्यते । तत्फलं ग्रहवशाद्भवति । तदुक्तम् नवनीतारिष्टे—

तताम्बिकासोदरमातुलाश्च मातामहस्तातपिता च सूनुः ।
सूर्यादिखेटाः क्रमशः प्रदिष्टाः त्रिकोणगास्तेऽपि च तान्निहन्युः ॥

सूर्यादयः शन्यन्ताः क्रमात् पितृमातृमातुलमातामहपितामहपुत्रसंज्ञिता भवेयुः । तेन सर्वे लग्नात् पञ्चमनवमगतास्तत्तत्संज्ञानुरूपान् हन्युः ।

**End :**

अनभादियोगा उच्यन्ते—

शुभप्रदा ये त्वनभादियोगा निघ्नन्त्यरिष्टं बहवो यदि स्युः ।
जन्मकाले ये शुभप्रदाः अनभादियोगाः बहवस्तिष्ठन्ति चेदरिष्टं निघ्नन्ति ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनभादियोगलक्षणमुक्तं कापिष्ठिलेन—

"हेत्वार्के सुनभानभाधुरधुराः स्वान्त्योभयस्थैर्ग्रहैः
शीतांशोः कथितोऽन्यथा तु बहुभिः केमद्रुमो वेष्यते।"

यदा चन्द्राद्द्वितीये कुजादिपश्चग्रहेष्वन्यतमस्तिष्ठति चेत्तदा सुनभाख्यो यो.

---

## No. 13755. ज्यौतिषविषयः.
## JYAUTIṢAVIṢAYAḤ.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 16. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 36*a*. The other works herein are Āpastambāparaprayōga 1*a*, Putrasvīkāravidhi 5*a*, Bhāradvājasūtra 8*a*, Āpastambagṛhyasūtra 16*a*, Śrāddhaprayōga 45*a*.

Wants the beginning and the end.

Deals with the horoscopy relating especially to girls.

**Beginning:**

अर्कस्तु ऋक्षाणि चतुर्भिरन्धः षड्भिर्द्विनेत्राम्रिए(भिरे)कनेत्रा।
नेत्राणि युग्मानि तिथानि पञ्च त्रीण्यारजः क्रमशः फलानि॥
मेषे वृषे सिंहदिने च अन्धौ अर्कौ च कन्या मिथुनाच्च रात्रौ।
बधिरो दिवायां तुलवृश्चिको वा तथा निशायां कथ(चध)नुर्मकरं च॥

**End:**

शुभलग्ने शुभांशे च शुभस्थाने शुभग्रहाः।
त्रिषडायगताः पापाः पुष्पवत्याः शुभावहम्॥
जामित्रे शुभसंयुक्ते अशुभं सर्वदा भवेत्।
दृष्टिहीने सदारोग्यं पुत्रलाभोऽर्थदायकाः॥

---

## No. 13756. ज्यौतिषविषयः.
## JYAUTIṢAVIṢAYAḤ.

Pages, 9. Lines, 5 on a page.

Begins on fol. 36*a* of the MS. described under No. 13609.

Incomplete.

Same work as the above, wherein see for the beginning.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

नवमे राहुः पुत्रहीनः, सेवकावृत्तिः, धर्मेशो नास्ति, धनम् । दशमे राहौ गङ्गास्नानसिद्धिः, दुर्गामणीः कामादिविरस्सनः । एकादशे राहौ पुत्रसमृद्धिः धनधान्यसमृद्धिमान् । द्वादशे राहौ स्वल्पपुत्रवान्, नेत्ररोगी, असत्प्रियवान्, दयालुः, राहुकेतुफलमेकम् ।

---

No. **13757.** ज्यौतिषविषयः, द्राविडटीकासहितः.

JYAUTIṢAVIṢAYAḤ WITH TAMIL MEANING.

Pages, 8. Lines, 6 on a page.

Begins on fol. 46*a* of the MS. described under No. 13425.

Incomplete. Wants the beginning and the end.

Similar to the above.

**Beginning:**

आत्मशक्तिप्रधानः पितृकारकस्सूर्यः । मित्रदेहप्रसादमनःकारकश्चन्द्रः । भ्रातृसत्त्वगुणभूमिकारकः कुजः । विद्या . . . बन्धुज्ञातिशिल्पलिपिलेख्यनृत्तगीतवाद्यशत्रुमातुलकारको बुधः ।

* * * *

शकुनम्—

तृतीयायषडाः पापाः भरद्वाजस्य वामके ।
केन्द्रत्रिकोणगे जीवे दक्षिणं भवति वायसम् ॥
केन्द्रत्रिकोणकस्सौम्ये द्विजयुग्मागमो भवेत् ।
केन्द्रत्रिकोणके शुक्रे नारदो दक्षिणागमे ॥

**End:**

वायुभागे तथा कुम्भे उदीच्यां मीनमेव च ।
ईशभागे कुलीरालि पशुनष्टविनिश्चयः ॥
कृत्तिकादिनवारुण्ये षड्भिः कर्णाभिवेदिनैः ।
सप्तभिर्गृहमागत्य द्वौ त्रीणि च मृतिर्भवेत् ॥

---

No. **13758.** ज्यौतिषविषयः.

JYAUTIṢAVIṢAYAḤ.

Substance, palm-leaf. Size, $15\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 52. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Incomplete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Gives the synonymous names for denoting the different Nakṣatras, the different Rāśis and the Lagnas and deals with certain minor matters relating to horoscopy.

**Beginning:**

भवत्यश्विनिनक्षत्रमश्विदस्रं तुरङ्गमम् ।
आद्यं तुरङ्गं तुरगमश्वं वाजिहयं हयः ॥

* * * *

मेषमाद्यं क्रिया छागमजं बस्तं च तुम्बुरुः ।
अजक्रियाछागबन्धुत्रिपुरा विश्वमेषभम् ॥

* * * *

शरीरं सुखं कीर्तिकरयं विलग्नं भवश्चोत्तमाङ्गाङ्गसम्पत्तिहेतुम ।
तनुः कार्यमाद्या(ध्या)त्महोरोदयं च प्रधानस्य भावस्य नामानि सर्वम् ॥
द्रविणमथ कुटुम्बविभवात् बुद्धिनेत्रं श्रवणभवकोशं सत्यसौभाग्यगात्रम् ।
वदनरदनविद्यातालुतुपमयाणं(?) सरिदमपिदधावाक्स्थाननामानि सर्वम् ॥

* * * *

नेत्रेशे बलसंयुक्ते शोभनाक्षो भवेन्नरः ।
षष्ठाष्टमव्ययुतो नेत्रवैकल्यमादिशेत् ॥

**End:**

धर्मकर्मसुतबन्धुलग्नके देवमन्त्रिभृगुसोमसंभवे ।
लक्षदोषमपि जातनिश्चयमन्धकारमिव भास्करोदयम् ॥
चन्द्रमान्दि . रवरेशरन्ध्रपाः तन्नवांशपतयोऽपि ये ग्रहाः ।
तेषु दुर्बलदशा मृतिप्रदाः कष्टभे चरति सूर्यनन्दने ॥

---

## No. 13759. ज्यौतिषविषयः.
## JYAUTIṢAVIṢAYAḤ.

**Pages, 28.** Lines, 11 and 7 on a page.

Begins on fol. 54*a* of the MS. described under No. 13601.

Incomplete.

Deals with the determination of the duration of life-time, etc., of a person from the relative position of the planets at the time of his birth.

**Beginning:**

अथायुर्निश्चयः, निसर्गदशावर्षाणि—

चन्द्रस्यैकम्, कुजस्य द्वे, बुधस्य नव, शुक्रस्य विंशतिः गुरोरष्टादश, रवे· विंशतिः, शनेः पञ्चाशत् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



* * * *

तत्तद्द्वादशधा विभज्य तत्तद्राशेरारभ्य प्रवर्तयित्वा मृतिमासदिनघटिकापर्यन्त-निश्चयः । लग्नदशायां मृतिसंभवे त्वेवम् ।

* * * *

चत्वारि . यादूर्ध्वे बहुराज्याधिपालकः ।
त्रिंशान्तं पञ्चविंशादि सौख्यभाग्ये च संस्थिते ॥
अष्टाविंशाब्दकादूर्ध्वे नरवाहन . . . . ।

**End:**

चरे स्वपुत्रनवपाः स्थिरे धर्मस्वपुत्रपाः ।
पुत्रधर्मस्वपा युग्मे द्रेक्काणि(णा)धिपतिः क्रमात् ॥
मेषसिंहधनु . . . . तौलिकुम्भमिथुने तु ।

---

No. **13760.** ज्यौतिषविषयः.

JYAUTIṢAVIṢAYAḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 40*a* of the MS. described under No. 13648

Incomplete.

Describes the characteristics as well as the fortunes of persons born in what are called Cara, Sthira and Ubhaya Lagnas, etc.

**Beginning:**

लग्नफलम्—

सञ्चारशीलश्चरभे विलग्ने लग्नांशके चैवमुदाहरन्ति ।
स्थिरे स्वदेशे बहुभाग्ययुक्तः स्थिरग्रही भूरिधनान्वितः स्यात् ॥

लग्नाल्लग्नाधिपः स्थिरराशिस्थिरनवांशस्थिरद्रेक्काणयुतत्वात् स्वग्रामे वासः ।

द्वितीयम्—

कर्मेशतत्कारकदृष्टियोगात् धनं स्वदा . . . स्वकीर्त्या ।
लाभेशतत्कारकदृष्टियोगादेवं वदन्त्यत्र धनं बहुत्वम् ॥

**End:**

व्ययाधिप(स्य)शुभगुरुदृष्टत्वात् शुभमूलेन व्ययः । त्यागी . . . . . युते कृषिकश्च धर्मे इति वचनात् व्ययस्थाने शुभयुतत्वात् तद्दया(शा)यां कृषि- . . . मूलाभः शय्यासौख्यं शुभलोकप्राप्तिः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **13761.** ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

**Pages**, 27. Lines, 6 on a page.

Begins on fol. 43*a* of the MS. described under No. 13606.

Incomplete.

Deals with the determination of the duration of life-time of a person from the relative position of the planets, etc.

**Beginning:**

त्रिषु योगेषु सर्वेषु प्रत्येकं त्रिविधं भवेत् ।
एवं नवविधं प्रोक्तमायुषां तु विनिर्णयः ॥

पञ्चम्यारदशायां तु मृत्युः षष्ठिगुरुस्तथा ।
शनैश्चतुर्थे मृत्युस्स्याद्दशा राहोस्तु सप्तमी ॥

**End:**

विंशतिर्मकरे चन्द्रे कन्यायाः प्रथमांशकम् ।
धनुःषष्ठदशाभागो मीने दशमभागियत् ॥

द्वाविंशतिर्नृयुग्मे च चन्द्रोऽप्येवं मृतिप्रदः
ये ये निशाकरांशास्तु मृत्युभागं च (ल)क्ष्यताम् ॥

. . . . त्सरे जातो मृत्यु . . . . संशयः ॥

---

No. **13762.** ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

**Pages**, 2. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 9532.

Incomplete.

Deals with the division of Lagnas into several periods, with the description of the planetary influences appropriate to each period, etc.

**Beginning:**

षड्वर्गम्—

त्रिंशद्भागात्मकं लग्नं होरा . . . . . उच्यते ।
लग्नत्रिभागद्रेक्काणनवांशो नवमां . . . . . ॥

* * * *



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



. . . दिकानां खेटानां होराभावो विधीयते ॥
चन्द्रस्य पुत्रनवमाः स्थिरे धर्मस्य . . . . . ।
पुत्रधर्मस्वपा एते द्रेक्काणाधिपतिर्भवेत् ॥

* * * *

एवं द्वादशवर्गे तु मुरारिस्स्यात् त्रयोदश ।
एतदेव परं . . . . . वर्गादिकेऽपि च ॥

**End:**

मृगपतिवृषसिंहे कर्कटस्थे झषे वा
भवति विविधलक्ष्मीराजराजो धनाढ्यः ।
. . . . गजरथनाथो मेदिनीमण्डलस्य[ात]
रिपुगणतृणवह्नी राहुतुङ्गस्थिते वा(?) ॥
कन्या राहुग्रहं प्रोक्तं राहुश्च मि . . . स्मृतः ।
नीचे धनुश्चे . . . . . इत्येते ब्रह्मयामले ॥

---

No. **13763.** ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

Pages, 48. Lines, 6 on a page.

Begins on fol. 111*a* of the MS. described under No. 13619.

Incomplete.

Wants the beginning and the end.

Deals with certain minor astrological matters such as the nature of the planetary influences on certain domestic incidents, etc.

**Beginning:**

यात्रादाने विवाहे च वस्त्रालङ्कारभूषणे ।
शुभे सन्धौ प्रवेशे च चन्द्रचारः प्रशस्यते ॥

* * * *

पराशरसंहितायाम्—

तिथयो गतनाड्यस्तु जन्मर्क्षं मनुसंयुतम् ।
नवभिश्च हरेद्भागं शेषस्तु घटिकाग्रहः ॥
रविस्तापं शनिस्सौख्यं भानोर्मृत्युर्बुधस्य(च) ।

* * * *

पक्षग्रहः—

सूर्यस्थितर्क्षमारभ्य द्वादशे केतुरुच्यते ।
केतोस्सप्तदशे सौम्यः सौम्याद्वेथ भृगोस्सुतः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



* * * *

बृहस्पतिः—

अयने विंशतिः पूर्वा मकरे विंशतिः परा ।
वर्तमाने तुलामेषा नाड्यस्तूभयतो दश ॥

**End:**

सुखभवनस्थितजीवे रविशशिनौ कर्मगौ लग्नात् ।
उदये भूपस्या . . . . लाभगैर्हि परैः ॥
कुजमन्दौ शनिजीवौ सितार्कौ च बुधः क्रमात् ।
लग्नादिकेन्द्रलाभस्था जातो यो नृपतिर्भवेत् ॥

---

No. **13764.** ज्यौतिषविषयः.

JYAUTIṢAVIṢAYAḤ.

Substance, palm-leaf. Size, 14¾ × 1¼ inches. Pages, 23. Lines, 5 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Incomplete.

Similar to the above.

**Beginning:**

* * * *

ये दोषास्तान्निहन्त्येव यत्रैकादशगश्शशी ॥

* * * *

तिथिवासरनक्षत्रयोगातिथ्यर्थसम्भवा(ः) ।
ते दोषा नाशमायान्ति केन्द्रसंस्थे शुभग्रहे ॥

* * * *

सूर्यस्य पञ्च वर्षाणि शशाङ्कश्चै(स्यै)कविंशतिः ।
कुजस्य सप्त वर्षाणि बुधस्य नव वत्सराः ॥

**End:**

घृतान्नं कृसलान्नं च मत्स्यान्नं घृतपायसम् ।
पूर्वादिषु क्रमाद्भुक्त्वा यात्रासिद्धिरवाप्यते ॥

---

No. **13765.** ज्यौतिषसङ्ग्रहः, केरलटीकासहितः.

JYAUTIṢASAṄGRAHAḤ WITH MALAYĀLAM ṬĪKĀ.

Substance, palm-leaf (Śrītāla). Size, 14⅝ × 1⅞ inches. Pages, 937. Lines, 7 on a page. Character, Malayāḷam. Condition, good. Appearance, old.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Foll. 1 and 2 contain a few portions of Jātakapārijāta.

Complete.

This treatise is a compilation from various astrological works.

The MS. is said to have been dictated by Chandukkuñjan Paṇikkar and written by Carakkal Uṇṇi for the use of Tanjore Subbarāya Pillai.

Date of transcription—27th Mīna (Paṅguni), Kollam 1004 (1829 A.D.).

**Beginning:**

पश्च प्राचीरालिखेद्वाणसङ्ख्याः तिर्यग्रेखा वर्जितान्तश्चतुष्काः ।
प्रागादीशा द्वादशव्योमवासाः ज्योतिश्चक्रस्वामिनस्तूबराद्याः ॥
क्रियतावुरुजुतुमकुलीरलेयपार्थोनिजूककोर्प्याख्याः ।
तौक्षिक आकोकेरो हृद्रोगश्चेत्थसिः क्रमशः ॥
मेषाजविश्वक्रियतूबराद्या वृषोक्षगोतावुरुगोकुलानि ।
द्वन्द्वं नृयुग्मं जुतुमं यमं च युगं तृतीयं मिथुनं वदन्ति ॥
कुलीरकर्कोटककर्कटाख्याः कण्ठीरवसिंहमृगेन्द्रलेयाः ।
पार्थोनकन्यारमणीतरुण्यः तौलीवणिग्जूकतुलाधटाश्च ॥
अल्यष्टमं वृश्चिककोर्पिकीटा धन्वीधनुश्चापशरासनानि ।

**End:**

शनिचारफलम्—

रोगाणां द्विषतां च हानिररिगे प्रेष्ठाङ्गनासङ्गमो
दीर्घाध्वाटनमस्तगेऽष्टमगते दैन्यं वियोगः स्वकैः ।
वैरं बन्धनमात्मधर्मविहतिर्धर्मस्थिते हृद्रुजा
विद्याकीर्तिधनक्षयो दशमगे कर्माप्तिरप्यर्कजे ॥
लाभस्थेऽन्यवधूसमागमधनायानप्रतापोदयो
मध्येदुःखपरम्पराम्बुधि मुहुस्स्यान्मज्जनं रिष्फगे ।
एवं खेचरचार एव कुरुते नृणां शुभं चाशुभं
पूजाद्यैर्मुदितः करोति शुभमेवानिष्टगोऽपि ग्रहः ॥

---

No. **13766.** त्रिंशद्योगावलिः.

TRIṀŚADYŌGĀVALIḤ.

Pages, 21. Lines, 4 on a page.

Begins on fol. 78*a* of the MS. described under No. 13555

Incomplete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Same work as the Jātakayōgāvali described under No. 13697 ante, but without introductory stanzas in the beginning. In the heading of the MS. the name Triṁśadyōgāvali is given.

---

No. **13767.** त्रैलोक्यदीपिका—आन्ध्रटीकासहिता.

TRAILŌKYADĪPIKĀ WITH TELUGU MEANING.

**Pages, 16.** Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 13609.

Wants the beginning and the end.

Purports to explain the different Yōgas in horoscopy.

**Beginning:**

दशमभवननाथे केन्द्रकोणे धनस्त्रीबलवति यदि जातो राज्यपट्टाभिषेकः ।
गजतुरगरथश्रीः पूर्णमायुः प्रशस्तः न भवति नरनाथो विश्वविख्यातकीर्तिः ॥
निशाकरे केन्द्रगते विलग्नं त्यक्त्वा त्रिकोणे यदि जीवलग्ने ।
शुक्रेण दृष्टे बलपूर्णयुक्तो जातो नरो भूपतितुल्यभावः ॥

* * * *

**Colophon:**

इति राजयोगलक्षणं समाप्तम् ।

**End:**

कुज(न्म)शनिलग्नेषु मन्ददृष्टे युतेषु च ।
लग्नाधिपगतो भावो नृपयोगोऽपि तीर्थकृत् ॥
नवमगस्थानगते चन्द्रे ग्रहैरभिवीक्षिते ।
नृपयोगोऽपि सञ्जातो दीक्षितोऽपिनृपतिर्भवेत् ॥

---

No. **13768.** दशाफलम्.

DAŚĀPHALAM.

**Pages, 9.** Lines, 6 on a page.

Begins on fol. 32*b* of the MS. described under No. 13699.

Complete.

On the influences good or evil exerted by the planets during their respective periods and sub-periods.

**Beginning:**

सूर्यदशाफलम् वर्षम् ६ फलम्—
राजशत्रुभयं मृत्युः सर्वनाशं पितुर्मृतिः ।
अक्षिरोगं शिरोरोगं सूर्यस्यादिदशाफलम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मा-७. दि. १८.
दन्तरोगं शिरोरोगं मूत्रकृच्छ्रस्तथैव च ।
वातपित्तभयं चैव रवेरन्तर्दशाफलम् ॥

**End:**

शनिः—

उन्मादं धूर्तभाषं च उद्योगं वसुनाशनम् ।
दारिद्र्यं याचकावृत्तिः शुक्रस्यान्तर्गते शनिः ॥

* * * *

केतुः—

मोहनं रोगसम्पत्तिः वाहनादिविनाशनम् ।
मृत्युरङ्गकृतस्तस्य शुक्रस्यान्तर्गते शशी ॥

**Colophon:**

दशाफलं समाप्तम् ॥

---

## No. 13769. दशाफलम्.
## DAŚĀPHALAM.

Pages 66. Lines, 6 on a page.

Begins on fol. 32*a* of the MS. described under No. 2995.

Complete.

Similar to the above.

**Beginning:**

दशाफलमहं वक्ष्ये धर्माधर्मकृतं फलम् ।
मनुष्याणामहं सम्यक्सावनेनायुषः परम् ॥
दशाः पञ्चविधाः प्रोक्ताः फलञ्चापि तथाविधम् ।
महादशाफलं पूर्वं पश्चादन्तर्दशाफलम् ॥
अन्तरन्तर्दशा चैवं प्रोक्तास्सूक्ष्मदशास्ततः ।
पञ्चमा प्राणसंज्ञा स्यात्पञ्चधा भिद्यते क्रमात् ॥

इनशशिकुजराहुर्जीवमन्दज्ञकेतुः भृगुच इति नवानां कृत्तिकादिक्रमेण ।
तनुनयसिनजायातोयधा न्यासायासा नर इव(तिवि)दुरब्दा भास्करादिक्रमेण ॥

* * * *

अथ सूर्यस्य महादशाफलम्—

अथ भरणिदशायां मन्त्रदेवद्विजादीन् वरजनितविभूतिः क्षेत्रमित्याङ्गनाप्तिः ।
प्रबलजनविरोधं सर्पभीतिर्विवाँ(नाशो)गुरुजनविरहादि क्षेत्रधान्यक्षयं च ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति दशाफलं संपूर्णम् ॥

दशाधिपो लग्नगतो यदि स्यात् त्रिषट्दशैकादशगश्च लग्नात् ।
तत्सप्तवर्गोऽप्यथ तत्सुहृद्वा लग्ने शुभे वा शुभगा दशा स्यात् ॥

**End:**

अन्तर्दशाफलानि —

अन्तर्दशाफलं चन्द्रो दशानाथस्य निश्चयात् ।
अतो दशाक्रमेणैव दशानाथस्य निश्चयात् ।

* * *

होरासारे—

अन्तर्दशाक्रमाणां वा पाकक्रमाच्च दशाफले ज्ञेयम् ।
क्रूरात् क्रूरः पूर्वं सौम्यात् सौम्यं समत्वेऽपि च समौ ॥

---

## No. 13770. दशाफलग्रन्थः.
## DAŚĀPHALAGRANTHAḤ.

Pages, 10. Lines, 4 on a page.

Begins on fol. 11*b* of the MS. described under No. 6470.
Incomplete.
Similar to the above.

**Beginning:**

सूर्यचन्द्रद्विगुणितं वारजन्मर्क्षसंयुतम् ।
ग्रहसङ्ख्या हरेद्भागं शेषा . . . दशाफलम् ॥

* * * *

. . . . . . चैव सूर्ये नित्यदशाफलम् ॥
सुपुष्पाम्बरभूषं च राजसन्तोषमेव च ।
विनोदं च भवेत्तत्र शशिनित्यदशाफलम् ॥

**End:**

स्वस्त्रीप्रयुक्तगरलान्मृतिरादिश्यते बुधैः
गुरुः कामे गृहे केतौ द्वितीयेऽर्ककुजान् व्रजेत् ।
यदि भार्यासु मरणं भविष्यति न संशयः ॥
चन्द्रहेतुकमृत्योः वा प्रागष्टादशदिनाद् ज्वरः ।
बिभया वासुमात्रं च प्रोकया च मरिष्यति(!) ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. 13771. दशाफलम्.
DAŚĀPHALAM.

Pages, 9. Lines, 6 on a page.
Begins on fol. 24*a* of the MS. described under No. 13530.
Foll. 26 to 28*a* are found written in Kanarese language.
Incomplete.
Similar to the above.

**Beginning:**

दशाफलम्—

रविशशिकुजराहोर्जीवमन्दज्ञकेतुभृगुरिति नवानां कृत्तिकादिक्रमेण ।
तनुनयसिनजायातोयधन्यासयासानरइति विदुरब्दान् भास्करादिक्रमेण ॥
स्वदशां त्रिगुणीकृत्य तद्दशापि हतं पुनः ।
खाग्निना विभजेदब्दं शेषं मासदिनानि च ॥

**End:**

प्राणदशा—

सूक्ष्मादशाया घटिका विनाड्या पृथक् शिखिघ्नानि हृतानि षष्ट्या ।
तच्छेषलब्धं च परा विनाड्या स्यात् पश्चमात् प्राणदशा क्रमेण ॥

---

No. 13772. दशाभुक्त्यादिफलनिर्णयः.
DAŚĀBHUKTYĀDIPHALANIRṆAYAḤ.

Pages, 22. Lines, 6 on a page.
Begins on fol. 55*b* of the MS. described under No. 13560.
Incomplete.
Similar to the above.

**Beginning:**

प्रगल्भा पिङ्गला धान्या भ्रामरी गैरिका तथा ।
उल्कासिद्धा सङ्कटेति चन्द्रादीनां दशाभिधाः ॥
नक्षत्रभुक्तघटिका गुणयेत् स्वस्ववत्सरैः ।
षण्मासं वर्षमासाद्य शोधयेत्तत्र वत्सरे ॥

* * * *

मेषेऽर्कीन्दुजभार्गवास्तु शुभदा गुर्वंशुमन्तौ शुभौ ॥
गर्यो(गुर्वो)र्यासुरपूज्यपद्मरिपवः पापाः शनीनौ शुभौ ।
युग्मे भौमसुरेज्यसप्ततुरगाः पापाः शुभो भार्गवः
पापः कर्कटके रवीन्दुतनयौ भौमामरेशौ शुभौ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

मासान्तिके शून्यहरिप्रसक्ते द्वितीयवर्षे प्रतिशुक्रमूढे ।
नवोढया . . . . न करोति मन्दिरं प्रवेशमेतन्मुनयो वदन्ति ॥

---

No. **13773.** दशाफलविषयः.
DAŚĀPHALAVIṢAYAḤ.

**Pages**, 15. Lines, 7 on a page.

Begins on fol. 16*a* of the MS. described under No. 13705.
Wants the beginning and the end.
Similar to the above.

**Beginning :**

सपदि जननतारादित्यसंवेशनादिक्रमग्रहपरिलेख्यं तत्फलं वर्षखेदे ।
अन्तर्दशा—
वर्षग्रहदशा लिप्ता वितर्कगुणभाजिताः ।
यल्लब्धं तद्दशामानं हतमन्तर्द . . . . ॥
रविदिननखसङ्ख्या २० चन्द्रमाव्योमवाणैः ५०
क्षितितनयगजाक्षि २८ चन्द्रजीवच्छराणाम् १६ ।
शनिरस गुणसङ्ख्या ३६ वाक्पतिर्नागबाणैः ५८
नयन . . . . सप्ततिः शुक्रचर्या ७० ॥

**End :**

हृत्स्कन्धशय्यासनबन्धुमात्रगेहाम्बुवृद्धी सुखवाहदुग्धम् ॥
भोज्यमन्त्रहृदयोदयपुत्रा बुद्धिभोजयितृभावविवेकाः ।
चोरविघ्नरिपुवीक्षितनाभिक्लेशषड्समथोप्युपदंशाः ॥

* * * *

अङ्गाल्लग्नादारभ्य क्रमेण व्ययान्तभावार्थाश्चिन्त्या इत्यर्थः ।
भावेशाक्रान्त ६, केन्द्रे ७, भावाधीशे च ८.

यद्भावेशा रन्ध्ररिष्फारियाता यद्भावस्था रन्ध्ररिष्फारिनाथाः ।
तत्तद्भावा व्याधिमृत्युव्ययादीन् कुर्युस्सौम्यस्वामिदृष्टा न चेत्ते ॥

* * * *

**Colophon:**

इति जम्बूनाथविरचिते प्रश्नामृते प्रथमो रसः ॥

* * * *

पौनर्भवादियोगाश्चास्मदुक्तप्रश्नसारसमुद्रे द्रष्टव्याः ।

**Colophon:**

इति जम्बूनाथविरचिते प्रश्नामृते अष्टमो रसः ।

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति जातकसर्वस्वसङ्ग्रहे जम्बूनाथविरचिते सटीके चतुर्थोऽध्यायः ॥

**End :**

लग्ने चन्द्रे गुरौ वापि जीवप्रश्न इतीरितः ।
भौमोऽर्को वोदये रन्ध्रे मन्दे वान्त्येऽष्टमे हृतिः ॥

चोरहृतिः चोरप्रश्न इत्यर्थः ।
कार्यचिन्ताखे बुधेवशुक्रे लाभेऽर्थगे गुरौ ।
पुंराशौ बुधचन्द्रौ वा चन्द्रेज्यौ वा रवौ खगे ॥

**Colophon :**

इति जम्बूनाथविरचिते प्रश्नामृते एकादशो रसः ॥

---

## No. 13976. प्रश्नार्णवप्लवः.
## PRAŚNĀRṆAVAPLAVAḤ.

Pages, 34. Lines, 8 on a page.

Begins on fol. 64*a* of the MS. described under No. 13618.

Breaks off in the 10th Adhyāya.

A treatise on divination. The author is Nārāyaṇadāsa, son of Brahmadāsa of Agastyagōtra, and a devotee of Lord Kṛṣṇa. The author says that he wrote this work after consulting Tājika, and the works of Varāhamihira and Mukunda. This work is also known as Vaiṣṇavaśāstra. The different subjects dealt with in the work are given below.

१. शुभाशुभकार्यसिद्धिः.
२. धनराज्यनृपदर्शनलाभप्रश्नः.
३. दिग्विजयप्रश्नः.
४. जयपराजयप्रश्नः.
५. संघट्टचक्रराजाभिषेकः.
६. उत्पातफलशुभाशुभसस्य जातकम्.
७. परचक्रागमनदुर्गप्रश्नकोटाचक्रम्.
८. गमनागमनदूरप्रश्नः.
९. विवाहादिप्रश्नः.
१०. भ्रातृस्थानादि व्ययस्थानान्तरोगप्रश्नः.
११. स्वामिभृत्यादिप्रश्नः.
१२. बन्धमोक्षप्रश्नः.
१३. लेखादिप्रश्नः.
१४. भाजनादिप्रश्नः.
१५. धातुमूलजीवचिन्ताद्यधिकारः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

नारायणं परमपूरुषमादिदेवं ज्योतिर्मयं शुभकरश्च चराचराणाम् ।
शान्तं प्रणम्य शिरसा द्विजपुङ्गवानां प्रश्नार्णवप्लवमिदं प्रकरोति शास्त्रम् ॥
श्रीब्रह्मदासनयजातनयः सुविद्वान् श्रीमानगस्त्यकुलजो यदुनाथभक्तः ।
वाराहताजिकमुकुन्दमतं समीक्ष्य नारायणः परमशास्त्रमिदं चकार ॥
प्रष्टा प्रणम्य हरिमिन्द्रककुन्मुखस्थो ज्योतिर्विदं सकलशास्त्रकलाविदग्धम् ।
आहूय सद्भुवि हितं फलपुष्पहस्तः शान्तं प्रसन्नवचनैः सकृदेव पृच्छेत् ॥
लग्ने चरे न हृतलाभऋणास्पदार्थनाशो गदक्षयगमागमबन्धमोक्षाः ।
प्रष्टुर्भवन्ति परचक्रमुपैति शीघ्रं कल्याणवृद्धिकलहोपशमाश्च न स्युः ॥

* * * *

मया निदेशाद्रचितं सुशास्त्रं त्रैलोक्यनाथस्य जनार्दनस्य ।
स्वयं मुकुन्देन च सत्यमुक्तं तस्मादिदं वैष्णवसंज्ञमासीत् ॥

**Colophon:**

इति श्रीब्रह्मदासपुत्रनारायणदासविरचिते वैष्णवशास्त्रे शुभाशुभकार्यसिद्धिर्नाम प्रथमोऽध्यायः ॥

See under the next number for the end.

---

## No. 13977. प्रश्नार्णवप्लवः.

## PRAŚNĀRṆAVAPLAVAḤ.

Substance, palm-leaf. Size, $14\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 12. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Breaks off in the 15th Adhyāya.

Same work as the above.

See under the previous number for the beginning.

**End:**

अथ दृष्टिः—

स्वात्पञ्चमर्क्षं नवमं तृतीयं लाभं ग्रहः पश्यति मित्रदृष्ट्या ।
कार्यस्य सिद्ध्यै खलु पृच्छकानां शुभस्सुहृद्व्योमचरो विशेषात् ॥
निजात्कलत्रं दशमं चतुर्थसंस्थानभं पश्यति शत्रुदृष्ट्या ।
पापो रिपुर्व्योमचरो विशेषात्कार्यार्थनाशाय सपृच्छकानाम् ॥

**Colophon:**

इति श्रीवैष्णवशास्त्रे चतुर्दशोऽध्यायः ॥

सर्यास्पृजीभूमिजराहुमन्दचन्द्रज्ञजीवाः पतयो दिशां स्युः ।
मेषो वृषः स्यान्मिथुनं कुलीरः प्राच्याधिपाख्यिः परिवर्तनेन ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



* * * *

धातोश्च मूलस्य च जङ्गमस्य चिन्तौजराशौक्रमतश्च मेषात् ।
नवांशकैः युग्मग्रहे प्रतीयाद्वाच्याबन्धैस्त्रिः परिवर्तनेन ॥
स्याद्धातुचिन्ताकुजभास्कराभ्यां बुधार्कजाभ्यामपि मूलचिन्ता ।
ज्ञेया च दैत्येन सितेन्दुजीवैः केन्द्रस्थितैरर्हति जीवचिन्ता ॥

* * * *

अथ ग्रहदृष्टिसाधनम्—तथा च नीलकण्ठ्याम्—
दृष्टिस्स्यान्नवपञ्चमी बलवती प्रत्यक्षतस्त्वेहदा
पादोनाखिलकार्यसाधनकरी मेला . . . . ।

---

No. 13978. भुवनप्रदीपिकासङ्ग्रहः, आन्ध्रटीकासहितः.
BHUVANAPRADĪPIKĀSAṄGRAHAḤ WITH TELUGU MEANING.

**Pages, 16.** Lines, 4 on a page.

Begins on fol. 64*a* of the MS. described under No. 6470.

Complete.

A treatise dealing with divination of various kinds made with the aid of certain astrological conclusions or theories.

**Beginning:**

भुवनप्रदीपाख्ये ग्रन्थे

* * * *

मेषवृश्चिकयोर्भौम इति राश्याधिपा उक्ताः ॥
रवेर्मेषतुले प्रोक्ते चन्द्रस्य वृषवृश्चिकौ ।
भौमस्य मृगकर्की च कन्यामीनौ बुधस्य च ॥
जीवस्य कर्की मकरौ मीनकन्ये सितस्य च ।
तुलामेषौ तु मन्दस्य उच्चनीचावुदाहृतौ ॥

* * * *

शुक्रे चन्द्रे भवेद्रौप्यं बुधे स्वर्णमुदाहृतम् ।
गुरौ रत्नयुतं हेमसूर्ये मौक्तिकमुच्यते ॥
भौमे त्रपु शनौ लोहं राहावस्थीनि संवदत् ।
इति धातुनिश्चयः ।

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



युवाकुजशिशुस्सौम्यः शशिशुक्रौ च मध्यमौ ।
मन्दमार्ताण्डदेवेज्यफणिनः स्थविरा ग्रहाः ॥

इति नष्टाधिकारः ॥

**End:**

चन्द्रो लग्नपतिर्वापि यदि केन्द्रे शुभान्वितः ।
विवादश्च तदा सद्यः जायते नात्र संशयः ॥

* * * *

चतुर्थे दशमे वापि यदि सौम्यग्रहाभवन् ।
तदा न गमनं क्रूरास्तत्रैव गमनं भवेत् ॥

* * * *

लग्नपः कार्यपश्चापि कार्ये स्यातामुभौ यदि ।
स्थितौ[वा]द्रेक्काण एकस्मिन् कार्यसिद्धिर्भवेद्ध्रुवम् ॥
लग्नपो मृत्युपश्चापि लग्ने स्यातामुभौ यदि ।
स्थितौ[वा]द्रेक्काण एकस्मिन् व्याधिर्नास्तीति तं वदेत् ।
नीचो वास्तमितो वा मृत्युपतिर्नवमगो रिपुक्षेत्रे वा ।
नीचस्थानपयुक्तो व्यवहारगतः पुरुषो नष्टः ॥

**Colophon:**

इति प्रश्नचारकृतभुवनप्रदीपिकासङ्ग्रहः ॥

---

No. **13979.** मेघमालामञ्जरी.

MĒGHAMĀLĀMAÑJARĪ.

Substance, paper. Size, 8 × 6⅜ inches. Pages, 34. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Similar to the work described under No. 3137 on page 1127 of the India Office Library Catalogue, Part V.

Contains the following subjects :—

१. मेघलक्षणमेघवर्णमासफलगर्भलक्षणविद्युल्लक्षणग्रहकूटलक्षणानि.
२. वातोद्भवलक्षणम्.
३. मेघफलम्.
४. प्रतिसूर्यलक्षणम्.
५. परिवेषलक्षणम्.
६. धारालक्षणम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



७. इन्द्रचापलक्षणम्.
८. विद्युद्दर्शनम्.
९. गर्जितनिर्घातोत्पत्तिफलम्.
१०. मेघगुणितलक्षणम्.
११. खेटग्रहफलम्.
१२. वर्षकसूचकनिर्णयः.
१३. वर्षप्रश्नवर्षयोगफलम्.

**Beginning:**

कैलासशिखरे रम्ये प्रणम्य परमेश्वरम् ।
पप्रच्छ श्रीमहादेवी पार्वती परमेश्वरी ॥
केनोपायेन भगवन् जीवेयुस्सकलाः प्रजाः ।
तन्मे संक्षिप्य सर्वेश ब्रूह्युपायमनुत्तमम् ॥

ईश्वर उवाच—

सस्यानि सर्वभूतानां जीवनं परमं स्मृतम् ।
सस्यान्यमृतरूपाणि देवाद्या भुञ्जते प्रजाः ॥
तेषान्तु कारणं वृष्टिर्वृष्टेर्मेघास्तु कारणम् ।
सर्वलोकहितार्थाय दिव्यः प्रश्नः कृतो महान् ॥

देव्युवाच—

उत्पत्तिं वसतिं वर्णं संचारं नाम विग्रहम् ।
आश्रयं च बलं चैव कालं ब्रूहि महेश्वर ॥

ईश्वर उवाच—

काश्यपस्तपसा जातः लोकानां हितकाम्यया ।
मेघरूपी च भगवान् विष्णुर्लोकैकनायकः ॥
अवताराद्यथा विष्णुर्लोकानुग्रहकाङ्क्षया ।
स करोति तथा तद्वन्मेघरूपं तथैव च ॥
असौ संसत्पदेष्वेषु त्रैलोक्येऽपि च सङ्ग्रहः ।
ग्रहयोगेषु दृश्यन्ते वक्रे नश्यन्ति वारिदाः ॥
उमाख्यातं त्रिलोकेषु वृष्टिसंहारकारणम् ।
मेघाश्च कीदृशा देवाः कृपया स्वप्रजायते ॥

* * * *

मेघमालामृतं वक्ष्ये तदा वर्षस्य लक्षणम् ।
मेघानां निश्चयं माता कृषिरारभ्यते यथा ॥
कैलासशिखरासीनं देवदेवं जगद्गुरुम् ।
तं दृष्ट्वा सौम्यवदनं पार्वती पृच्छते तथा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति मेघमालामञ्जरीसंहितायां मेघलक्षणमेघवर्णमासफलगर्भलक्षणविद्युल्लक्षण-ग्रहकूटलक्षणाः समाप्ताः ॥

* * * *

इति मेघमालामञ्जरीसंहितायांमुमामहेश्वरसंवादे परिवेषलक्षणं नामाष्टमः पटलः ॥

**End:**

तुषारवृष्टीरतिवृष्टिगोकुलं वायुश्च वृष्टीरतिवृष्टिदाहकम् ।
अनर्घतां वृष्टिविनाशनं च ऋक्षेषु विचारणं स्यात् ॥

**Colophon:**

इति मेघमालामञ्जर्यामुमामहेश्वरसंवादे ईश्वरप्रोक्ते वर्षप्रश्नवर्षयोगफलं समाप्तम् ॥

* * * *

तुलादिमासत्रयमन्दवारे यद्यस्तमश्चन्द्रमदर्शनं च ।
तदा परेद्युस्सवितुः प्रभाते आसप्तरात्रात् प्रभवन्ति वर्षम् ॥

---

## No. 13980. मेघमालामञ्जरी.

## MĒGHAMĀLĀMAÑJARĪ.

Pages, 37. Lines, 15 on a page.

Begins on fol. 212*a* of the MS. described under No. 1197.

Contains the मेघलक्षणमेघवर्णमासफलगर्भलक्षणविद्युल्लक्षणग्रहकूटलक्षण complete.

Same work as the above wherein see for the beginning.

**End:**

देवब्राह्मणपूजा च दानमन्त्रजपादयः ।
अस्मिन् देशे प्रवर्तन्ते तत्र वृष्टिर्भविष्यति ॥

**Colophon:**

इति मेघमालायां योगन्यायः समाप्तः ॥

आषाढं कथितं देवि श्रावणं शृणु पार्वति ।
श्रावणे शुक्लसप्तम्यां मध्यं याति दिवाकरे ॥

* * * *

सर्वं विचार्य मतिमान् शास्त्रं शास्त्रविदो विदुः ।
एतस्य लक्षणं ज्ञेयं मासस्य प्रतिवर्षिणम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीमेघमालामञ्जरी समाप्ता ॥

---

No. **13981.** मेघमालामञ्जरी.

MĒGHAMĀLĀMAÑJARĪ.

**Pages, 52. Lines, 6 on a page.**

Begins on fol. 1*a* of the MS. described under No. 13489.

Contains from the beginning to the end of the Pratisūryalakṣaṇa.

Same work as the above but with the following stanza in the beginning.

यस्य केशेषु जीमूतास्सरित्स्सर्वाङ्गसन्धिषु ।
कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः ॥

---

No. **13982.** लम्पाकम्.

LAMPĀKAM.

Pages, 12. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13705.

Complete.

Same work as that described under R. No. 218 (*a*) of the Triennial Catalogue of MSS., Vol. I, Part I-A, but with slight difference in the end. By Padmanābha.

**End:**

कवर्गे वर्गचिन्ता च अवर्गे स्त्रीषु चिन्तनम् ।
सुस्थिरं चैव वार्तानां तेनाद्विक्षरसंभवम् ॥
गते चिरं सुवार्ता च इत्येवं मनुरब्रवीत् ।
पृच्छकस्य वचः श्रुत्वा गुणाद्विगुणषड्गुणाः ॥
अष्टसंख्या भवेल्लब्धि द्रव्यसङ्ख्यायनिश्चयम् ।
मेषादिमीनपर्यन्तं लम्पाके कृतनिश्चयः ॥
आदित्येधिव्रणश्चैव अर्केनङ्गव्रणं तथा ।
. . . . . . प्रश्नाकर्णश्रृङ्गाटकस्थितिः ॥
त्रिकोणाकारकं भौमे सौम्ये च चतुराकृतिः ।
अयं पुरुषाकारं भवेदर्की राहुकेतुखगाकृतिः ॥

**Colophon:**

इति लम्पाकं संपूर्णम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13983. लम्पाकम्.
## LAMPĀKAM.

Pages, 47. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 13677.

Complete in five Adhyāyas containing 62 stanzas.

Slightly different from the above, but by the same author.

**Beginning:**

नमस्ते शूलहस्ताय चन्द्रार्धकृतशेखर ।
त्वत्प्रसादात् प्रवक्ष्यामि लम्पाकं लोकहर्षणम् ॥

तत्रादौ शास्त्रसाधनमपि स्पर्शवशाद्राशिभेदज्ञानोपायमाह—

बीजाङ्घ्रिकुक्षिवक्षोदोःशिरांस्युत्वा(रस्सूक्षा)दि दक्षिणे ।
क्रमाद्वामे च कूर्पादि व्युत्क्रमात्तान्विनिर्दिशेत् ॥

पुरुषस्य दक्षिणपार्श्वे बीजपादकुक्षिवक्षोदोःशिरस्सु क्रमात् वृषभादिराशीन् विनिर्दिशेत् । वामे तु व्युत्क्रमेण शिरोबाहुवक्षःकुक्षिपादबीजेषु वृश्चिकादिषड्राशीन् विजानीयात् । एतेषु प्रष्टा यत् स्थानं स्पृशति तत्तदङ्गं सूचयति राशिमारूढमिति जानीयात् । चतुर्ष्वङ्गुलिषु यामङ्गुलिं स्पृशति तया कनिष्ठिकामुख्यया पादं जानीयात् । आरूढज्ञानमेवम् ।

* * * *

**Colophon:**

इति लम्पाके प्रथमः ॥

* * * *

इति लम्पाके जातकप्रश्नो नाम द्वितीयाध्यायः ॥

**End:**

आरूढपादादुपरि तद्राशिस्थैश्च पादपैः ।
नष्टदि(द्र)व्यादिपार्श्वस्थदि(द्र)व्यादिकमुदाहरेत् ॥

आरूढपादस्यानन्तरराशिस्थं पादचतुष्टयाधिपतिना द्रव्यादिकं नष्टद्रव्यं समीपस्थं द्रव्यमिति वदेत् । शास्त्रकृत्प्रयोजनशङ्कां निरूपयति—

पद्मनाभकृतं शास्त्रं शिष्याणां हितकाम्यया ।
द्विषष्टिश्लोकसंक्षिप्तं लम्पाकं लोकभूषणम् ॥

**Colophon:**

इति पञ्चमोऽध्यायः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13984. लम्पाकम्.
## LAMPĀKAM.

Substance, paper. Size, 8⅜ × 7¼ inches. Pages, 20. Lines, 24 on a page. Character, Telugu. Condition, injured. Appearance, old.

Wants the beginning in the first Adhyāya and breaks off in the fourth Adhyāya.

Same work as the above.

---

## No. 13985. लम्पाकम्, कर्णाटकटीकासहितम्.
## LAMPĀKAM WITH KANARESE COMMENTARY.

Substance, palm-leaf. Size, 15⅜ × 1¼ inches. Pages, 86. Lines, 4 on a page. Character, Grantha. Condition, injured. Appearance, new.

Wants the beginning and the end in the Saṁjñikādhyāya.

Same work as the above.

---

## No. 13986. लम्पाकम्, द्राविडटीकासहितम्.
## LAMPĀKAM WITH TAMIL COMMENTARY.

Substance, palm-leaf (Śrītāla). Size, 9¾ × 2 inches. Pages, 22. Lines, 14 on a page. Character, Grantha and Tamil. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Mantrakalpa with Kanarese meaning 12*a*.

Contains the first Adhyāya complete.

Same text as that described under No. 13989, but with difference in the beginning as given below.

**Beginning:**

नमश्श्रीवर्धमानाय निर्धूतकलिलात्मने ।
सालोकानां त्रिलोकानां यद्विद्या दर्पणायते ॥
त्वत्प्रसादात्प्रवक्ष्यामि लम्पाकं लोकभूषणम् ।
मण्डलं चतुरश्रं वा लिखित्वान्तः प्रकल्पयेत्
मेषो वृषो नृयुग्मश्च कर्कटस्सिंहयोषितः ।
तुलावृश्चिकचापाश्च मकरः कुम्भमीनकाः ॥
सपर्याया इमे शब्दाः द्वादशानां दलात्मनाम् ।
नामधेयानि विद्वद्भिः कथितं पूर्वसूरिभिः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 13987. लम्पाकम्, सव्याख्यानम्.
## LAMPĀKAM WITH COMMENTARY.

Pages, 68. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 13502.

Complete in the following five Adhyāyas.

१. संज्ञाविधिः.
२. जातकविधिः.
३. आयुर्दायान्तर्दशाविधिः.
४. लाभालाभाध्यायः.
५. नष्टमुष्टध्यायः.

Similar to the work described above and with a commentary.

**Beginning:**

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥

अत्रादौ शास्त्रसाधनमङ्गदर्शनवशादारूढराशिज्ञानोपायश्च कनिष्ठादिक्रमा दङ्गुलीदर्शनवशादत्र आरूढराशौ पादज्ञानञ्चाह—

अण्डाङ्घ्रिकुक्षिवक्षोदोःशिरांस्युक्षादिदक्षिणे ।
क्रमाद्वामे च कौर्प्यादीन् व्युत्क्रमात्तान् विनिर्दिशेत् ॥
आरूढराशौ पादस्तु कनिष्ठादि क्रमाद्भवेत् ।
एकाङ्गुल्याङ्गसंस्पर्शादेवं पादा भवन्ति हि ॥
अत्रादौ प्रश्नवक्ता दैवज्ञः पृच्छकं प्रति एवं वदेत्—

हे पृच्छक त्वं तावत् तव अङ्गेषु अङ्गुष्ठं विना कनिष्ठिकादि चतसृष्वङ्गुलीषु तव सम्मतया एकया यया कयाचिदङ्गुल्या तव संमतमङ्गकं संस्पर्श(स्पृश) इति वदेत् । अनन्तरं पृच्छकः यया अङ्गुल्या यदङ्गं स्पृशति तदङ्गदर्शनवशात् राशिज्ञानं ज्ञात्वा तदङ्गुलीदर्शनवशात् पादज्ञानञ्च ज्ञात्वा तत्पादवशात् प्रश्नं वदेत् । पुरुषस्य दक्षिणपार्श्वे अण्डं वृषभः । अङ्घ्रिः मिथुनम् । कुक्षिः कटकं । वक्षः सिंहम् । दोः कन्या । शिरः तुला । पुरुषस्य वामपार्श्वे शिरः वृश्चिकम् । दोः धनुः । वक्षः मकरम् । कुक्षिः कुम्भम् । अङ्घ्रिः मीनम् । अण्डम् मेषम् । इति जानीयात् ॥

* * * *

**Colophon:**

इति लम्पाकशास्त्रे प्रश्नशास्त्रे संज्ञाविधिर्नाम प्रथमोऽध्यायः ॥

693A

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

आरूढलग्ने चत्वारः पादाः । तेष्वेकतमः पादः प्रश्नकाले उदयति । तं पादं विना इतरे त्रयः पादाः वर्तन्ते । तेषु यः आरूढपादाधिपस्य अनन्तर-पादाधिपो भवति स पादाधिपः तस्करस्य स्वरूपवाचके दृष्टिराशौ स्थितश्चेत् तस्करः समीपत एव वर्तते । द्रव्यमपि समीपत एव वर्तत इति भावः । अथ शास्त्रकृत्पद्मनाभसूरिणा प्रतिज्ञातग्रन्थसंख्यानिरूपणमाह—

पद्मनाभकृतं शास्त्रं शास्त्राणामुत्तमं हितम् ।
द्विषष्टिश्लोकसंक्षिप्तं लम्पाकं लोकभूषणम् ॥

**Colophon:**

इति पद्मनाभाख्यसूरिणा समस्तज्योतिश्शास्त्रार्थान् संगृह्य हितं प्रत्यक्ष-फलतया सन्तोषकरमुत्तममितरशास्त्रापेक्षया अनायासेन बोधजनकं द्विषष्टि-श्लोकसंक्षिप्तं बहुसहस्रग्रन्थैर्वाच्यार्थं संकुचिततया प्रोक्तं लोकेषु अलङ्कारं सर्वो-त्तमं लम्पाकाख्यं प्रश्नशास्त्रं [पद्मनाभसूरिणा] कृतं संपूर्णम् ॥

अस्मिन् शास्त्रे अनुच्यमानार्थमविदितार्थं किञ्चिदपि नास्तीति भावः ॥

यस्य संपर्कपुण्येन नारीरत्नमभूच्छिला ।
यदुपास्यं सुमनसां तद्वस्तुद्वन्द्वमाश्रये ॥

The scribe writes:—

श्रीशैलवेदकोटीररामावरजनामकः ।
लिखित्वेदं प्रश्नशास्त्रमर्पयेऽहं श्रियः पतौ ॥

---

No. **13988**. लम्पाकम्, सव्याख्यानम्.

LAMPĀKAM WITH COMMENTARY.

Pages, 20. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13680.

Complete.

Same work as the above but without the introductory stanzas and with a different end

**End:**

शास्त्रकृत्प्रतिज्ञातग्रन्थसंख्यां निरूपयति —

पद्मनाभकृतं शास्त्रं शस्त्रा(छात्रा)णां हितकाम्यया ।
द्विषष्टिश्लोकसंक्षिप्तं लम्पाकं लोकभूषणम् ॥

**Colophon:**

इति श्रीमल्लम्पाके प्रश्नशास्त्रे नष्टमुष्टिनिरूपणं नाम पञ्चमोऽध्यायः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



The scribe gives the date of the MS. :—

कालयुक्त्यामूर्जेशुक्ले चतुर्दश्यां स्थिरे शुभे ।
रामनाथेन लिखितं लम्पाकं लोकभूषणम् ॥

---

No. **13989.** लम्पाकम्, सव्याख्यानम्.

LAMPĀKAM WITH COMMENTARY.

Substance, palm-leaf Size, $13\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 50. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new. Complete.

Similar to the work described above. The commentary is different.

**Beginning:**

सिद्धासीनं महादेवं महेशानं प्रियात्मजम् ।
विघ्नराजं नमस्कृत्य वक्ष्ये लम्पाकमादरात् ॥
नमस्ते शूलहस्ताय चन्द्रार्धकृतमौलये ।
प्रश्नशास्त्रं प्रवक्ष्यामि लम्पाकं लोकभूषणम् ॥

अस्य लम्पाकशास्त्रस्याधिपतिः स्वाभिमतदेवता च सदाशिव एवेति प्रकटीकर्तुं नमश्शब्द इतिपूर्वकम् । शूलहस्तायेति शूलं हस्ते यस्येति शूलहस्तः, तस्मै तुभ्यं नमः । चन्द्रार्धेन कृतः मौलिः यस्य चन्द्रार्धकृतमौलिः, तस्मै इति पूर्वेणान्वयः । त्वत्प्रसादात्[1] त्वत्कृपावशात् । लोकभूषणं सर्वजनहर्षकम् । लम्पाकाख्यं प्रश्नशास्त्रं प्रकटीकरोमि । तत्रादौ शास्त्रसाधनमङ्गस्पर्शवशात् तज्ज्ञानोपायश्च तत्साधनराशिलक्षणश्चाह—

मण्डलं चतुरश्रं वा लिखित्वान्तः प्रवातयेत् ।
चतुर्दिक्षु चतुस्सूत्रं दिक्प्रपञ्चक्रमालिखेत् ॥
मेषो वृषो नृयुग्मं च कर्कटास्सिंहयोषिता(तौ) ।
तुलावृश्चिकधन्वानि मकरः कुम्भमीनका:(कौ) ॥
सत्पद्ममयिमेराशिद्वादशानां दलात्मनाम् ।
नामधेयानि विद्वद्भिः कथ्यते(न्ते) पूर्ववित्तमैः ॥

**End:**

पद्मनाभकृतं शास्त्रं शिष्याणां हितकाम्यया ।
द्विषष्टिश्लोकसंक्षिप्तं लम्पाकं लोकभूषणम् ॥

---

१. त्वत्पसादात् - पाठान्तरम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शिष्याणां हितकाम्यया पद्मनाभनाम्ना विंशत्यधिकशतश्लोकसंमितं लोकभूषणं लम्पाकशास्त्रं पद्मनाभकृतम् ॥

**Colophon :**

श्रीमल्लम्पाके प्रश्नशास्त्रे पञ्चमोऽध्यायस्समाप्तः ॥

No. **13990.** लम्पाकम्, सव्याख्यानम्.

LAMPĀKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 17¼ × 1⅜ inches. Pages, 46. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Same work as the above.

No. **13991.** लम्पाकम्, सव्याख्यानम्.

LAMPĀKAM WITH COMMENTARY.

Pages, 35. Lines, 7 on a page.

Begins on fol. 16*b* of the MS. described under No. 13673.

Contains the first two Adhyāyas. The colophon at the end of the first Adhyāya apparently wrongly states that it is the third Adhyāya; and a small portion of the fourth Adhyāya is found before the second Adhyāya.

Same work as the above.

No. **13992.** लम्पाकम्, सव्याख्यानम्.

LAMPĀKAM WITH COMMENTARY.

Pages, 84. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 13534

Complete.

Same work as the above.

No. **13993.** लम्पाकसारः.

LAMPĀKASĀRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 14*a* of the MS. described under No. 13680.

Incomplete.

This treatise purports to give the essence of what is contained in the Lampāka which work has been described under the previous numbers.

**Beginning:**

उमासुतं नमस्कृत्य गुरुमुख्यांस्तथा परान् ।
लम्पाकसारं संगृह्य बालानामल्पमेधसाम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वक्ष्यामि सुखबोधार्थं सारसङ्ग्रहमुत्तमम् ।
रवेर्मेषं स्वोच्चगेहं तुला नीचगृहं स्मृतम् ॥
केसरी स्वगृहश्चैव मित्रक्षेत्रौ धनुर्झषौ ।
जीवो मित्रो भूमिजगोभृतशालोष्टपादपः ॥

End:

असितस्य तुला तुङ्गमजा नीच इति स्मृतः ।
नक्रकुम्भौ स्वभश्चैव नारीयुगलमेव च ॥
चापमत्स्योऽथ वृषभः जूकं . . यस्मृतम् ।
बुधवाक्पतिशुक्रौ च मित्रो भूगृह एव च ॥
भूतो नवपदाधीनः मुनीन्द्रैरुदितं पुरा ।
धात्वादि द्विपदादीनि पञ्चमब्राह्मणोदयः ॥
तथा कृष्णादिपुरुषः त्रिसंख्या रश्मिरेव च ।
कृष्णवर्णं समाख्यातः धनुराकृतिरेव च ॥

---

## No. 13994. विद्वज्जनवल्लभा.
## VIDVAJJANAVALLABHĀ.

Substance, palm-leaf. Size, $17\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages, 18. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, old.

Breaks off in the ninth Adhyāya.

A work in Praśnaśāstra (divination) dealing with the undermentioned topics.

१. लाभालाभनिर्णयः.
२. शत्रुसमागमः.
३. गमागमाध्यायः.
४. प्रोषितागमनम्.
५ यात्रा.
६. जयपराजयः.
७. सन्धिविग्रहनिर्णयः.
८. बन्धमोक्षः.
९. शुभाशुभनिर्णयः.

Incomplete.

**Beginning:**

भूतं च भाव्यपि च यच्च भवत्स्वरूपं वेत्त्येव यः करतलामलकक्रमेण ।
देवं तमिन्दुकलिकाकलितावतंसमत्यद्भुतैकविभवं विभुमानतोऽस्मि ॥
अथाभिदध्मः परिपृच्छतां स्फुटं शुभाशुभं प्रश्नविलग्नतो नृणाम् ।
ग्रहैश्शरीरादिकभावसंश्रितैः गमागमाद्याखिलकार्यगौरवम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुखचरणगतावतीव रम्ये फलकुसुमद्रुमशालिनि प्रदेशे ।
घृतवति जलगोमयार्द्रफेने फलति शुभं ध्रुवमेव पृच्छकस्य ॥
माङ्गल्यद्रव्याणां दर्शनमाकर्णनं तथालपनम् ।
प्रष्टा चादरयुक्तः तत्सिद्धिमभीष्टस्य विदधाति ॥

* * * *

**Colophon:**

इति श्रीविद्वज्जनवल्लभायां लाभालाभनिर्णयो नाम प्रथमोऽध्यायः ॥

**End:**

लग्ने चरे स्यादचिरेण मोक्ष स्थिरे तथा चास्ति परं चिरेण ।
द्विदेहवर्तिन्यहिमांशुपुत्रे कालेन स स्यात् खलु मध्यमेन ॥

**Colophon:**

बन्धमोक्षो नाम अष्टमः ॥

सौम्यैस्सौम्यालोकितैः खेचरेन्द्रैः जायाधर्मच्छिद्रधीस्थानसंस्थैः ।
प्रालेयांशौ षड्दशायत्रिसंस्थे रोगव्यापत्पीडितानां शुभं स्यात् ॥
उपचयोपगते हिमगौ शुभैर्नवमपञ्चमकेन्द्रधनस्थितैः ।
शुभविलोकनगे यदि वोदये भवति रोगयुतोऽपि सुखी नरः ॥
पूर्णश्शशाङ्को यदि लग्नवर्ती विलोक्यते शीतकरात्मजेन ।
शुभं भवत्येव नरस्य सद्यः शुक्रामरेज्यावपि केन्द्रगौ चेत् ॥
लग्नस्थे वा नैधनस्थानगे वा पापे द्रष्टुर्लग्नवे.

---

## No. 13995. शकुनादिविषयः.
## ŚAKUNĀDIVIṢAYAḤ.

Pages, 14. Lines, 8 on a page.

Begins on fol. 133*a* of the MS described under No. 3237.

Deals with the omens generally indicated by the direction in which certain birds and animals pass at the time when a person starts on some errand.

**Beginning:**

श्वानकुक्कुटमार्जाला उलूकखरजम्बुकाः ।
निर्गमे वामतः श्रेष्ठः प्रवेशे दक्षिणे शुभम् ॥
केन्द्रत्रिकोणगे जीवे दक्षिणो भवति वायसः ।
त्रिसप्तनवमे चन्द्रे गरुडो गौलिवामतः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यात्रा—

. . . लग्नधनगेषु चन्द्रमास्सूर्यषष्ठदशमस्थितेऽपि वा ।
अश्वदन्तिधनलाभसम्पदं शीघ्रमेव पुनरेव गम्यताम् ॥

**End:**

आदिगतौ फलदौ रविभौमौ मध्यगतौ फलदौ गुरुशुक्रौ ।
अन्त्यगतौ फलदौ शनिराहू सर्वगतौ फलदौ बुधकेतू ॥
गुरोरस्तमये वृष्टिः भार्गवस्योदये तथा ।
बुधस्योभयतो वृष्टिः न वृष्टिः कुजमन्दयोः ॥

---

No. **13996.** सर्वतोभद्रचक्रम्, आन्ध्रटीकासहितम्.

SARVATŌBHADRACAKRAM WITH TELUGU MEANING.

**Pages,** 48. Lines, 18 on a page.

Begins on fol. 46*a* of the MS. described under No. 13570.

Complete.

. On the drawing of a mystic diagram called Sarvatōbhadracakra for the purpose of divination. The author of the Telugu meaning is stated as Dēvapāmātya. Same text as that described under No. 3116 on page 1114 of Part V of the India Office Library Catalogue.

Deals with the following topics :—

१. चक्रोद्धारः.
२. मासग्रहफलम्.
३. ग्रहवृष्टिफलम्.
४. तारकावेधा.
५. ग्रहादिवेधा.

**Beginning:**

अथातस्संप्रवक्ष्यामि चक्रं त्रैलोक्यदीपकम् ।
विख्यातं सर्वतोभद्रं सद्यः प्रत्ययकारकम् ॥

चक्रोद्धारः—

ऊर्ध्वगा दश विन्यस्य तिर्यग्रेखास्तथा दश ।
नवभिर्नवभिः कोष्ठैः सर्वतश्चक्रमुत्तमम् ॥
लिख्यते सर्वतोभद्रमेकाशीतिपदैर्युतम् ।
चतुष्षष्टिपदं खण्डमेकराशीति(म)खण्डकम् ॥
अङ्कवर्गपदं प्रोक्तं खण्डाखण्डोभयात्मकम् ।
कोणेषु षोडशस्वेषु अकारादीननुक्रमात् ॥
ईशान्याधिविदिक्ष्वाद्यान् सर्वान् षोडश विन्यसेत् ।

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथा दुष्टफलाः क्रूराः सौम्याश्शुभफलप्रदाः ।
क्रूरयुक्तास्तथा क्रूराः सौम्याः क्रूरफलप्रदाः ॥

**Colophon:**

इति सर्वतोभद्रचक्रे देवपामात्यसूरिविरचिते आन्ध्रभाषाया चक्रोद्धार नाम प्रथमः परिच्छेदः ॥

**End:**

प्रथमं चक्रमुद्धारं द्वितीयं ग्रहमेधनम् ।
उपग्रहस्तृतीयं तु लत्ताघातं चतुर्थकम् ॥
पञ्चग्रहं तु पञ्चानामृक्षषट्कन्तु षट्ककम् ।
उपग्रहसमायोगे मृत्युर्भवति नान्यथा ॥

* * * *

दीपो यथा गृहस्यान्ते खद्योता(उद्योत)यति सर्वदा ।
तथैव सर्वतोभद्रं सत्यं सत्यं न संशयः ॥

**Colophon:**

इति सर्वतोभद्रचक्रं संपूर्णम् ॥

---

## No. 13997. सर्वतोभद्रचक्रम्, आन्ध्रटीकासहितम्.

## SARVATŌBHADRACAKRAM WITH TELUGU MEANING.

Pages, 26. Lines, 18 on a page.

Begins on fol. 69*b* of the MS. described under No. 5764.

Breaks off in the fifth Pariccheda.

Same work as the above.

---

## No. 13998. सर्वतोभद्रचक्रम्.

## SARVATŌBHADRACAKRAM.

Pages, 8. Lines, 5 on a page.

Begins on fol. 62*a* of the MS. described under No. 13561.

Contains the first Paricchēda incomplete.

Same work as the above.

---

## No. 13999. सर्वतोभद्रचक्रम्, आन्ध्रटीकासहितम्.

## SARVATŌBHADRACAKRAM WITH TELUGU MEANING.

Pages, 8. Lines, 25 on a page.

Begins on fol. 27*a* of the MS. described under No. 13387.

Contains the first Paricchēda incomplete.

Slightly different from the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 14000. सर्वतोभद्रचक्रम्, आन्ध्रटीकासहितम्.

### SARVATŌBHADRACAKRAM WITH TELUGU MEANING.

**Pages**, 30. Lines, 6 on a page.

Begins on fol. 18*a* of the MS. described under No. 13556.

Breaks off in the second Paricchēda.

Same work as that described above.

---

## No. 14001. सर्वतोभद्रचक्रम्, आन्ध्रटीकासहितम्.

### SARVATŌBHADRACAKRAM WITH TELUGU MEANING.

**Pages**, 64. Lines, 5 on a page.

Begins on fol. 16*a* of the MS. described under No. 13449.

Complete.

Slightly different from the above and the work is not divided into Paricchēdas.

**Beginning :**

अथातस्संप्रवक्ष्यामि चक्रं त्रैलोक्यदीपकम् ।
विख्यातं सर्वतोभद्रं सद्यः प्रत्ययकारणम् ॥
त्रिविधं सर्वतोभद्रं खण्डाखण्डोभयात्मकम् ।
चतुष्षष्टिपदं खण्ड एकाशीतिमखण्डकम् ॥
शङ्कुमार्गादिचन्द्रस्य खण्डाखण्डोभयात्मकम् ।
ऊर्ध्वगा दश विन्यस्य तिर्यग्रेखास्तथा दश ॥
एकाशीतिपदं चक्रं जायते नात्र संशयः ।
अकारादिस्वरान् कोष्ठानीशादिविदिशि क्रमात् ॥
सृष्टिमार्गेण दातव्यं षोडशान्तं प्रयत्नतः ।
कृत्तिकादीनि धिष्ण्यानि पूर्वेशादि लिखेत्ततः ॥

**End :**

सूक्ष्मस्थूलमिदं द्वयोः प्रवसनं नाशं मृताख्यं जयं
हास्यं क्रीडितनामकं प्रियरतिं सुप्तिङ्कुभुक्तिज्वरम् ।
कम्पं सुस्थिरतां नृनामसदृशं चन्द्रोरवस्थाफलं
यात्रायुद्धविवाहवास्तुजननक्षेत्रप्रवेशादिषु ॥

---

## No. 14002. सर्वतोभद्रचक्रश्लोकाः.

### SARVATŌBHADRACAKRA ŚLŌKĀḤ.

**Pages**, 9. Lines, 5 on a page.

Begins on fol. 48*a* of the MS. described under No. 13449.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Complete.

Stanzas from the Sarvatōbhadracakra, especially those which deal with the वधा of the planets and constellations.

**Beginning :**

नामद्वितीयात्सौदन्तिवेधाफलं वक्ष्यते । कृत्तिका—

भरण्याकारवृषभं नन्दा भद्रा तुलाच्च तम् ।

विशाखा श्रवणं पापविद्धेत्याग्नेयसंस्थितः ॥

रोहिणी—

वायुग्मे दान्तदा कन्या रेफं स्वाति उकारकः ।

अश्विनी रोहिणीसंस्थे अभिजिद्धन्ति पापगः ॥

**End :**

अशिनी—

व मीन आकार्मुकं च ये ज्येष्ठा पूर्वं अग्रतः ।

पापग्रहे संस्थितेऽश्वी उकारं रोहिणी तथा ॥

भरणी—

लकारं मेषरिक्ता च जयः कार्पिनमैत्रभम् ।

कृत्तिकाभरणीपापसंस्थितं वितृमद्रतः ॥

**Colophon :**

इति सर्वतोभद्रचक्रे चौदन्तिश्लोकाः समाप्ताः ॥

---

## No. **14003.** सामुद्रिकनिरूपणम्.
## SĀMUDRIKANIRŪPAṆAM.

Pages, 27. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13974.

Incomplete; found in the Nāradīya.

Similar to the work described under R. No. 1248(*a*) of the Triennial Catalogue of MSS., Vol. II, Part I-A.

**Beginning :**

अथातस्सम्प्रवक्ष्यामि सामुद्रिकनिरूपणम् ।

केशादिपादपर्यन्तं द्वात्रिंशल्लक्षणान्वितम् ॥

शिरो मूर्धा ललाटश्च चक्षुः कर्णश्च वक्त्रकम् ।

ग्रीवा प्रजननं पृष्ठं नखं केशश्च वर्णकम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दन्तजिह्वाधरोष्ठं च भुजग्रीवा उरस्तथा ।
बाहुहस्तौ पादजङ्घे ऊरुनाभिश्च गुल्फकम् ॥
स्वरं सत्वञ्च गमनं द्वात्रिंशल्लक्षणं क्रमात ॥
शिरोमध्ये द्विभागश्च गजमस्त[क]समन्तु वा ।
गजवाहनसम्पन्नो गाम्भीर्यो भोगवान् भवेत् ॥

**End:**

तदूर्ध्वे व्याघ्रगण्डश्च तत्पार्श्वे राजगण्डयोः ।
रेखा द्वित्रि च दृश्यन्ते तद्गण्डश्च विवारणम् ॥
करपार्श्वे सन्ततिः स्यात् अङ्गुल्यग्रेषु भर्तृषु ।
रेखाप्रमाणं वक्तव्यं तत्सङ्ख्या भ्रातृपुत्रयोः ॥

**Colophon:**

इति नारदीये स्त्रीपुरुषदेहहस्तपादतत्फलनियमप्रवर्तने सामुद्रिकलक्षणं समाप्तम् ॥

---

## No. 14004. सामुद्रिकशास्त्रम्.

## SĀMUDRIKAŚĀSTRAM.

Pages, 24. Lines, 32 on a page.

Begins on fol. 65*a* of the MS. described under No. 27.

Incomplete. The MS. is irregularly bound.

Similar to the above. Said to have been revealed by God Viṣṇu to Nārada.

**Beginning:**

ब्रूहि लक्षणसङ्क्षेपं मनुष्याणां यथाक्रमम् ।
एवं स पृष्टो भगवान् नारदेन महात्मना ॥
केशवः प्रत्युवाचेदं देहलक्षणकोविदः ।
कर्मणा प्राकृतेनाथ नराणां भागधेयशः ॥
पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ।
आयुर्हीननराणां तु लक्षणैः किं प्रयोजनम् ॥
वेद्येष्वायुः पूर्ववेद्यं ततो लक्षणमादिशेत् ।
वामभागे तु नारीणां दक्षिणे पुरुषस्य तु ॥
निर्दिष्टं लक्षणं तेषां सामुद्रिकवचःक्रमात् ।
आयुर्निदानभूताया रोहिण्याः साधुलक्षणम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रोहिणी मणिबन्धात्तु तलमूलस्य मध्यतः ॥
आतर्जन्यन्तगा रेखा तत्समावर्ण एव वा ।
तद्दाम्नरः शतायुः स्यात् यत्र यत्रान्तरान्तरा ॥

**End:**

कनिष्ठाङ्गुलिमूले तु ऊर्ध्वा रेखाधिगच्छति ।
जलगण्डमवाप्नोति नदीतीरे महद्भयम् ॥
तन्मध्ये रेखदृष्ट्या च विषशस्त्राग्निबाधतः ।
तर्जन्यङ्गुलिमूले तु विद्यारेखा स्वनामतः ॥
मध्यमाङ्गुलिमूले तु ऊर्ध्वरेखाधिगच्छति ।
ज्वरग्रन्थिप्रमेहाश्च विचिरङ्गमवाप्नुयात् ॥
तन्मध्यरेखा दृष्टा चेत् श्वानमर्कटमूषकाः ।
तार्जन्यङ्गुलिमूले तु ऊर्ध्वरेखाधिगच्छति ॥
परस्त्रीभिर्मनोभीतिः राजदण्डादिबन्धनम् ।
सव्यरेखाविछिद्रं स्यात् सर्पदष्टमहद्भयम् ॥

---

No. 14005. सामुद्रिकशास्त्रम्.
SĀMUDRIKAŚĀSTRAM.

Substance, palm-leaf. Size, $12\frac{7}{8} \times 1\frac{7}{8}$ inches. Pages, 20. Lines, 5 on a page. Character, Grantha. Condition, much injured. Appearance, new.

Incomplete.

Similar to the work described above.

**Beginning:**

शृणु सङ्क्षिप्य वक्ष्यामि पूर्वं पुरुषलक्षणम् ।
पूर्वमायुःपरीक्षार्थं कलयेन्मानमन्दिरे ॥
आनीय सूत्रव्यामे च तनौ मानं प्रकल्पयेत् ।
समं चेदस्य योगः स्यात् विषमं चेद्दरिद्रता ॥
माने कृते यदि भवेत् पादेष्टौ च शताङ्गुलम् ।
दीर्घायुर्धरणीपालः षण्णवत्यङ्गुलं भवेत् ॥
अशीतिवर्षजीवी च स भवेदिन्द्रसम्मतः ।
मानेऽप्यशीत्यङ्गुलं चेन्मध्यमायुरकिश्चनः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

गण्डयोः कूपिका यस्या असत्यास्तान्तु नोद्वहेत् ।
पाटले वर्तुलस्निग्धरेखाभूषितमध्यमा ॥
सीमन्ति(नी)नामधरो महिषीलाञ्छनं भवेत् ।
कुशब्दलम्बस्फुटितो रूक्षो दौर्भाग्यसूचकः ॥
श्यामस्थूलाधरोष्ठा स्यात् वैधव्यकलहप्रदा ।
गोक्षीरसन्निभाः स्निग्धा द्वात्रिंशद्दशनाश्शुभाः ॥
पीता श्यामाश्च दशनाः स्थूला दीर्घा द्विपङ्क्तयः ।
शुक्त्याकाराश्च विरलाः दुःखदौर्भाग्यसूचकाः ॥

---

No. 14006. सामुद्रिकशास्त्रम्.
SĀMUDRIKAŚĀSTRAM.

Pages, 23. Lines, 30 on a page.

Begins on fol. 37*a* of the MS. described under No. 2699.
Complete.
Similar to the work described above.

**Beginning:**

अथाहं नरनारीणां लक्षणञ्च शुभाशुभम् ।
आलोक्य सर्वशास्त्राणि कथयामि यथा तथा ॥
मांसवर्णैः नखैर्भूपः पद्मताम्रोपमैर्धनी ।
रक्तवर्णे तु मन्त्री च श्वेतवर्णैस्तु दुःखितः ।
श्वेतैर्नखैर्विरूपैश्च दुःखजीवी भवेन्नरः ।
शूर्पाग्रैः स्फुटितैर्वक्रैः नरो दारिद्र्यभाग्भवेत् ॥
दुराचारस्तु कुनखी ब्रह्महा च हरिन्नखैः ।
बन्धुक्षयकरो युक्तो नखाश्चात्यन्तलोहिताः ॥

* * * *

**Colophon:**

इति पुंलक्षणसङ्ग्रहः समाप्तः ॥

**End:**

आद्यपर्वणि तर्जन्या रेखा पार्श्वोन्मुखी मुनिः ।
आरोग्यकान्तिसौभाग्यधनलाभादितत्फलम् ॥
सैषा दारिद्र्यरोगादिदुःखानां मोचनान्मुनिः ।
असिघ्नी तर्जिनीमूलादूर्ध्वमत्यन्तसन्निधौ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिर्यग्गता फलं मृत्युः अष्टाविंशे तु वत्सरे ।
असिघ्नी त्वसिना नामहननस्य प्रसङ्गतः ॥
ऊर्ध्वं त्वसिघ्न्यास्सुरुचिः तिर्यक्सा पुरुषाकृतिः ।
अकालमृत्युदा नाम शोभनाङ्गत्वसूचनात् ॥
द्वितीया या तु तर्जन्या संश्लिष्टा सन्धिरेखया ।

**Colophon:**

इति सामुद्रिकं सम्पूर्णम् ॥

The scribe adds—

प्रभवनामसंवत्सरभाद्रपदबहुळस्थिरवासरे पूर्तिमगमत् ॥

---

No. **14007.** सामुद्रिकशास्त्रम्.

SĀMUDRIKAŚĀSTRAM.

Pages, 8. Lines, 5 on a page.

Begins on fol. 12*a* of the MS. described under No. 13465.

Contains the following Adhyāyas :—

१. स्त्रीपुरुषायुषलक्षणम्.
२. अङ्गुलिलक्षणम्.
३. नासालक्षणम्.
४. पार्ष्णिजङ्घालक्षणम्.
५. गतिलक्षणम्.
६. जानुलक्षणम्.
७. गन्धलक्षणम.

Similar to the work described above.

**Beginning:**

प्रणम्य शिरसा देवं चन्द्रज्वलनशोभितम् ।
सर्वज्ञं सर्वद्रष्टारं सर्वस्य जगतः पतिम् ॥

पुरुषाणां तथा स्त्रीणां लक्षणं च समग्रतः ।
अधमोत्तममध्यानां यथा प्राह पयोनिधिः ॥

ईश्वर उवाच—

शोभने हस्तनक्षत्रे सौम्ये वारे शुभे रवौ ।
पूर्वाह्णे ब्राह्मणैर्युक्तः परीक्षेत विचक्षणः ॥

ब्राह्मणानां पृथग्ज्ञेयं तथा सर्वाङ्गलक्षणम् ।
दन्तकेशनखश्मश्रुगन्धवर्णस्वरादिभिः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरुष(पूर्व)मायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ।
हीनायुषां तथा स्त्रीणां लक्षणैः किं प्रयोजनम् ॥
अधमो नवतिः प्रोक्तो मध्यमस्तु शताङ्गुलिः ।
अष्टोत्तरशतं यस्तु सोत्तमः परिकीर्तितः ॥

**Colophon:**

इति सामुद्रिकायां प्रथमोऽध्यायः ॥

**End:**

ऊरुभ्यां विकटाभ्यां च भवेत् स्त्रीषु स वल्लभः ।
स्थूलाग्रं मध्यनिम्नं च ते नरा दुःखभागिनः ॥

**Colophon:**

इति सामुद्रिके जानुलक्षणो(नाम)षष्ठोऽध्यायः ॥
दक्षिणावर्तलिङ्गेन पुत्रवान् स भवेन्नरः ।
वामावर्तेन लिङ्गेन नरः कन्याप्रजो भवेत् ॥

* * * *

हालागन्धेन नृपतिः पद्मगन्धेन भूपतिः ।
लाक्षागन्धो भवेन्नीचो मांसगन्धेन तस्करः ॥

---

No. **14008.** सामुद्रिकशास्त्रम्, सव्याख्यानम्.

SĀMUDRIKAŚĀSTRAM WITH COMMENTARY.

Pages, 116. Lines, 7 on a page.

Begins on fol. 26*a* of the MS. described under No. 12572.

Incomplete. Wants the beginning.

Similar to the work described above and together with a commentary thereon.

**Beginning:**

तथा च समुद्रः—शूर्पाकारैस्स्तम्भनैर्वक्रैश्शुष्कैस्सिराततैस्स . . . . .
रूक्षश्चरणैरतिदुःखिताः । मार्गायोत्कटकाविति—उत्कटकापद . . . .

* * * *

अथ जङ्घयोर्लोम . . लक्षणमाह—
रोमैकैकं कूपके पार्थिवानां द्वे द्वे ज्ञेये पण्डितश्रोत्रियाणाम् ।
त्र्याद्यैर्निस्स्वा मानवा दुःखभाजः केशाश्चैवं निन्दिताः पूजिताश्च ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एकैकं रोम । कूपके रोमकूपके पार्थिवानां राज्ञां भवति ॥

**End :**

यस्याः पाणितले रेखाप्रकारास्तोरणास्तथा ।
अपि दासकुले जाता भूपतेर्महिषी भवेत् ॥

**Colophon :**

इति कन्यालक्षणं समाप्तम् ॥

* * *

इत्यष्टौ स्वरलक्षणम् ॥

---

No. **14009.** सामुद्रिकशास्त्रम्, सव्याख्यानम्.

SĀMUDRIKAŚĀSTRAM WITH COMMENTARY.

**Pages,** 30. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 5082.

Incomplete.

A treatise on fortune-telling based on the color, the proportion, etc., of the various parts of the body as well as the lines in the palm and in the foot. The commentary here is called Lakṣaṇadīpikā and is said to have been written by a son of Mārkaṇḍēśvara of Kauṇḍinyagōtra and possessing a knowledge of the Śrīkaṇṭha religion.

**Beginning :**

विघ्नेशषण्मुखयुतं विधिविष्णुवन्द्यं
वेदान्तवेद्यममलं गिरिजासहायम् ।
सम्प्रार्थये सकलवाञ्छितवस्तुसिद्ध्यै
सम्यक् प्रणम्य भुवनेशमहागिरीशम् ॥

कौण्डिन्यान्वयदुग्धसागरशशी श्रीकण्ठवित्ताग्रणीः
त्रय्यन्तादिसमस्तशास्त्रचतुरस्त्रैलोक्यविद्यु(द्व)न्मणिः ।
मार्कण्डेश्वरसूनुरेतदखिलं चक्रे सतां प्रीतये
(सत्)सामुद्रिकशास्त्र . . . . मुदा ॥

यद्गार्ग्यनारदनदीश्वरशास्त्रसिद्धं सङ्क्षिप्य विस्तरमनेकमतं बुधेन्द्राः ।
तत्तत्त्वयुक्तिस . . . सकलप्रकाशं गृह्णन्तु मद्गदितमत्र नृलक्ष्मिदीपम् ॥
सत्पात्रस्नेहसंसक्तदशा लोकतमोपहा ।
दीपिकेवं विभात्ये(षा) . . . लक्षणदीपिका ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



* * * *

(मू.) उन्मानमानपुरसंहतिवर्णकान्तिः स्नेहस्वरप्रकृतिसत्त्वमनूकसारम् ।
यानं च गर्गमुनिनारदसागरादिशा . . . . नुजलक्ष्म . . . मि सारम् ॥

(व्या.) उन्मानं . . . . . . दि । मानं जलादिमेयं श . . . दि । पुरं शरीरम् । "पुरं पुरशरीरयोः" इति विश्वः ।

पादादिकेशान्तं . . . शरीरम् । संहतिरङ्गासोम . . . ष्टता । वर्णः कृष्णाद्यः । कान्तिः पञ्चभूतकृच्छाया वा सा स्यात् सातपे कान्तौ प्रतिबि . . . . . . . यादवः । स्नेहः दर्शनस्पर्शनयोरस्पृष्टत्वमपुरुषत्वम् । स्वरः कण्ठध्वनिः । प्रकृतिः पार्थिवादिस्वभावः । सत्त्वं नाम चित्त . . . . . . थवा कामतन्त्रोक्त देवदा . . . दिस्वभावः । अनूकमतीतजन्मवृत्तान्तम् ।

* * * *

उन्मानादित्रयोदशविधं स्थानं गर्गनारदमुनिसागरादिकृतेभ्यः शास्त्रेभ्यः क्षीरसागरादमृतमिव सारमादाय मनुजलक्ष्म वदामीति . . . . . . . . शानन्तरं लक्षणं लक्षयति—

(मू.) अष्टोत्तरशतं पुंसां षण्णवत्यङ्गुलान्तरः ।
स्वाङ्गुलीनां तु मानेन अशीतिचतुरन्तरम् ॥
श्रेष्ठा मध्यमहीनानामे . . . . . धीयते ।

* * * *

जजाप विष्टपादाग्रमारभ्य शिरसा विधिः ॥
परिप्रसारितं नाममेयान्तस्याङ्गुलेः क्रमात् ।

* * * *

उत्तमत्वादिता सा तु वक्ष्यमाणैश्च लक्षयेत् ॥
रेखाहं लक्षणैस्सम्यग्रेखास्थानं च वक्ष्यते ।
दक्षिणे . . . . पुंसां वामे तु योषिताम् ॥

अथ पुरुषलक्षणमाह—

अथ पुरुषलक्षणं लक्षयितुं तदुपोद्घातत्वेन नृणां जीवितं . . . ।
आयुषो निर्णयं कृत्वा पश्चाल्लक्ष्म वदेन्नृणाम् ।
आयुर्हीने तु तेषां तु लक्षणैः किं प्रयोजनम् ।
उक्तं च शिव . . . . . . . —



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



* * * *

तस्माद्वक्ष्यामि सर्वेषामायुर्लक्षणमादितः ।
तत्रापि कथयिष्यामि नृणां स्त्रीणां ततः क्रमात् ॥

* * * *

स्निग्धारुणनखैर्यस्तु सप्तत्यायुस्स जीवति ।
अतीव शीतनयनो दीर्घमैथुनत्रिंशतौ ॥
अत्युन्नताच्छनेत्रोऽपि . . . . रर्धवृषणोऽपि
अतीव पीतवर्णो यः देवब्राह्मणनिन्दकः ।
तस्य षोडशवर्षासु मृतिरष्टादशेऽपि वा ॥

**End :**

छायाक्रमेण कुजलाग्न्यनिलाम्बरार्थाः ।
केचिद्वदन्ति तत्समासाः ॥

**Colophon :**

इति पञ्चदशच्छायालक्षणम् ।
केचित् दशच्छायां प्राहुः इत्थम्—
गणयेच्छुद्धसूत्रेण नाभिमापादतः क्रमात् ।
तदर्धं गुणितं कृत्वा सप्त स्थानानि लक्षयेत् ।
चुबुकं प्रथम पश्येत् मुखनासाभ्रुवोर्द्वयम् ।
ललाटं ब्रह्मरन्ध्रं च सप्त स्थानान्यशेषतः ॥
पौराणि शास्त्रमन्त्रं च.

---

## No. 14010. स्वप्नाध्यायः.
## SVAPNĀDHYĀYAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 40*a* of the MS. described under No. 5858.

Complete.

Herein it is stated what kinds of predictive inferences may be drawn from particular kinds of dreams, and what period of time must elapse before they are actually realized.

**Beginning :**

स्वप्नाध्यायं प्रवक्ष्यामि नानास्वप्नसमुच्चयम् ।
स्वप्नस्तु प्रथमे यामे संवत्सरविपाकतः ॥
द्वितीये चाष्टभिर्मासैः त्रिभिर्मासैः त्रियामके ।
अरुणोदयवेलायां दशाहेन फलं लभेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गोविसर्जनवेलायां सद्य एव फलं लभेत् ।
अत ऊर्ध्वं प्रवक्ष्यामि पुण्यात्पुण्यफलं शृणु ॥
यस्तु पश्यति स्वप्नान्ते राजानं कुञ्जरं हयम् ।
सुवर्णं वृषभं गाञ्च कुटुम्भं तस्य वर्धते ॥

**End:**

शुष्कं कण्टकिनं वृक्षमेकाकी यः प्ररोहति ।
तत्र तस्य विबुध्येत मृत्युं शीघ्रमवाप्नुयात् ॥
स्वप्नाध्यायमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
दुस्स्वप्नं नश्यते तस्य सुस्वप्नफलमाप्नुयात् ॥

**Colophon:**

स्वप्नाध्यायस्समाप्तः ॥

---

No. **14011.** स्वप्नाध्यायः.
SVAPNĀDHYĀYAḤ.

Pages, 3. Lines, 13 on a page.

Begins on fol. 144*a* of the MS. described under No. 4338.

Contains the Adhyāyas 1 and 2 complete.

Similar to the above.

See under the previous number for the beginning.

**End:**

स्वप्नाध्यायामद् पुण्यं प्रातरुत्थाय यः पठेत् ।
आयुरोराग्यमैश्वर्यं बृहस्पतिरुवाच ह-॥
प्रातः स्नात्वा . . . . . . सुखी भवेत् ।

**Colophon:**

इति स्वप्नाध्याये प्रथमोऽध्यायः ॥
आरुह्य नावं प्रतिगृह्य वीणां
भुक्त्वा च विद्याधिकहृद्यलाभम् ।

**End:**

कारागृहाद्विमुच्येत महत्सुखमवाप्नुयात् ।
नियतं भवति स्वप्ने स्त्रीसङ्गवसतिस्तथा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **14012.** स्वप्नाध्यायः.
SVAPNĀDHYĀYAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 19*a* of the MS. described under No. 13699.
Incomplete.
Same work as the above.

---

No. **14013.** स्वप्नाध्यायः.
SVAPNĀDHYĀYAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 4059.
Incomplete.
Same work as the above.

---

No. **14014.** स्वरचिन्तामणिः, आन्ध्रटीकासहितः.
SVARACINTĀMAṆIḤ WITH TELUGU MEANING.

Pages, 152. Lines, 22 on a page.

Begins on fol. 89*a* of the MS. described under No. 22.
Contains the following 24 Adhyāvas :—

| | |
|---|---|
| १. प्रशंसानुक्रमणिका. | १३. भोजनाध्यायः. |
| २. पिण्डोत्पत्तिः. | १४ ताम्बूलाध्यायः. |
| ३. स्वरोत्पत्तिः. | १५. सम्भोगाध्यायः. |
| ४ कालप्रमाणसंख्या. | १६. रोगनिरूपणम्. |
| ५. नाडीसन्दीपनप्राणायामाध्यायः | १७. युद्धाध्यायः |
| ६. स्वरकर्माध्यायः. | १८. वृष्टिः. |
| ७. आकस्मिकस्वराध्यायः. | १९. धान्याध्यायः. |
| ८. शाकुनाध्याय. | २०. आखेटाध्यायः. |
| ९. तत्त्वाध्यायः. | २१. पौषकालविचाराध्यायः. |
| १०. मूलस्वराध्यायः. | २२. छायाध्यायः. |
| ११. मूलचिन्ताध्यायः. | २३. दुस्स्वप्नाध्यायः. |
| १२. जलप्रचाराध्यायः. | २४. अरिष्टाध्यायः, |

A treatise dealing with the prognostication of events made by observing the nature and characteristics of respiration at particular times. The work is in the form of a dialogue between Pārvatī and Śaṅkara. The stanzas are accompanied by Telugu meaning.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



The copyist Venkaṭakṛṣṇa Rao gives the date: Tuesday, the 5th of Āni of the Dundubhi year corresponding to 17th June 1869.

**Beginning :**

सर्वेशं सर्वगं सर्वं सर्वभूतहृदि स्थितम् ।
सर्वकार्यकरं नीत्वा स्वरज्ञानमुदीरयेत् ॥

* * * *

यस्मादुत्पद्यते विश्वं पुनर्यस्मिन्विलीयते ।
तमहं शाश्वतं वन्दे समीरणपदानुगम् ॥

* * * *

अव्यक्तमव्ययं शान्तं नितान्तं योगिनां प्रियम् ।
सर्वज्ञानस्वरूपं यत् तद्वन्दे ब्रह्म सर्वगम् ॥

* * * *

अभयं देवदेवेशं लोकनाथं जगत्पतिम् ।
सर्वज्ञं तं नमस्कृत्य देवी वचनमब्रवीत् ॥

* * * *

कारणस्य च रागस्य कालस्य गुलिकस्य च ।
अलातपातदिग्दाहहोराणां वासरस्य च ॥
यन्त्रमन्त्रग्रहादीनां सर्वेषां सर्वकर्मणाम् ।
सर्वसिद्धिकरं ज्ञानं कथयस्व मम प्रभो ॥

* * * *

श्रीभगवान् शङ्कर उवाच—

साधु साधु महाभागे सर्वज्ञे चारुभाषिणि ।
रहस्यं कथ्यते देवि हे पार्वति तव प्रियम् ॥
यस्य विज्ञानमात्रेण ज्ञास्यसे भुवनत्रयम् ।
चिन्तामणिरिति ख्यातं चिन्तनीयं सुरासुरैः ॥

* * * *

कारणस्य च रागस्य कालस्य गुलिकस्य च ।
अलातपातदिग्दाहा यस्मिन्नभ्युदिते स्वरे ॥
यन्त्रमन्त्रसमूहैश्च सग्रहौषधिभिस्तथा ।
भिद्यते रिपुसङ्घाश्च सुस्वरेण यथासुखम् ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वरे च देव(वेद)शास्त्राणि स्वरे गान्धर्वमुत्तमम् ।
स्वरे च वर्तते लोकः स्वर आत्मनिरूपकः ॥

* * * *

यावद्विषमतामेति स्वरस्तावत्तनोः स्थितिः ।
यदा स्वरस्समं याति देहपातस्तदा भवेत् ॥

* * * *

प्रशंसा प्रथमाध्याये पिण्डोत्पत्तिर्द्वितीयके ।
तृतीये तु स्वरोत्पत्तिरध्याये कथयिष्यते ॥

* * * *

**Colophon :**

इति स्वरचिन्तामणौ प्रशंसानुक्रमणिका(नाम) प्रथमोऽध्यायः ॥

**End :**

पक्षे कृष्णसितादिके सितपटस्नानान्वितस्सुस्थले
रात्रौ शम्भुमुपास्य भक्तिसहितो मृत्युञ्जयं भावयेत् ।
लिम्पेद्यावकमेव पादयुगले प्रोत्थाय तस्मिन् शितौ
श्वेतत्वे सहजे मृतिं रुजमगात्प्राणी सुखं शेरते ॥

**Colophon :**

इत्यरिष्टाध्यायश्चतुर्विंशतिस्समाप्तः ॥

---

No. **14015.** स्वरचिन्तामणिः.

SVARACINTĀMAṆIḤ

**Pages,** 24. **Lines,** 6 on a page.

Begins on fol. 100*a* of the MS. described under No. **13609.**

Breaks off in the sixth Adhyāya

Same work as the above.

---

No. **14016.** स्वरचिन्तामणिः आन्ध्रटीकासहितः.

SVARACINTĀMAṆIḤ WITH TELUGU COMMENTARY.

**Pages,** 144. **Lines,** 16 on a page.

Begins on fol. 19*a* of the MS. described under No. 4389.

Breaks off in the ninth Adhyāya.

Same work as the above but with Telugu explanation of the stanzas.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **14017.** स्वरशास्त्रप्रश्नः.

SVARAŚĀSTRAPRAŚNAḤ.

**Pages**, 2. Lines, 8 on a page.

Begins on fol. 7*a* of the MS. described under No. 13705

Wants the beginning and the end.

Similar to the above.

**Beginning:**

यतः (इडा)स्यादुत्तरं नाडी पिङ्गला दक्षिणा स्मृता ।
सुषुम्ना मध्यमायां तु यत्र सङ्क्रमते खगः ॥

* * * *

मरणं मोहनं स्तम्भं विद्वेषोच्चाटनं वशम् ।
प्रेरणाकर्षणं क्षोभं भानुनानु(ज्ञु)दयंकरः ॥
विग्रहे द्यूतयुद्धे च स्नानभोजनसङ्गमे ।
व्यवहारे भये भङ्गे भानुनाडी प्रशस्यते ॥

**End:**

अकारोकारजीवे च ओकारौकारसौम्यभिः ।
